११	(२, २, १५, १—३)	,, ..	४५८
१२	(३, १, ११, १—२)	५ ..	६२२
१३	(१, १, १८, १—२)	३ ...	१६२
१४	(३, १, ११, १—३)	५ ...	६३३
१५	(१, १, १८, १—३)	३ ...	१६३
१६	(८, १, ११, १—३)	४ ...	३६
१७	(३, १, ११, १—३)	३ ...	५८०
१८	(३, २, २३, १—३)	,, ..	६८६
१९	(४, १, १४, १—३)	४ ..	१६१
२०	(५, १, २०, १—३)	,, ...	२६१

॥ चयोविंश प्रपाठकः ॥

—»—

॥ प्रथमोऽर्द्धः ॥

साम	मूलम	भागे	पृष्ठे ।
१	(५, २, २३, १—३)	४ ...	३८४
२	(९, १, १६, १—१)	५ ..	६७२
३	(३, १, ११, १—३)	३ ...	५८१
४	(३, २, २३, १—३)	,, ...	६८७
५	(५, २, १३, १—३)	४ ...	३८५
६	(९, १, १६, १—१)	५ ...	६७२

साम	मूलम्	भागे	पृष्ठे ।
८	(१, १, २०, १—३)	३ ...	१८२
९	(१, १, १८, १—३)	,, ...	१९४
१०	(३, १, १९, १—३)	,, ...	५७१
११	(९, १, १०, १—३)	५ ..	९९०
१२	(३, २, १९, ३—०)	३ ...	९७०
१३	(४, १, २०, ३—०)	५ ..	९३८
१४	(,, १—३)	४ ...	८७
१५	(८, १, ७, १—३)	५ ...	१५७
१६	(३, १, १९, १—३)	३ ...	५७१
१७	(३, १, १, १—३)	५ ..	९२९
१८	(३, २, १, १—३)	३ ...	५९०
१९	(४, १, ११, २—०)	४ ...	३७
२०	(,, ३—०)	४ ...	,,

॥ द्वितीयोऽर्द्धः ॥

साम	मूलम	भागे	पृष्ठे ।
१	(४, १, २१, १—३)	४ ..	९४
२	(४, १, १, १—३)	,, ...	९
३	(४, २, १, १—३)	,, ...	११३
४	(५, १, १, १—३)	,, ...	१७२
५	(५, २, १, १—३)	,, ...	२९७
६	(४, २, १, १—३)	,, ...	११४
७	(५, १, १, १—३)	,, ..	१७३
८	(५, २, १, १—३)	,, ...	२९८
९	(,,)	,, ...	२९९
१०	(९, १, ४, १—३)	४ ..	४०१
११	(३, १, १२, १—३)	३ ...	५३५
१२	(,,)	,, ...	५३६
१३	(,,)	,, ...	,,
१४	(४, १, १३, १—३)	४ ...	५२
१५	(४, २, ७, १—३)	,, ...	१३८
१६	(५, १, १२, १—३)	,, ...	२१८
१७	(५, २, १३, १—३)	,, ...	२२३
१८	(४, २, ७, १—३)	,, ...	१३९
१९	(५, १, १२, १—३)	,, ...	२११
२०	(५, २, १३, १—३)	,, ...	२२४

॥ तृतीयोऽर्द्धः ॥

साम	मूलम्	भागे	पृष्ठे ।
१	(४, १, १०, १—३)	४ ..	१५१
२	(७, १, ११, १—३)	५ ...	९३
३	(९, १, ५, १—३)	४ ...	४५९
४	(७, २, ७, १—३)	५ ...	९४
५	(७, ३, ८, १—३)	,, ..	१०८
६	(९, १, ९, १—३)	,, ..	९९८
७	(७, १, ८, १—३)	,, ...	९७

॥ इति क्षुद्र-पर्व ॥ ७ ॥

—o—

॥ ऊहगानञ्च समाप्तम् ॥

उत्तरार्चिक-परिशिष्टभूतस्य ऊह्यगानस्य

परिच्छेद-सूची ॥

परिच्छेदः	पृष्ठम्।
अथ दशरात्र-पर्व ...	३८१
,, प्रथमः प्रपाठकः [= द्वौ अर्द्धौ = (२०—१६) ३६] ...	,,
,, संवत्सर-पर्व ..	४१०
,, द्वितीयः प्रपाठकः [= द्वौ अर्द्धौ = (२०—१४) ३४]	४१६
,, एकाह पर्व ...	४५७
,, तृतीयः प्रपाठकः [= द्वौ अर्द्धौ = (२०—१६) ३६]..	,,
अथ अहीन-पर्व ...	४८०
,, अथ चतुर्थः प्रपाठकः [= द्वौ अर्द्धौ = (२०—१८) ३८]	४९३
,, सत्र-पर्व ...	५०९
,, प्रायश्चित्त-पर्व ..	५१९
,, पञ्चमः प्रपाठकः [= द्वौ अर्द्धौ = २०—१४) ३४]	५३१
,, क्षुद्र-पर्व	५५०
,, षष्ठ प्रपाठकः [= द्वौ अर्द्धौ = (२०—७) २७]	५७

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १४ ॥

॥ अथ चतुर्दशोऽध्याय आरभ्यते* ॥

तत्र,

प्रथमे खण्डे अभिप्रगोपतिमिति ऽचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

३ १ २ २ ३ १ २ ३ १ १ ३ १
अभिप्रगोपतिङ्गिरेन्द्रमर्च्चयथाविदे ।
३ १ ३ १ २ १ २
सूनुꣳसत्यस्यसत्पतिम् ॥ १ † ॥

हे स्तोतः ! "गोपतिं" गवां स्वामिनम् "इन्द्रम्" "अभि प्र अर्च्च" प्रकर्षेण पूजय "गिरा" स्तुत्या "यथाविदे" स यथा स्वात्मानं स्तुतप्रकारं जानाति, यथा वा यागं प्रति गन्तव्यमिति जानाति तथार्च्चेति । कीदृशमिन्द्रम् ? "सत्यस्य" यज्ञस्य वा "सूनुं" पुत्रं [तत्रानुरक्तत्वात् सूनुरित्युपचर्यते] "सत्पतिं" सतां पालकम् ॥ १ ॥

---

* 'इदानीमेकाक्षरज्योतिर्मारायुरित्येवमादयः षोडशात् प्रपाठकात् प्रभृति प्रदृताः' —इति वि० ।

† ऋ० भा० २, १, ३, ४ (१भा० ३८२पृ०) = ऋ० वे० ६, ४, ५, ४ ।

अथ द्वितीया।

१२ २२ २१२३१ २१ १२
आहरयःसस्रुज्रिरेरुषीरधिबर्हिषि।
२३ २३१२
यत्राभिसन्नवामहे॥ २ *॥

"हरयः" हरितवर्णाः अश्वाः "अरुषीः" आरोचमानाः "अधिबर्हिषि" [अधीति सप्तम्यर्थानुवादी], बर्हिषास्तृते "आ ससृज्रिरे", आसृजन्तु, "यत्र" यस्मिन् बर्हिषि स्थितमिन्द्रम् "अभि सन्नवामहे" अभिसंस्तुमः॥ २॥

अथ तृतीया।

१२ २१२३ १२ २२३ २३१२
इन्द्रायगावआशिरन्दुदुह्रेवज्रिणेमधु।
१२ २२३२
यत्सोमुपह्वरेविदत्॥ ३ †॥ १

"इन्द्राय" "गावः"‡ "आशिरम्" आश्रयण-साधनम् पयआदिकम् "मधु" मदकरं "दुदुह्रे" दुहते। कीदृशाय? "वज्रिणे" वज्र-युक्तायेन्द्राय "यद्" यदा "उपह्वरे" समीपे¶ वर्त्तमानं "मधु" सोमरसं "सोम्" सर्वतः "विदत्" लभते तदा॥ ३॥ १

---

* ऋ० वे० ६, ५, ५, ५।

† ऋ० वे० ६, ५, ६, १।

‡ 'इन्द्राय गावः—इन्द्राय अर्थे गावः'—इति वि०।

¶ 'उपह्वरे यज्ञे'—इति वि०।

अथानोविश्वास्विति प्रगाथात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा ।

२ ३ १२ १२३१२ ३१२
आनोविश्वासुहव्यमिन्द्रःसमत्सुभूषत ।

१२११ ३१२ २३१ २
उपब्रह्माणिसवनानिवृत्रहन्परमज्याऋचीषम ॥ १ * ॥

हे ऋत्विजः ! "विश्वासु" सर्वासु "समत्सु" असुर-युद्धेषु "हव्य" सर्वैर्देवैरात्मरक्षार्थमाह्वातव्यमिन्द्रमुद्दिश्य "नः" अस्माकं यज्ञे "ब्रह्माणि" स्तोत्राणि हवीरूपाण्यन्नानि वा, तथा "सवनानि" प्रातःसवनादीनि त्रीणि सवनानि च "उप आभूषत" उप सकलेऽपि सम्यगलङ्कुरुत । "हे वृत्रहन् ! वृत्रस्यासुरस्य पापस्य वा हन्तः ! "परमज्याः" युद्धेषु शत्रु-हननार्थं परमा अविनश्वरी ज्या मौर्वी यस्य स तथोक्तः [यद्वा परमान् बलेन प्रकृष्टान् शत्रून् जिनाति हिनस्तीति परमज्याः] हे "ऋचीषम" स्तुतिभिरभिमुखीकरणीय ! एवम्भूतेन्द्र ! त्वम् अस्मदभिलषितानि प्रयच्छेति शेषः ॥

"हव्यमिन्द्रंसमत्सुभूषत"—"हव्यइन्द्रःसमत्सुभूषतु"—इति पाठौ, "वृत्रहन्परमज्याऋचीषम"—"वृत्रहापरमज्याऋचीषमः"—इति च पाठौ ॥ १ ॥

---

* ऋ० आ० ३, १, ३, ७ (१मा० ५५५पृ०) = ऋ० वे० ६, ६. १३, १ ।

अथ द्वितीया ।

२ १ १ २१२ २२ ३१ २३१२ १२
त्वन्दाताप्रथमोराधसामस्यसिसत्यईशानकृत् ।

३ १ २१२ २२ ३२३१२ ३२
तुविद्युम्नस्ययुज्यावृणीमहेपुत्रस्यशवसोमहः ॥ २* ॥ २

हे इन्द्र ! "प्रथमः" सर्वेषां मुख्यस्त्वं "राधसां" धनानां "दाता" "असि" [यद्वा, धन-दातॄणां मध्ये त्वं प्रथम आदिमो भवसि] । तथा "ईशानकृत्" तव स्तोतॄन् ईशानान् ऐश्वर्य-युक्तान् कुर्वन् त्वं "सत्यः" सत्य-कर्मासि यथार्थ-कर्मा भवसीत्यर्थः । यस्मा देवं तस्मात् वयं "तुविद्युम्नस्य" बहु-धनवतो बहुबलस्य वा "शवसः" बलस्य "पुत्रस्य" शत्रुवधार्थं बलकरत्वेनोत्पन्नत्वात् बल-पुत्रस्य अतएव "महः" महतः तव "युज्या" योग्यानि† धनानि "आ वृणीमहे" सम्भजामहे ॥ २ ॥ २

३२ ४२ ३ ४२ ५ ३ २ ३२ ४२ ५
॥ ग्नैतम् ॥ आनोविश्वासु । हव्या३४ऊतीवा ।

१ २ १० ५ ५ १११ २२
आयिन्द्रएसम । त्सुभषता२३४ । ओईदा । उपब्रह्मा

१ २ १ ३ ५ १
णि । सावा२३ना । निवा२ । चा२३४हान् । परम

२ २ १ २ ६ ५२
ज्याआ३र्चा । ऊम्मायि । षा२मा२३४ऊतीवा ॥(१)

---

* ऋ० वे० ६, ९, १३, २ ।

† 'स्वामिनस्य कर्मा'—इति वि० ।

४ ३२ ४ ५२ ३ २ ३२ ४२ ५ १ २ २ १
परमज्याऋचो। षमा३४औहोवा। पारमज्याः। ऋचा

० ५ ५ १ १२ १२ २ १ २
यिषमा२३४। ओ६हा। त्वन्दाताम्र। थामो२३रा।

१ ३ ५ १ २ २ १
धसा२म्। आ२३४सो। असिसत्याई३शा। ऊम्मायि।

३ ५२ २० ३ ४ ३ ४२ ५२ ३ २
ना२की२३४औहोवा ॥(२) असिसत्यईशा। नका३४

३२ ४२ ५ १ २ २ १० ५ ५
औहोवा। आसिसत्यः। ईशानका२३४। ओ६हा।

२ १ २ १ २ १ ३ ५
तुविद्युम्नस्य। यूजा२३या। वृणा२यि। मा२३४हा

२ २ १ ३ ५२
यि। पुत्रस्यशावा३साः। ऊम्मायि। मा२हा२३४औ

२ ३ ५
हीवा। वा२३४सू(३)॥ २ *॥ [१]

॥ सदोविंशीयम्॥ २२ २ २ २ २ २
आनोविश्वासुहव्यमोहाओहा३

२ २ २ २ २ १ २१ २२ ३ २
ए। औहोओहो३वा। इन्द्रंसमत्सुभूषत। ओ३हा।

१ २ १ २२ १ २२ ३ २ १ २
उपब्रह्माणिसवनानिवृत्रहन्। ओ३हा। परामा१ज्या

* ऊ० मा० १०प्र० १ष० २मा०।

ऽ २ ऽ २ १ ऽ २ ऽ २
र्२: । ओ३ह्वा । ओ३ह्वा३ए । औ३होयि । औ३होइ

२ १र ३ ५र र १ र
वा । ऋचो । षा२मा२३४औहोवा ॥(१) परमज्याऋ

र र र र २ र र र २ १र
चीषमओह्वाओह्वा३ए । औहोओहो२वा । परमज्या

२र ऽ २ १ २र १र २ १र ४ ३र ऽ
ऋचीषम । ओ३ह्वा । त्वन्दाताप्रथमोराधसामसि । ओ

२ १ २ ऽ २ ऽ २ २
३ह्वा । असायिसा१त्या२: । ओ३ह्वा । ओ३ह्वा३ए ।

ऽ २ ऽ २ २ र १र ३ ५र र
ओ३ह्वोयि । औ३ह्वो३वा । ई३शा । ना२का२३४औहो

२ र र र र र २ र र र
वा ॥(२) असिसत्यईशानकृदोह्वाओह्वा३ए । औहोओहो

२ १ २ १ २ र र १ ऽ २ १ १ १
३वा । असिसत्यईशानकृत् । ओ३ह्वा । तुविद्युम्नस्यु

र २र र ऽ २ १ १ ऽ २
ज्यावृणीमहे । ओ३ह्वा । पुत्रास्या१शा२ । ओ३ह्वा ।

ऽ २ १ ऽ २ ऽ २ १ १
ओ३ह्वा३ए । औ३ह्वोयि । औ३ह्वो३वा । वसः । मा

३ ५र र २ र १ ३ १ १ १ १
२ह्वा२३४औहोवा । सदोविशा२३४५:(३) ॥ २० * ॥ [२] २

---

* ऊ० गा० १।१प्र० १अ० २०मा ।

अथ प्रत्नम्पीयूषमिति तृचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

३ २ ३ १ २ ३ उ १ क २ र
प्रत्नम्पीयूषमपूर्व्यंयदुक्थ्यं
३ २ ३ १ २ १ र २ र
महोगाहाद्दिवआनिरधुक्षत।
१ २ ३ १ र २ र ३ १ २
इन्द्रमभिजायमानꣳसमस्वरन्॥ १ *॥

"दिवः" द्युलोकात् तत्र स्थितैर्देवैः "पीयूषं" पातव्यं "प्रत्नं" पुराणं "यत्" सोमरूपमन्नम् "उक्थ्यम्" प्रशस्यमस्ति "पूर्व्यं" पुरातनं तत् सोमरूपमन्नं† "महः" महतः "गाहात्" गाहनात् "दिवः" द्युलोकात् "निरधुक्षत" आभिमुख्येन निदुहन्ति। ततः दुग्धं मिश्रम् "इन्द्रम्" "अभि" लक्ष्य "जायमानं" तं सोमꣳ "समस्वरन्" स्तोतारः संस्तुवन्ति॥

"प्रत्नं"-"दिवः"—इतिपाठौ॥ १॥

अथ द्वितीया।

१ ३ २ ३ १ १ ३ १ २
आदीङ्केचित्पश्यमानासआप्यं
३ १ २ ३ २ ३ क २ र
वसुरुचोदिव्याअभ्यनूषत।

---

* ऋ० वे० ७, ५, २३, २।

† 'पूर्व्यम्—अपूर्वम्'—इति वि०।

‡ 'अध्वरन्'—इति वि०।

३१८ २८ ३ १ २
दिवोनवार꣡ꣳसविताव्यूर्णुते ॥ २ * ॥

"आत्" अनन्तरं "पश्यमानासः" एनं पश्यन्तः "दिव्याः" दिवि भवाः "वसुरुचः" नाम केचित् "आप्य" बन्धुषु साधुम् "इमम्" एनं सोमम् "अभ्यनूषत अभ्यस्तुवन् । कस्मादनन्तरम् ? उच्यते—"दिवः" । "देवः" द्योतमानः "सविता" सर्वस्य प्रेरकः सूर्यः "वारम्" आवरकम् अन्धकार† "न व्यूर्णुते" नापगमयति‡ । तएनमस्तुवन् सूर्योदयात् प्रागेव हि सोमं स्तुवन्ति खलु ॥

"दिवोनवारं"-"वारन्नदेवः"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

२ ३ २ ३ १ २ ३ १ २
अधयदिमेपवमानरोदसी
३ १ ३ २ ३ १ २ ३ १ ३ २ १ २
इमाचविश्वाभुवनाभिमज्मना ।
३ २ ७ ३ १ २ ३ १ ८ २ ८
यूथेननिष्ठावृषभोविराजसि ॥ ३ ॥ ३

हे "पवमान" सोम ! "अथ" अनन्तर "यद्" यदा "इमे" "रोदसी" द्यावापृथिव्यौ "इमा" इमानि "विश्वा" विश्वानि

---

* ऋ० वे० ७, ५, २२, ६, ।

† "दिवः न वारं—द्युलोकस्य, वस्तं सविता व्यूर्णुते प्रच्छादयति न"—इति वि० ।

‡ ऋ० वे० ७, ५, २३, २ ।

"भुवना" भूतजातानि "च" "मज्मना" बलेन "वि राजसि" विशेषेण राजसि स त्वं तथा कुर्वन् ॥

"भवनाभिजन्मना"-"भुवनेषुविनिष्ठसे"—इति पाठो ॥ ३ ॥ ३

॥ यौधाजम् ॥ प्रत्ना३१म्। पौ२यू। षम्। पूर्व्या २३४याम्। यादू३। क्षियार२म्। मन्हो३४५। गा२ २३४न्हात्। दिवाअनायिः। अ। धुक्षता२। इन्द्रा३४ ५म्। आ२३४भी। जाया२। माना२म्। समा३ ४५। स्वा२३४राम्॥(१) आदा३१यिम्। का३यिचित्। प। श्यामा२३४ना। साआ३। पिया२म्। वन्ह३४५। रू२३४चाः। दिव्याअभायि। अ। नूषता२। द्रिवो३४ ५। ना२३४वा। रण्सा२। विता२। वियू३४५। णू२ ३४ते॥(२) अधा३१। याइदि। मे। पावा२३४मा। नारो३। दसी२। इमा३४५। चा२३४वायि। श्वाभ्

२१ २ १ २२२ ३ ५ २२
वना। भि। मज्मनार। यूथे३४५। ना२३४नीः। स्था

१ ३२ ३ ५
वा२। षभो२। विरा३४५। जा२३४सौ(३)॥ ६ *॥ [१]

५ २ ४२ ५२ २१२
॥ आमह्नीयवम्॥ प्रत्नम्यो३यूषम्पूर्व्यिाम्। यदूक्था

१ २ २ १२२ १
१या२म्। मह्नो२३गाद्दात्। दिवाअनायिः। अधू२

२ २२ १११
३न्ताउ। वा३। स्तोषे३४५(१)॥ ७ †॥ [२]

२ १ २ १ २ ३ ५
॥ ऐड़सौपर्णम्॥ इन्द्रमभोवा। जायामा२३४नाम्।

२१ २१ ७२ ३ ५
समास्वरान्। आदा२यिङ्का२३४यिवीत्। पा२ग्या।

१ १ २२ १ ५ ५ ५
मा२३ना। साआपियाम्। औ२३ द्योवा। द्यो५र्द्।

ङा(२)॥ ८ ‡॥ [३]

१ २ २ ५
॥ सत्रासाह्यीयम्॥ वस्व३४। रुचोदिव्याअ। भो

५ १२ २ १ १
ईवा। अनूषतद्दिवोजा२वा। रा२ए्सा। वा२३यि

---

* ऋ० मा० १०प्र० १अ० ४सा०।

† ऋ० मा० १३प्र० २अ० ७सा०।

‡ ऋ० मा० १३प्र० २अ० ८सा०।

२ १·६ २र ३र २ १ ५ ५
ता। वियौ३ह्वो। वाह्वा३४३यि। णू २ ३ ४ तो ६ ह्वा
यि(२) ॥ ८ * ॥ [४]

२ र र र र र २
॥ सदोविश्रीयम्॥ अधयर्दितपवमाओह्वाओह्वा३ए।
र र र २ १र २र १र २ ६ २
औह्वोओह्वोश्वा। नरोदसीइमाच्ववायि। ओ३ह्वा।
र १ २र १ २ १ र २र १र २ ६ २ र १ र
श्वाभुवनाभिमज्मनायूयेननायि। ओ३ह्वा। स्थावार्षा१
६ २ ६ २ २ ६ २ ६
भा२:। ओ३ह्वा। ओ३ह्वा३ए। औ३ह्वोयि। औ३
२ २ १र ३ ५र र २ र १ ३
ह्वो३दः। विरा। जा२सा२३४ओह्वोवा। सदोविश्रा
१ १ १ १
२३४५:(३) ॥ १० † ॥ [५]

४ ३ ४र ३र ४र ३ ४ ५ १ १ ३र
॥ उत्सेधम्॥ प्रत्नम्पीयूषम्पूर्व्यंयदु। क्थिया३४औ
४र ५ १ १र र २ ५
ह्वोवा। मह्वोगाह्वा३२त्। ह्वा३१उवा२३। ज३४पा।
३ २ ४ ५र ४ ५ १ २ १ २ १
दिवा३श्मना। ओह्वोवाह्वायि। आधुत्ता। इन्द्रमा

---

* ऋ० मा० १२प्र० २ब० ८सा०।

† ऋ० मा० १२प्र० २ब० १०सा०।

२ २ ५ ३र २ ४र ५र
भि। हा३१उवा२३। ऊ३४पा। जाया३मानम्। औ
४ ५ ३ २ ४ ३र ४र १र ४ १
होवाहायि। समा३स्वा५रा६५६न्॥(१) आदीङ्के चित्य
४ ५र र र ३ २ ३र ४र ५ २ १
ग्रभाना। सश्रा। पिया३४औहोवा। वसुरुचो३२।
२ ५ ३ २ ४ ५र ४
हा३१उवा२३। ऊ३४पा। दिव्या३श्रभा। औहोवा
५ १ २ १ २ र १ २ २
हायि। आनूषता। दिवोनावा। हा३१उवा२३। ऊ
५ १ २ ४ ५र ४ ५ १ २ ४
३४पा। र७साश्चिता। औहोवाहायि। वियू३र्णू५ता
३ ४ ३ ४५र ४५र र ३ २ ३र
६५६यि॥(२) अधयदिमेपवमा। नरो। दसा३४औ
४र५ २ १र २ ५
हावा। इमाचवा२यि। हा३१उवा२३। ऊ३४पा।
३र २ ४ ५र ४ ५ १ २ १ २र र
स्वाभू३वना। औहोवाहायि। भायिमश्मना। यूथे
१ २ २ ५ ३र २ ४ ५र
नानि। हा३१उवा२३। ऊ३४पा। स्वावा३र्षभः। औ
४ ५ ३ २ ४ ३ १ १ १
होवाहायि। विरा३जा५सा६५६यि। ऊ२३४
५(३)॥ ११ * ॥[६] ३

---

* ऊ० गा० १३प्र० २ष० ११सा०।

इममूष्विति त्रृचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

३ २ १ २ उ २ १ १ ३ १ २ ३ १ र २ र
इममूषुत्वमस्माकꣳसनिङ्गायत्रन्त्र्याꣳसम्।

१ १ १ २ ३ १ २
अग्नेदेवेषुप्रवोचः॥ १ *॥

हे अग्ने! "त्वम्" "अस्माकम्" अस्मत्सम्बन्धिनम् "इमम् उ सु" पुरोदेशेऽनुष्ठीयमानमपि "सनिं" दक्षिणां "नव्यांसं" नवतरं "गायत्रं" स्तुतिरूपं वचोऽपि "देवेषु" देवानामग्रे "प्र वोचः" प्रकर्षेण ब्रूहि॥ १॥

अथ द्वितीया।

३ १ २ ३ १ २ ३ १ २ ३ २
विभक्तासिचित्रभानोसिन्धोरूर्म्माउपाकया।

१ २ ३ १ १
सद्योदाशुषेक्षरसि॥ २ †॥

हे "चित्रभानो" विचित्र-रश्मि-युक्ताग्ने! "विभक्ता" विभिष्टस्य धनस्य प्रापयिता "असि" भवसि। तत्र दृष्टान्तउच्यते— आकारउपमार्थीयः। यथा "सिन्धोः" नद्याः "उपाके" समीपे "ऊर्मा" ऊर्मिं [तरङ्गोपलक्षितं कुल्यादिरूपं प्रवाहं विभजन्ति

---

* ऋ० वा० १, १, ३, ८ (१भा० ११६पृ०)=ऋ० वे० १, १, २२, ४।

† ऋ० वे० १, १, २३, १।

तद्वत्*] "दाशुषे" हविर्दत्तवते यजमानाय "सद्यः" सद्य तामेव "धरसि" कर्म-फल-भूमौ वृष्टिं करोषि॥ २॥

अथ तृतीया।

१ ३१८ २८ ३ १२
आनोभजपरमेष्वावाजेषुमध्यमेषु।

२ ३१ ३१ १
ग्निष्टावस्योअन्तमस्य॥ ३†॥ ४

हे अग्ने! "परमेषु" उत्कृष्टेषु द्युलोक-वर्त्तिषु "वाजेषु" अन्नेषु "नः" अस्मान् "आ भज" सर्वतः प्रापय। "मध्यमेषु" अन्तरिक्ष-लोकवर्त्तिषु वाजेषु आभज। अन्तमस्य" अन्तिकतमस्यच भू-लोकस्य सम्बन्धीनि "वसवः" वसूनि "ग्निष्ट" देहि¶॥ ३॥ ४

अहमिद्धीति तृचात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा।

३१८ ३१८ १८३१ ३१११३१२
अहमिद्धिपितुःपरिमेधामृतस्यजग्रभ।

३१८ २८
अहःसूर्यइवाजनि॥ १§॥

---

* 'सिन्धोरूर्मा—समुद्रस्योर्मिसदृशाते'—इति वि०।

† ऋ० वे० १, १, २२, ५।

‡ 'अन्तमस्य—प्रधानभूतस्य'—इति वि०।

¶ 'ग्निष्ट—यद्यपि ग्निष्टशब्दो तथापच दानार्थो दृश्यः, ददस्व'—इति वि०।

§ ऋ० भा० १, १, १,८ (१भा० १५१पृ०)=ऋ० वे० ४, ८, १०, ५।

"पितुः" पालकस्य "ऋतस्य" "सत्यस्य" अवितथस्य इन्द्रस्य "मेधाम्" अनुग्रहात्मिकां बुद्धिम् "अहमित्" अहमेव "परि जग्रह" परिगृहीतवान् "हि" यस्मादेवं तस्मात् "अहं सूर्यइवाजनि" सूर्यो यथा प्रकाशमानः सन् प्रादुर्भवति तथाजनिषम् प्रादुरभुवम् ॥

"जग्रह"-"जग्राह"—इति पाठो ॥ १ ॥

अथ द्वितीया।

२ २ २२ २ १ २ २ १ २ ३ १
अहम्प्रत्नेनजन्मनागिरःशुम्भामिकण्ववत्।
२उ १ १ १ २ २ १
येनेन्द्रःशुष्ममिद्धधे ॥ २ * ॥

"कण्ववत्" कण्ववदृषिः† अहमपि "प्रत्नेन" चिरन्तनेन "जन्मना" "गिरः" इन्द्र-विषयाणि स्तोत्राणि "शुम्भामि" अलङ्करोमि‡। येन स्तोत्र-समूहेन "इन्द्रः" "शुष्मं" शत्रूणां शोषकं "इधत्" धत्तएव धारयत्येव यत् स्तोत्र मिन्द्रे ईदृशं बलमवश्यं जनयति तत् स्तोत्रमलङ्करोमीत्यर्थः ॥

"जन्मना"-"मन्मना"—इति पाठो ॥ २ ॥

---

* ऋ० वे० ५, ८, ११, १।

† 'कण्वः अस्य मन्त्रस्य द्रष्टा'—इति वि०।

‡ 'शुम्भामि—शोभयामि'—इति वि०।

अथ तृतीया।

१२ २२३ २ ३ १२ २२ १ १ ३ २
येत्वामिन्द्रनतुष्टुवुर्ऋषयोयेचतुष्टुवुः।
१२ २२ ३ १ २
ममेदुग्रुस्वसुष्टुतः॥ ३ *॥ ५

हे "इन्द्र!" "ये" जनाः "त्वां" "न तुष्टुवुः" न स्तुवन्ति "ये च ऋषयः" मन्त्राणां द्रष्टारः जनाः "तुष्टुवुः" त्वां स्तुवन्ति उभयेषां मध्ये "ममेत्"† ममैतत्स्तोत्रेण "सुष्टुतः" शोभनं स्तुतः सन् "वृत्रस्व" हन्ता भव॥ ३॥

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य चतुर्दशस्याध्यायस्य प्रथमः खण्डः॥ १॥

अथ द्वितीय-खण्डे—

अग्नेविश्वेभिरितिऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१ २ १ २ २ २ ३ १ ३ १ १
अग्नेविश्वेभिरग्निभिर्ज्जीषिन्ब्रह्मसद्कृत।
१ २ ३ २ ३ २ २ ३ १ २ ३ १ २
येदेवत्रायआयुषुतेभिर्नोमह्यागिरः॥ १ ‡॥

---

* ऋ० वे० ५, ८, ११, २।

† 'इत् इति पदपूरणः'—इति वि०।

‡ न ब्राह्मण्यंवोपलभ्यतरयृचक्।

हे "सहस्कृत" सहसा बलेन कृत उत्पादित* हे अग्ने ! "विश्वेभिः" विश्वैः सर्वैर्यष्टव्यतया स्थितैरग्निभिः सह "नः" अस्माभिः क्रियमाणं स्तोत्रं हवीरूपमन्नं वा "जोषि" जुषस्व किञ्च "ये देवत्रा" ये अग्नयः देवेषु वर्त्तन्ते ["देवमनुष्येति (५,४,५६) सप्तम्यर्थे त्रा-प्रत्ययः] "य आयुषु" ये वाग्नयो मनुष्येषु वर्त्तन्ते "तेभिः" तैः सर्वैः अग्निभिः सह "नः" अस्माकं "गिरः" स्तुति लक्षणा वाचः "महय" पूजय ॥ १ ॥

अथ द्वितीया।

१र २र ३१ १३१र २र३ ११
प्रसविश्वेभिरग्निभिरग्निःसयस्यवाजिनः।

१२ ३ २३२उ ३२उ ३ १२
तनयेतोकेअस्मदासम्यङ्वाजैःपरीवृतः† ॥ २ ‡ ॥

"यस्य वाजिनः" यस्याग्नेर्वाजिनः हविर्लक्षणान्नवन्तः अनेके यष्टारः सन्ति "सः अग्निः" "विश्वेभिः" विश्वैः सर्वैर्यष्टव्यतया स्थितैरग्निभिः "सः" [एकस्याच्छब्दोऽनुवादः] "अस्मत्"—इति अस्मासु [सुपां सुलुक् (६, १, ३९)—इति सप्तम्या लुक्, आङोरुपसर्गयोः अवर्णादुचित-क्रियाध्याहारः] "आ" गच्छतु। "सम्यङ्" यथावत्कालातिक्रमेणेत्यर्थः। कथम्भूतः ? "वाजैः परिवृतः" वाजैरस्मभ्यं दातव्यैरन्नैः परिवृतः परिवेष्टितः सहित इत्यर्थः। न केवल मस्मास्वेव यज्ञादि-सिध्यर्थमन्नैः परिवृतोऽग्नि-

* 'सहस्कृतः—बलस्य कर्त्तरि'—इति वि०।

† "परिवृतः"—इति ख० पु० पाठः।

‡ इयमपि न काण्वस्यैवोपलभ्यते।

रागच्छतु किन्तर्हि ? "तनये" अस्मत्पुत्रे आगच्छतु। न केवलं पुत्रे "तोके" पुत्र-पुत्रे दातव्यैर्वाजैः परिप्लुतोऽग्निरागच्छतु। इति परोक्ष-कृत्या अग्निः स्तूयते अस्मदग्रे चाग्नि-साध्य-क्रियासु-परमः प्रार्थ्यते ॥ २ ॥

अथ तृतीया।

१ १ २ १ ३ १ १ २ १ १
त्वन्नोअग्नेऽग्निभिर्ब्रह्मयज्ञञ्चवर्द्धयः।

१ १ ३ १ २ २ १ २ २
त्वन्नोदेवतातयेरायोदानायचोदय* ॥ ३ † ॥ ६

हे "अग्ने !" "त्वम्" "अग्निभिः" त्वद्विभूतिभिः भूतैरन्यैरग्निभिः सार्द्धं "नः" अस्माकं "ब्रह्म" स्तोत्रं "यज्ञं च" "वर्द्धय"। तथा "त्वं" "नः" अस्माकं "देवतातये" [यज्ञनामैतत् (निघ० ३, १७, १०) यागार्थं "रायः" धनस्य "दानाय" प्रदानाय "चोदय" दातॄन् प्रेरयः ‡ ॥ ३ ॥ ६

अथ त्वेसोमेति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१ १ २ १ ३ १ १ २ १ २
त्वेसोमप्रथमावृक्तबर्हिषोमदे

१ २ १ २ ३ १ २
वाजायअवसेधियन्दधुः।

---

* "चोदयन्"—इति च० पु० पाठः।

† ऋ० वे० ८, ७, १९, ५।

‡ 'यथा मम धनं प्रदीयते तथा कुरु'—इति वि०।

१२ १२ १क १२
सत्वन्नोवीरवीर्य्यायचोदय ॥ १ * ॥

हे "सोम!" "प्रथमाः" पुरातनाः [यद्वा, यष्टव्यत्वेन सर्वेषां जनानां मुख्याः "वृक्तबर्हिषः" वृक्तं छिन्नं बर्हिर्येर्यज्ञार्थमिति वृक्तबर्हिषः यजमानाः "महे" महते "वाजाय" बलाय "श्रवसे" अन्नाय च "धियं" बुद्धिं "त्वे" त्वयि "दधुः" निहितवन्तः, तस्मात् हे "वीर" समर्थ सोम! तादृशः "त्वं" "नः" अस्माकमपि सङ्ग्रामे "वीर्य्याय" सामर्थ्याय "चोदय" प्रेरय† [यद्वा, 'वीर्य्याय' वीरपुत्राय भवाय 'नः' अस्मान् प्रेरय] ॥ १ ॥

अथ द्वितीया।

१ १२ १ १२ १२ १ १ २
अभ्यभिधिश्रवसाततर्दिथोत्

१ १२ २२ १ १ १ २
सन्नकष्विज्जनपानमञ्जितम्।

१ १ १ १२ १२ १ १ २
ग्रभ्यर्याभिर्नभरमाणोगभस्त्योः ॥ २ ‡ ॥

हे सोम! त्वं "श्रवसा" अन्नेन हेतुना "अभ्यभि ततर्दिथ हि" पवित्रमभिक्षरसवानसि¶। तत्र दृष्टान्त-दयम्—"उक्थं न"

---

* ऋ० वे० ७, ५, २३, १।

† 'यथास्माभ्यं वीर्यं सनोति'—इति वि०।

‡ ऋ० वे० ७, ५, २२, ५।

¶ 'अभि अभि—उपर्युपरि, धि—इति पदपूरणः, श्रवसा—अन्नेन यशसा वा, ततर्दिथ—अ.ताडने विदारणे वा, अन्नेन यशसा वोपर्युपरि ताडय विदारय वा'—इति वि०।

यथा "कञ्चित्" "जनपानम्", अस्मिन् जना उदकं पिबन्ति, तम् "अचितम्" अक्षीणं कञ्चित् कञ्चन "उत्सम्" उत्सरणशीलं वाप्यादिकमभिलषन्ति* यथा वा कश्चित् "गभस्त्योः" बाह्वोः† "अर्य्याभिः अङ्गुलीभिः‡ "भरमाणः" उदकं सम्भरन् कञ्चिदभिलषन्ति तद्वत् ॥ २ ॥

अथ तृतीया।

१ २ ३ ३ १ २ ३ २
अजीजनोऽमृतमर्त्यायक

१ २ ३ १ २ ३ १ २ ३ १ २
मृतस्यधर्म्मन्नमृतस्यचारुणः।

१ २ ३ २ १ २ ३ १ २
सदासरोवाजमच्छासनिष्यदत् ॥ ३ ¶ ॥ ७

कस्याणस्य "अमृतस्य" उदकस्य "धर्म्मन्" धारकेऽन्तरिक्षे "कं" सुखं "मर्त्याय" मनुष्यार्थम् "अजीजनः" किञ्च "सनिष्यदत्" सम्भजत् देवान्। स त्वम् "वाजम् अच्छ" सङ्ग्रामम् अभिलक्ष्य "सदा" "असरः" सरसि गच्छसि ॥

"मर्त्यायकं"-"मर्त्येषु"—इति पाठो ॥ ३ ॥ ७

---

* 'उत्सं' भ—उत्सो भक्षणीयः, उत्समिव भक्षणीयं, कञ्चित्—किमपि भक्षणीयं द्रव्यं, जनपानम्—बहुतं—प्रभूतम्'—इति वि०।

† 'गभस्त्योः—आदित्यरश्मयः'—इति वि०।

‡ 'अर्य्याभिः—कर्मभिः'—इति वि०।

¶ ऋ० वे० ७, ५, २२, ४।

॥ यौधाजयम् ॥ तुवे३१। सो३म। प्र। थामा२३ ४वा। क्षावा३। क्षिषो२। मन्हे३४५। वा२३४जा। यश्रावसायि। धि। यन्द्धू२:। सत्वा३४५। नो२३ ४वी। रवा२पि। रिया२। यचो३४५। दा२३४या ॥(१) अभा३१यि। आ३भि। हि। श्रावा२३४सा। नाता ३। दिथा२। उत्सा३४५म्। ना२३४काम्। चिज्जा नपा। नम्। अस्तिता२म्। शर्ध्या३४५। भा२३४ यिर्नाभरा२। माणा२:। गभा३४५। स्त्री२३४यो: ॥(२) अजा३१यि। जा३नो। अ। मार्त्ता२३४मा। तीया३। यका२म्। कृता३४५। स्वा२३४धा। मन्नामृता। स्व। चारुणा२:। सदा३४५। सा२३४रा:। वाजा २म्। आक्षा२। सना३४५यि। ष्या२३४दात्(३) ॥६*॥[१]

* ऊ० मा० १०प्र० २अ० ६मा०।

॥ दैर्घश्रवसम् ॥ त्वेसोमप्रथमावृदोद्धावृगोद्धाओहा
३ए। क्रत्वा२र्द्धिषोमद्देवा२जा। ओ३द्धा। ओ३हा३
ए३४। यआ३४वसायि। धायिन्द। धुःसात्वन्नोवायि३
ओ३हा। ओ३हा३ए३४। रवा३४यिरिया३। यचो२३
४वा। दा५योर्द्धायि ॥(१) अभ्यभिद्धिश्रवसाओहाओ
द्धा३ए। तता२र्द्धिथोत्सन्ना२का। ओ३हा। ओ३हा
३ए३४। चिज्जा३४नपा। नामद्धि। तंग्राम्यांभिन्ना।
ओ३द्धा। ओ३द्धा३ए३४। भरा२४माणा३ः। गभो२
३४वा। स्ता५योर्द्धायि ॥(२) अजीजनोअमृतमओद्धा
ओद्धा३ए। तिया२यकमृतस्या२धा। ओ३द्धा। ओ
३द्धा३ए३४। मन्ना३४। मृता। स्वाचारु। णःसादा
सराः। ओ३हा। ओ३द्धा३ए३४। वाजा३४मच्छा३।
सनो२३४वा। ष्या५दोर्द्धायि(३) ॥ ७ * ॥ [२] ७

* ऋ० मं० १०प्र० १ष० ७सा०।

अथैन्द्रमिन्द्रायेति ऽचाभकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ १ २ ३ १ २ ३ १ २ २
एन्दुमिन्द्रायसिञ्चतपिबातिसोम्यम्मधु।
१ २ २ ३ २
प्रराधाꣳसिचोदयतेमहित्वना ॥ १ * ॥

हे ऋत्विजः! "इन्दुं" स्यन्दनशीलं सोमम् "इन्द्राय" इन्द्रार्थम् "आ सिञ्चत" आश्रयण-द्रव्येणासेचनं कुरुत अभिषुणुतेत्यर्थः। ततः "सोम्यं" सोममयं "मधु" मदकरं सोमरसं "पिबाति" पिबतु। पीत्वा च स इन्द्रः महित्वना स्व-महत्वेनैव "राधांसि" धनानि स्तोतृभ्यः "प्र चोदयते" प्रकर्षेण चोदयते प्रेरयति॥

"प्रराधांसि"-"प्रराधसा"—इति पाठो, "चोदयते"-"चोदयाते"—इति च॥ १॥

अथ द्वितीया।

१ २ १ २ २ ३ ३ १ २ ३ १ २
उपोहरीणाम्पतिꣳराधःपृञ्चन्तमव्रवम्।
३ १ २ २ ३ २ १ २
नूनꣳसुधिस्तुवतोअश्वस्य ॥ २ † ॥

---

* ऋ० सा० ४, २, ५, ६ (१भा० ७८पृ०) = ऋ० वे० ६, २, १०, २।

† ऋ० वे० ६, २, १०, ४।

"हरीणां" हरित-वर्णानाम् अश्वानां "पतिं" पालयितारं "राधः" धनं "पृचन्तं" [पृची सम्पर्के (अदा० आ०)] स्तोतृषु संयोजयन्तं ददतमित्यर्थः । एतादृशमिन्द्रम् "उपो* अब्रवम्" अतिशयेनाहं स्तोत्रं करवाणि "अखस्य" अखो नामर्षिरख-शब्देनोच्यते तस्य पुत्रस्य स्तुवतः स्तोत्रं कुर्वतः मम सम्बन्धिनीं हे इन्द्र ! त्वद्विषयां स्तुतिं "नूनं" सम्प्रति "सुधि" शृणु ॥

"राधः"-"दत्तम्"—इति पाठो ॥ २ ॥

अथ तृतीया ।

२ २ ३ २ १ १ ३ २ ३ १ २ २ २
नच्चाऽऽऽङ्गपुराचनजज्ञेवीरतरस्त्वत् ।

१ २ ३ २उ १ २ ३ १ २
नकीरायानैवथानभन्दना ॥ ३ † ॥ ८

हे इन्द्र ! "त्वत्" त्वत्तः "पुरा" पूर्वं "वीरतरः" सामर्थ्यवान् कश्चित् "न हि जज्ञे" न जातः खलु "अङ्ग" प्रसिद्धौ त्वमेव सामर्थ्यवान् जातइत्यर्थः । किञ्च त्वत्तोऽपि "राया" धनेन समर्थः "न किः" न कश्चिदस्ति । तथा "एवथा" अनुपुराणि सङ्ग्रामं वा प्रतिगमनेन त्वत्तोऽधिको न जातः [यद्वा, एवथा—अव रक्षणादिषु (भ्वा० प०) अकारस्येकारश्छान्दसः, औणादिकस्थाप्रत्ययः ; शरणागतानां स्तोतॄणां वा अवने त्वत्तोऽधिको नास्ति ।

---

* 'उप उ इति पादपूरणे'—इति वि० ।

† ऋ० ३० ६, १, १७, ४ ।

किञ्च "भन्दना" [भन्दति स्तुतिकर्मा (निघ० ३, १४, १८)] स्तुत्यश्च त्वदधिको न जातः* न वाऽभद्रवक्तः स्तुत्यश्च त्वत्तोऽन्यो जन्मनीति ॥ ३ ॥ ८

॥ मारुतम् ॥ एऽ५दुमि । द्राऽ३या३सिञ्चता । पि
बा २तिसोम्यम्मधु । प्रराधा२३एसी । चोदनयायिमा३
हो । त्वना । औ३होवा ॥(१) जऽ५पोष । रा३यिणा
३म्यतायिम् । राधा २ःपृच्चन्तमव्रवम् । नून९पू२३र्वी ।
स्तुवतीधाऽस्वी३या । स्वा । औ३होवा ॥(२) माऽ५घि
य । गा३पूरराधना । जम्मे २वीरतरत्वत् । नकीरा२३
या । मेवयामाऽमा । दमा । औ३होवा । पोपूई ।
डा(३) ॥ ८ ॥ ३ [१] ४

* 'भन्दना—वर्तमानापि पूजा न भवति'—इति वि० ।
† ऋ० मा० १० प्र० २ अ० ८ वा० ।

अथ नदंवदृति चतुर्थसूक्ताकिमीषा।

१ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १
नदंवओदतीनान्नदंयोयुवतीनाम्।

१ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १
पतिंवोअघ्न्यानान्धेनूनामिषुध्यसि॥ १ * ॥ ९

"ओदतीनाम्" ओदत्यः उषसः ['ओदती'-'भासती'—इति निघण्टुषु पाठात् (निघ०१,८,३-४)] तासां "नदम्" उत्पादकमित्यर्थः [इन्द्रेण हि उषस उत्पाद्यन्ते इन्द्रस्यैव सूर्यत्वात्, द्वादशादित्य-मध्ये इन्द्रः पठितः]। तादृशमिन्द्रं हे यजमानाः! "वः" युष्मदर्थम् आह्वयामि "अघ्न्यानाम्" अहन्तव्यानां गवां "पतिम्" आह्वये। अथ प्रत्यक्षकृतः—हे यजमानाः! "वः" यूयं "धेनूनां" क्षीरादिना प्रीणयित्रीणां गवाम् "इषुध्यसि" अन्नमिच्छसि॥ १ ॥ ९

१ २ १ १ २ १
॥ ध्यम्॥ नदंवओ२द। तीनावा। नदंयोयू।
१ २ १ १ २ १ २ १ २ १ २ १ २ १ २ १ २ १ २
वतीनाम्। पतिंवोअघ्न्यानान्धेनूनामि। षू२३। ध्य
२ १ २ १ १ १
साउवा। ऊधिया२। ए२इधिया३४३। ओ२३४५ई।
१ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १ १
हा(१)॥ ११ * ॥ [१] ९

इति सामवेदार्थप्रकाशे उत्तरार्चस्य चतुर्दशस्याध्यायस्य द्वितीयः खण्डः॥ २॥

---

* इषुध्यसि—इच्छसीत्यर्थः—इति वि०।

† ऋ० मा० १०म० १स० ११मा०।

अथ तृतीय-खण्डे—

देवोवोद्रविणोदाइति प्रगाथात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१ १ १ १ २ २ ११ १ १ १२
देवोवोद्रविणोदाःपूर्णांविवष्ट्वासिचम्।

११ २१ १ १२ १ १२ १२ २१ १
उद्वासिञ्चध्वमुपवापृणध्वमादिद्वोदेवओहते॥ १ *॥

"द्रविणोदाः" धनानां दाता "देवः" अग्निः "वः" युष्मदीयां "पूर्णां" हविषा "आसिचम्" आसिक्तं स्रुचं "विवष्टु" कामयताम् "उत्सिञ्चध्वम् वा" सोमेन पात्रम्, "उप पृणध्वम् वा" सोमम् [वा शब्दौ समुच्चयार्थौ ध्रुव-ग्रहेण होतृ-चमसं पूरयत च अग्नये सोमं यच्छत वेत्यर्थः]। "आदित्" अनन्तरमेव "देवः" अग्निः "वः" युष्मान् "ओहते" वहति॥

"विवष्टु"-"विवष्टि"—इति पाठौ॥ १॥

अथ द्वितीया।

१२ २२ १ १ १ १ १ १ १ १ १
तएषोमारमध्वरस्यप्रचेतसंवह्निन्देवाअकृण्वत।

११ १ १ १ १ १ १ १ १ १२ १२ १ १ १
दधातिरत्नंविधतेसुवीर्यमग्निर्जनायदाशुषे॥२†॥१०

---

* ऋ० मा०१, २, १, १ (१मा० १८४ ऋ०)—ऋ० वे० ४, २, २२, ४।

† ऋ० वे० ४, २, २२, ५।

देवाः "प्रचेतसं" प्रकृष्टमतिं "तम्" अग्निम् "अध्वरस्य" यज्ञस्य "वह्निं" वोढारं "होतारं"* च "अकृण्वत" अकृण्वन् किमर्थमित्यत्राह—स च "अग्निः" "विधते" परिचरते "दाशुषे" हविषां प्रदात्रे "जनाय" "सुवीर्यं" शोभन-वीर्योपेतं "रत्नं" रमणीयं धनं "दधाति" दधात्विति ॥ २ ॥ १०

॥ यज्ञायज्ञीयम् ॥ देवोऽवः। द्राऽवाऽविणोदाः। पूर्णाविवा। ष्टुऽआसीऽचाम्। उद्दाऽसिच्चध्वमुपा। वा पाऽर्णा। ऊम्मायि। धूऽवाम्। आदिद्देवेभ्योऽच ताउ ॥(१) आदायित्। वोदायि। वाऽओचाऽनायि। तऽचोऽतारमध्वरं। स्यप्राऽर्चे। ऊम्मायि। ताऽ साम्। वाङ्निन्देवाऽअकारण्वंताउ ॥(२) वाङ्गोम्। दा यिवाः। आऽकाण्वाऽना। दधाऽतिरत्नविधः। तेऽर्ष्वा। ऊम्मायि। राऽयाम्। आग्निर्जनायदाऽग्नु षाउ(३) ॥ १२ † ॥ [१]

* "ऋत्विजमाजानारम्"—इति वि०।

† ऋ० मा० १०म० १च० ११सा०।

॥ कण्वरथन्तरम् ॥ देवोवोद्रविणोदाः। पूर्णां वि
वा। ष्टुऽआसीऽचाम्। उदासिञ्चध्वमुपवापृणध्वा २ ३
४मैघी। आदिद्धो२३४दे। वओ३आउवा२३। ए३।
क्तआ ॥(१) आदिद्धोदेवओक्तायि। ताऽएघोताऽरा
म्। अध्वरस्यप्रचेतसा२३४मैघी। वक्रिन्दा२३४यिवाः।
अका३१उवा२३। ए३। एवतआ ॥(२) वाक्रिन्देवाअक्र
एवता। दाऽधाताऽयिरा। त्न विधतेसुवीरिया२३ ४मै
घी। अग्निर्ज्जी२३४ना। यदा३१उंवा२३। ए३। प्रुष
आ(३) ॥ ७ * ॥ [२] १०

अदर्शीति ष्टचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

अदर्शिगातुवित्तमोयस्मिन्व्रतान्यादधुः।
उपोषुजातमार्यस्यवर्द्धनमग्निन्नक्षन्तुनोगिरः ॥ १ † ॥

---

* ऋ० मा० १२म० १अ० ७खा०।

† ऋ० खा० १, १, ५, १ (१मा० १७१ ऋ०)—ऋ० वे० ५, ७, १२, १।

"यस्मिन्" अग्नौ "व्रतानि" कर्माणि "आ दधुः" यजमानाः आहितवन्तः "मातुवित्तमः" अतिशयेन मार्गाणां ज्ञाता; सोऽग्निः "अदर्शि" प्रादुरभूत्। किञ्च "सुजातः" सम्यक् प्रादुर्भूतम् अस्य "आर्यस्य" उत्तम वर्णस्य "वर्धनं" वर्धयितारम् "अग्निं" "नः" अस्माकं "गिरः" स्तुति-रूपा वाचः "उपो दक्षन्तु" उपगच्छन्तु [नक्ष गताविति (भ्वा० प०) धातुः ॥

"नक्षन्तु"-"नक्षन्त"—इति पाठो ॥ १ ॥

अथ द्वितीया।

१ १ १ १ २ १ १ २ १ १ २ १

यस्माद्रेजन्तक्रुष्टयश्चर्क्त्यानिक्रृण्वतः।

१ २ १ १ १ २ १ १ २ १ २ १ १

सहस्रसामेधसातावित्मनाग्निंवो भर्नमस्यत ॥२*॥

"यस्मात्" कारणात् "चर्क्त्यानि" कर्त्तव्यानि कर्माणि "क्रृण्वतः" कुर्वाणान् मनुष्यान् "क्रुष्टयः" इतर-मनुष्याः "रेजन्त" कम्पन्ते,† तस्मादिदानीं हे मदीया जनाः! यूयं "सहस्रसां" गवां धनानां सहस्रस्य दातारमग्निंः"मेधसातौ" यज्ञे "धीभिः" कर्त्तव्यैः कर्मभिः "जना" आत्मनैव "नमस्यत" परिचरत ॥

"नमस्यत"-"सपर्यति"—इति पाठो ॥ २ ॥

---

* ऋ० ३० १, ७, १२, १।

† 'रेजन्त—राजन्ते वं द्रवन्त'—इति वि०।

‡ 'चर्क्त्यानि—चर्क्य-चयितानि कार्याणि'—इति वि०।

अथ तृतीया।

१८ १८ १ १
प्रदैवोदासोअग्निः॰ ॥ ३ ॥ ११

"दैवोदासः" दिवोदासेनाह्रियमानोऽग्निः "मातरं" सर्वस्य धारणवत्त्वात् पृथिवीं "अनु" प्रति "न" "प्र विवाहते" देवान् प्रति हविर्वोढुं विशेषेण न प्रवर्त्तयति, तस्मादेनं मन्त्रि दिवोदासो "मन्मना" वचनेन आजुहाव। तस्मादयमग्निं "नाकस्य" स्वर्गस्य "देवः" द्योतमानः "मन्द्रः" परमैश्वर्य-युक्तः "धर्मणि" गृहे स्वायतने एव "तस्थौ" अतिष्ठत् ॥ ३ ॥ ११

॥ यज्ञायज्ञीयम् ॥ अदाऽऽग्निं। गाःतूःइविष्मामाः।
यास्मिन्व्रता। नौःआदाःधूः। उपो२षुजातमा। यस्या
२३वा। ऊम्मायि। धाःनाम्। आग्निन्नःशन्तनो२गि
राउ॥(१) राया। स्याद्रेजन्तःकृष्टयश्चर्क्रत्या। नौःका
र्वाःना। सदा२ःसस्मिधसा। तावाःइयिवा। ऊ
म्मायि। ह्वाःना। आग्निन्धीभिर्नमाःस्यताउ॥(२) ता
प्रा। दैवोदासोअग्निर्देवइन्द्रो। नाः३ माया३ ना।

१० २ १ २ १ १ २ २
अनू२मातरम्पृथि। वीवा२३यिवा। ऊम्मायि। वा३र्त्ता
१ २ २ ३ १ १ १ १
यि। तास्थौनाक्स्यशा२र्म्मणाउ। वा३४५(३)॥ १३*॥ [१]

४ ३ ४ २ ४ ५
॥ यज्ञायज्ञीयम्॥ प्रदै५वः। दा३सो३ग्नायिः।
१ २ १ १ २ ५ २ १
दायिवइन्द्रो। ना३माघ्वा३ना। अनू२मातरम्पृथि।
२ १ १ १ २ १ २ २
वीं वा२३पिवा। ऊम्मायि। वा३र्त्तायि। तास्थौनाक
३ २ १ १ १ १ २ २
स्यशा२र्म्मणाउ॥(१) णाया। स्राद्रे जन्तऊष्टयस्यर्क्त्या।
२ १ २ १ १ १ २ २ २ १
नौ३काएर्वा३नाः। मद्वा२स्वसांमेधसा। तोवा२३यिवा।
१ २ २ १ २ ३ २
ऊम्मायि। त्मा३ना। आग्निन्धीभिन्नमा२स्यताउ॥(२)
१ २ १ २ २ १ १ २ १
ताआ। दर्शिगातुवक्तमोयस्मिन्व्रता। नौ३आदा३ध्रः।
१ १ २ २ १ २ १
उपो२षुजातमा। र्यस्या२३वा। ऊम्मायि। धा३नाम्।
१ ३ २ १ १ १
आग्निन्नन्तुनो२गिराउ। वा३४५(३)॥ ४†॥ [२]

---

* ज० मा० १०प्र० २अ० १२सा०।

† ज० मा० ११प्र० २अ० ४सा०।

॥ अभिनिधनंकाण्डम् ॥ औहोहोहायि। आयिहो।
आदा। शो२३४गा। तूविस्ता२३४माः। यास्मिन्ना२
३४ता। नोयादधूः। ऐहोयि। आ२३४यिहो। ऊ
षो२३४जा। तामारो२३४या। स्यावर्ष्टनाम्। ऐहो
यि। आ२३४यिहो। आग्निन्ना२३४त्ता। तुनो३गा५यि
रा६५६ः ॥(१) औहोहोहायि। आयिहो। यास्मात्।
रे२३४जा। ताक्रष्टा२३४याः। चार्का२३४र्त्या। नोक्र
ण्वताः। ऐहोयि। आ२३४यिहो। साचस्ता२३४साम्।
मायिधासा२३४ताउ। ईवत्मना। ऐहोयि। आ२३४
यिहो। आग्निन्धो२३४भीः। नमा३स्या५ता६५६ ॥(२)
औहोहोहायि। आयिहो। प्रादे। वो२३४दा। सो
आ२३४यायिः। दायिवा आ२३४यिन्द्रो। नामम्मना।

२ २ १ ३ ५ २ ३ २ ३ ५ २ ३
ऐद्वोयि। आ२३४यिद्वो। आनूमा२३४मा। राम्पथी२३

५ २ २ १ २ २ १ ३ ५ २
४वीम्। वीवावृतायि। ऐद्वोयि। आ२३४यिद्वो। ता

३ ५ ३ २ ४
स्त्वोना२३४का। स्यग्राऽर्मापूणा६५६यि(३) ॥ २* ॥ [३] ११

अथाग्नआयूंषि-ऋचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

२ १ १ २
अग्नआयूंषिपवसे० ॥ १† ॥

—इति प्रतीकमिदम्। सा चान्यत्रान्नाता (२भा० ३३५पृ०) ॥ १ ॥

अथ द्वितीया।

३ २उ ३ १ २ २ १ २ ३ १ २
अग्निर्ऋषिःपवमानःपाञ्चजन्यःपुरोहितः।

१ २ ३ २
तमीमहेमहागयम् ॥ २‡ ॥

"पाञ्चजन्यः" निषाद-पञ्चमाश्चत्वारो वर्णाः पञ्चजनाः, [यद्वा, गन्धर्वाः पितरो देवाः असुराः रक्षांसीत्येतत् पञ्चजनाः, अथवा

---

* ऊ० गा० २३प्र० ३च० २सा०।

† ऋ० सा० ६, ३, १०, ३ (२भा० ३३५ पृ०)=ऋ० वे० ७, २, १०, ३।

‡ ऋ० वे० ७. २. १०. ४।

देव-मनुष्य-गन्धर्वाप्सरसः सर्पाः पितर इति ब्राह्मणाभिहिताः पञ्चजनाः। "गभीरात् अः (४, ३, ५८)"—इत्यत्र "बर्हिर्देव पञ्चजनेभ्य इति वक्तव्यम्(भा० वा०)"—इति वचनात् अ-प्रत्ययः] तेषां तत्तदभीष्ट-प्रदानेन स्वभूतः* "ऋषिः" सर्वस्य द्रष्टा "पवमानः" पवमान-रूपः "अग्निः" "पुरोहितः" कर्मार्थमृत्विग्भिः पुरतो निहितः, "तम्" पूर्वोक्त-लक्षणं "महागयं" महद्भिरपि देवादिभिर्गातव्यं† [महान्ति प्रभूतानि यज्ञ-गृहाणि यस्य वा स तथोक्तः, तम्] "ईमहे" याचामहे ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३ १ २ ३ १२ २ ३ १ १
अग्नेपवस्वस्वपाअस्मेवर्चःसुवीर्यम्।

१ २ ३ २ ३ ३ १ १
दधद्रयिम्मयिपोषम्॥ ३ ॥ १२

हे अग्ने! "स्वपाः" ["सोर्मनसी (६, २, ११७)"—इति उत्तरपदाद्युदात्तत्वम्] शोभन-कर्मा‡ त्वम् "अस्मे" अस्मासु "सुवीर्यं" शोभन-वीर्योपेतं "वर्चः" [वर्च दीप्तौ (भ्वा० आ०)] तेजः "पवस्व" आ गमय। तथा भवान् "रयिं" धनं पुत्रं वा

---

* 'पञ्चजनाः—पञ्चभिर्जन्यते, चत्वारो मनुष्यजाः पञ्चमो यजमानः सैर्जन्यते, अरण्योरुत्पाद्यते—इति वि०।

† 'महागयं—हृदयावस्थितम्'—इति वि०।

‡ ऋ० वे० ७, २, ११, १=य० वे० ८, ३८।

¶ 'स्वपाः—शोभना आपो यस्य स्वभूता यस्यौ स्वपाः स उच्यते'—इति वि०।

"पोषं" [भावे कर्मणि वा घञ्] गवां पुष्टिं यद्वा गवादिकं "मयि" "दधत्" दधातु करोत्वित्यर्थः [दधातेर्लेटि अडागमे—"घोर्लोपो लेटि वा (७, ३, ७०)"—इत्याकार-लोपः] ॥३॥ १२

अथाग्नेपावकेति ऋचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा ।

१ २ ३ १ २ ३ १ १ ३ १ २
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।

२ ३ १ २ ३ १ २
आ देवान्वक्षि यक्षि च ॥ १ * ॥

हे "पावक" शोधक ! "रोचिषा" स्व-दीप्त्या "मन्द्रया" देवानां मादयित्र्या† "जिह्वया" च, हे "देव" द्योतमानाग्ने ! "देवान्" "आ वक्षि" आवह, यज्ञार्थं "यक्षि च" तान् यज ॥१॥

अथ द्वितीया ।

१ २ ३ १ १ ३ १ २
तन्त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् ।

१ २उ ३ १ १
देवाꣳ आ वीतये वह ॥ २ ‡ ॥

---

* ऋ० वे० ४, १, १९,=य० वे० १७, ८ ।

† 'मन्द्रया—जुह्वया'—इति वि० ।

‡ ऋ० वे० ४, १, १९, २ ।

हे "घृतस्नो" घृतस्य प्रेरक! * [यद्वा, घृतेन जनित! हे "चित्रभानो!" चित्रा नानाविधा भानवो दीप्तयो रश्मयो यस्यासौ चित्रभानुस्तस्य सम्बोधनम्] "स्वर्दृशं" सर्वस्य द्रष्टारं "तं" "त्वा" त्वाम् "ईमहे" याचामहे, अतो "वीतये" हविषां भक्षणाय "देवान्" "आ वह" ॥ २ ॥

अथ तृतीया।

३ १ २ २ २ १ २
वीतिहोत्रन्त्वाकवेद्युमन्तꣳसमिधीमहि।
१ २ ३ १ २ ३ २
अग्नेबृहन्तमध्वरे ॥ ३ † ॥ १३

हे "कवे" क्रान्तदर्शिन्! "अग्ने!" "वीतिहोत्र" क्रान्त-यज्ञ यद्वा प्रिययज्ञ, "द्युमन्त" दीप्तिमन्तं "बृहन्त" महान्तं, "त्वा" त्वाम् "अध्वरे" यज्ञे "समिधीमहि" समिद्भिः सन्दीपयामः ॥ ३ ॥ १३

इति सामवेदार्थप्रकाशे उत्तरार्चस्य चतुर्थप्रपाठकस्य तृतीयः खण्डः ॥ ३ ॥

---

* 'घृतस्नो—घृतेन स्नाप्यते यः यश्च घृतस्नुः तस्य सम्बोधनं हे घृतस्नो। इति वि०।

† ऋ० वे० ४, १, १९; ३ = य० वे० ११, ४।

अथ चतुर्थे खण्डे—

अवानोअग्मन्नृति तृचात्मकं प्रथमं सूक्तम्।

तत्र प्रथमा।

१ २ ३ १ २ ३ २ ३ १ २
अवानोअग्मन्नतिभिर्गायत्रस्यप्रभर्मणि।

१ २ ३ १ २
विश्वासुधीषुवन्द्य ॥ १ * ॥

"विश्वासु धीषु" सर्वेषु कर्मसु "वन्द्यः" स्तुत्यः हे "अग्ने!" "गायत्रस्य" गायत्र-साम्नः गायत्री-च्छन्दस्कस्य वा "प्रभर्मणि" प्रभरणे तत्साधने निमित्तभूते सति "नः" अस्मान् "ऊतिभिः" त्वदीयैः पालनैः "अव" रक्ष ["इचोऽतस्तिङः (६,३,१३५)"—इति संहितायां दीर्घत्वम् ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ २ ३ १ २
आनोअग्नेरयिम्भरसत्रासाहंवरेण्यम्।

१ २ ३ २ ३ १ २
विश्वासुपृत्सुदुष्टरम् ॥ २ † ॥

हे "अग्ने!" "रयिं" धनं "नः" अस्मभ्यम् "आ भर" प्रयच्छ ॥ कीदृशम्? "सत्रासाहं" सत्रा सह युगपदेव दारिद्र्यस्य नाशकं "वरेण्यं" सर्वैर्वरणीयं "विश्वासु पृत्सु" सर्वेषु सङ्ग्रामेषु "दुष्टरम्" शत्रुभिस्तरीतुमशक्यम् ॥ २ ॥

---

* ऋ० वे० १, ५, २७, १।

† ऋ० वे० १, ५, २७, २।

अथ तृतीया।

१ २ ३१ १३ २ ३१ २
आनोअग्नेसुचेतुनारयिंविश्वायुपोषसम्।

३ १ १ ३१२
मार्डीकन्धेहिजीवसे॥ ३ *॥ १४

हे "अग्ने!" "नः" अस्माकं "जीवसे"† जीवनाय "सुचेतुना" शोभनेन ज्ञानेन युक्तं "रयिं" धनम् "आधेहि" आख्यापय। कीदृशम्? "मार्डीकं" मृडीकं सुखं तद्धेतु-भूतं "विश्वायुपोषसं" सर्वस्मिन्नायुषि देहादेः पोषकं यावज्जीवमस्मदुपभोग-पर्याप्तमित्यर्थः‡॥ ३॥ १४

अग्निंहिन्वन्तीति पञ्चर्चं द्वितीयं सूक्तम्।

तत्र प्रथमा।

३ १ २ ३ २ ३ १ २ ३ १ २३ १ २
अग्निंहिन्वन्तुनोधियःसप्तिमाशुमिवाजिषु।

१ २ ३ १ २
तेनजेष्मधनन्धनम्॥ १ ¶॥

"नः" अस्माकं "धियः" कर्माणि स्तुतयो वा "अग्निं" "हिन्वन्तु" प्रेरयन्तु यागार्थमुद्योजयन्तु वर्धयन्तु वा [हि गतौ

---

* ऋ० वे० १, ५, २७, १।

† "तुमर्थे से-सेनसेम्-कसे-कसेनधै-अधैन्-कध्यै-कध्येन्-अध्यै-अध्यैन्-तवै-तवेङ्-तवेनः (३, ४, ८)'—इति पा०।

‡ 'विश्वायुपोषसम्—आयवो मनुष्या वङ्ग-मनुष्य-पोषणम्'—इति वि०।

¶ ऋ० वे० ८, ८, १४, १।

हन्ता च । तत्र दृष्टान्तः—"आजिषु" सङ्ग्रामेषु "आशुं" शीघ्र-गामिनं "सप्तिम् इव" सर्पण-शीलमश्वं यथा योद्धारः प्रेरयन्ति तद्वत्, "तेन" अग्निना "धनं धनं" सर्वं धनं "जेष्मं" वयं जयेम ॥ १ ॥

अथ द्वितीया ।

२३ २ ३ १ २ ३ १ १ ३ १ ३ १

यया गा आकरामहै सेनयाग्ने तवोत्या ।

१ २ ३ १ २

तान्नो हिन्व मघत्तये ॥ २ * ॥

हे "अग्ने !" "सेनया" इनेन सह वर्त्तमानया, सेना-रूपया वा "यया" "तव" "ऊत्या" रक्षया "गाः" "आ करामहै" आभिमुख्येन करवामहै लभामहइत्यर्थः । "ताम्" ऊतिं "नः" अस्मान् "हिन्व" गमय† । किमर्थम् ? "मघत्तये" धनस्य दानार्थम् अस्माकं धन-लाभायेत्यर्थः ।

"करामहै"-"करामहे"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

१ २ ३ २ ३ १ १ ३ १ २ १ ३ १ १

आग्नेस्तूर्ण्यरयिम्भरपृथुच्छोमन्तमश्विनम् ।

३ १ ३ ३ १ १ ३ १ ३ २

अङ्धिखंवर्त्तयापविम् ॥ ३ ‡ ॥

---

* ऋ० वे० ८, ८, १४, १ ।

† 'हिन्व—सेवयामः'—इति वि० ।

‡ ऋ० वे० ८. ८. १४. ३ ।

हे "अग्ने!" "स्थूरं" स्थूलं बृहत् "पृथु" विस्तीर्णं "गोमन्तं" गोभिर्युक्तम् "अश्विनम्" अश्वोपेतम् "आ भर" अस्मभ्यमाहर प्रयच्छ। किञ्च "खम्" अन्तरिक्षम् "अङ्धि" वृष्ट्युदकैः सिञ्च [यद्वा आत्मीयैस्तेजोभिः व्याप्य प्रकाशय] "पविम्" आयुधं* "वर्त्तय" अस्मद्विरोधिषु प्रवर्त्तय॥

"पविम्"-"पणिम्"—इति पाठो॥ ३॥

अथ चतुर्थी।

२ १ १ २ १ २ १ २ र २ र ३ २
अग्ननक्षन्नमजरमामूर्य्यꣳरोहयोदिवि।

२ २ १ ३ १ २
दधज्ज्योतिर्जनेभ्यः॥ ४ †॥

हे "अग्ने!" "नक्षत्र"" [नक्षति समन्ताद्व्याप्नोतीति नक्षत्रः, नक्षि गतौ (भ्वा० प०) "अमि-नक्षि (उ०३,१०५)"—इत्यादिना अत्रन् प्रत्ययः] सततं गन्तारम् "अजरम्" जरा-रहितम् "सूर्य्यं" सर्वस्य प्रेरकमादित्यं "दिवि" अन्तरिक्षम् "आ रोहयः" उपर्यवस्थापितवानसि [यद्वा, नक्षत्रं कृत्तिकादिकं सूर्य्यञ्च दिव्यारोहयः]। किङ्कुर्वन्? "जनेभ्यः" सर्वेभ्यः प्राणिभ्यः व्यवहारार्थं "ज्योतिः" प्रकाशकं "दधत्" विदधत् कुर्वन्, यथा सर्वेषां प्रकाशो भवति तथा उदये देशे सूर्यमगमयदित्यर्थः॥ ४॥

---

* पविं—पावनशीलम्'—इति वि०।

† ऋ० वे० ८, ८, १४, ४।

अथ पञ्चमी।

१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २
अग्नेकेतुर्विशामसिप्रेष्ठःश्रेष्ठउपस्थसत्।
१ २ ३ २ ३ १ २
बोधास्तोत्रेवयोदधत्॥ ५ * ॥ १५

हे "अग्ने!" "विशां" प्रजानां यजमानानां "केतुः" केतयिता ज्ञापयिता "असि" भवसि। अतएव "प्रेष्ठः" प्रियतमः "श्रेष्ठः" प्रशस्यतमश्च भवसि स त्वम् "उपस्थसत्" उपस्थाने यज्ञगृहे निषीदन् "बोध" अस्मदीयं स्तोत्रमवगच्छ। किङ्कुर्वन्? "स्तोत्रे" स्तुवते जनाय "वयः" अन्नं "दधत्" विदधन् कुर्वन् प्रयच्छन् वा॥ ५॥१५

अथाग्निमूर्द्धेतिषट्चात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

३ २ ३ २ ३ २ ३ १ २ २ ३
अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याअयम्।
३ १ २ २ २
अपाꣳरेताꣳसिजिन्वति॥ १ †॥

"मूर्द्धा" देवानां श्रेष्ठः, "दिवः" द्युलोकस्य "ककुत्" "उच्छ्रितः", "पृथिव्याः" च "पतिः", "अयम्" "अग्निः" "अपां" "रेतांसि" स्थावर-जङ्गमात्मकानि भूतानि "जिन्वति" प्रीणयति॥ १॥

---

* ऋ० वे० ८, ८, १४, ५।

† ऋ० मा० १, १, ३, ७ (१मा० १३५ पृ०) = ऋ०वे० ६, ३, १९, २।

अथ द्वितीया।

१ २३१ २ ३ २३ १ २ ३२८
ईशिषेवार्यस्यदिदाचस्याग्नेस्वःपतिः।

३ २ ३ २३ १ २
स्तोतास्यान्तवश्मर्मणि॥ २ *॥

हे "अग्ने!" "स्वःपतिः" स्वर्गस्य स्वामी त्वं "वार्यस्य" वरणीयस्य "दाचस्य" दातव्यस्य धनस्य "ईशिषे" ईश्वरोऽसि "श्मर्मणि" सुख-निमित्ते तव "स्तोता" "स्यां" भवेयम्॥ २॥

अथ तृतीया।

१ २३ १ २३ १ २ १ १८ २८
उदग्ने शुचयस्तवशुक्राभ्राजन्तईरते।

२ २ १ २ ३ १ २
तवज्योतींष्यर्चयः॥ ३ †॥ १६

हे "अग्ने!" "ते" तव "शुचयः" निर्मलाः "शुक्राः" शुक्लवर्णाः "भ्राजन्तः" दीप्यमानाः "अर्चयः" प्रभाः "तव" "ज्योतींषि" तेजांसि "उदीरते" प्रेरयन्ति॥ ३॥ १६

॥ सत्रासाहायम्॥ अग्ना३४मिः। मूर्द्धादिवःककुत्॥

५ ५ १ ८ १ १
ओ३वा। पतिःपृथिवियाआ२याम्। आ२याम्। रा

२ १ ६ २८ ३८ २ १ ५ ५
२३यिता। सिजो३चो। वाजा३४३यि। न्वा२३४तो३चा

* ऋ० वे० ६, १, १८, २।

३२ २ २ २ ५ ५ १२
यि ॥(१) ईशा३४यि। षेवारियस्यहि। ओ३ह्वा। दा
२ २ १ १ १ १ १
चस्याग्नेस्तवःपा२तायिः। स्तो२ता। स्या२३न्ता। वशौ
३२ ३२ २ १ ५ ५ ३ २
ह्हो। वाचा३४३यि। मा२३४णो३हायि ॥(२) उदा३
२ ५ ५ १ २ २ २ १
४। ग्नेशुचयस्तव। ओ३ह्वा। शुक्राभ्राञ्जन्तीरा२ता
१ २ १ ३ २ २
यि। वा२वा। ज्यो२३तायि। षियौ३ह्वो। वाचा
१ ५ ५
३४३यि। चा२३४योह्हायि(३) ॥ १५ * ॥ [१] १६

इति सामवेदार्थप्रकाशे उत्तरार्चस्य चतुर्थस्याध्यायस्य
चतुर्थः खण्डः† ॥ ४ ॥

॥ इति सप्तमस्य प्रथमार्द्धप्रपाठकः‡ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ १४ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्येण विरचिते माधवीये सामवेदार्थप्रकाशे
उत्तरार्चस्य चतुर्थोऽध्यायः ॥ १४ ॥

---

* ऋ० मा० १८प्र० २ऋ० १५सा० ।
† 'इत्या एकादशः सोम-पर्यन्ताः—इति वि० ।
‡ 'सप्तमस्य प्रथमः प्रपाठकः'—इति वि० ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १५ ॥

॥ अथ पञ्चदशोऽध्याय आरभ्यते ॥

तत्र,

प्रथमे खण्डे —

कस्तेजामिर्जनानामिति ह्यचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

१ २ ३ १२ २२ ३ १ ३ २ ३ ४ १२
कस्तेजामिर्जनानामग्ने कोदाश्वध्वरः ।

२ १ १ १ २२
कोहकस्मिन्नसिश्रितः ॥ १ * ॥

हे "अग्ने !" "जनानां" मनुष्याणां मध्ये "ते" तव "कः" "जामिः" को बन्धुः ? त्वं सर्वैर्गुणैरधिकोऽसि त्वत्स्वरूपो बन्धुर्नास्तीति भावः । "कः" "दाश्वध्वरः" [दाश्वदर्त्त अध्वरो यज्ञो येन स तथोक्तः] त्वां यष्टुमतिसमर्थः कोऽपि नास्तीत्यर्थः । "को ह" त्वं कथम्भूतः ? त्वमीट्यूप इति सर्वैर्न ज्ञायसइत्यर्थः । "कस्मिन्" स्थाने "श्रितः" आश्रितः "असि" भवसि वर्त्तसे ? तत्स्थान-

---

* ऋ० वे० १, ५, २२, १ ।

मपि न केन विज्ञायते [अतस्त्वमस्माभिः मांसदृष्टिभिः कथमुपलब्धव्यः ?—इत्यग्निः प्रशस्यते] ॥ १ ॥

अथ द्वितीया ।

२ ३ १२ १२३ १ २ ३ १ १ ३१
त्वञ्जामिर्ज्जनानामग्नेमित्रोऽसिप्रियः ।
२३ १ २ ३ १ २
सखासखिभ्यईड्यः ॥ २ * ॥

हे "अग्ने!" "त्वम्" उक्त-प्रकारेण अचिन्त्य-रूपोऽपि अनुग्रहीतृतया सर्वेषां "जनानां" "जामिः" बन्धुः "असि"। तथा "प्रियः" प्रीणयिता त्वं यजमानानां "मित्रः" असि। "ईड्यः" स्तुतिभिः स्तुत्यः त्वं "सखिभ्यः" समानेभ्यः ऋत्विग्भ्यः "सखा" सखिवदत्यन्तं प्रियोऽसि ॥ २ ॥

अथ तृतीया ।

१ १ ३ १२ १२ ३ १ १ ३ २ ३ २ १ १
यजानोमित्रावरुणायजादेषाऽऋतम्बृहत् ।
१ ३ २ ३ १२ २२
अग्नेयक्षिस्वन्दमम् ॥ ३† ॥ १

हे अग्ने ! "नः" अस्मदर्थं "मित्रावरुणा" एतत्संज्ञौ देवौ "यज" हविषा पूजय। तथा "देवान्" इन्द्रादीन् "यज" पूजय "ऋतं" सत्यं यथार्थ-फलं यस्मात् यजेत्येव। तदर्थं

* ऋ० वे० १, ५, २३, ४।
† ऋ० वे० १, ५, २३, ५।

"बृहत्" प्रौढं "स्व" स्वकीयं "दमं" यज्ञगृहं* "यक्षि" यज सङ्गच्छस्व त्वयि अन्तर्विद्यमाने सति हि यज्ञगृहं पूज्यते ॥ ३ ॥ १

अथ द्वितीय-ऋचे—प्रथमा।

३ १ १ ३क २ २ ३ १ २ २ ३ १
ईडेन्योनमस्यस्तिरस्तमाꣳसिदर्शतः।

२ ३ १ २ ३ १ २
समग्निरिध्यतेवृषा॥ १ †॥

"ईडेन्यः" स्तोतृभिरीड्याः अतएव "नमस्यः" सर्वैर्नमस्कार्यः "तमांसि तिरः" ध्वान्तानि स्वाभाभिस्तिरस्कुर्वन् "दर्शतः" कमनीयतया सर्वैर्दर्शनीयः; तादृशः "अग्निः" "वृषा" यजमानस्य कामानां वर्षिता "समिध्यते" आहुति-प्रक्षेपेण प्रज्वाल्यते। उक्तार्थं वाजसनेयकम्—"ईडेऽन्यो ह्येष नमस्यो ह्येष तिरस्तमांसि दर्शतः समिद्धः"—इति ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ २ ३ २ ३ १ २ ३ १ २
वृषोअग्निःसमिध्यतेश्वोमदेववाहनः।

२ ३ १ २
तꣳहविष्मन्तईडते॥ २ ‡॥

"वृषा उ" वृषैव¶ कामानां वर्षिता "देववाहनः [देवान् हवींषि वाहयति प्रापयतीति देव-वाहनः] तत्र दृष्टान्तः—

---

* 'बृहत्सम्—चाक्षीवं वर्ण-रश्मि-संयुक्तम्'—इति वि०।

† ऋ० वे० १, १. २०, १। ‡ ऋ० वे० १, १, २०, ४।

¶ 'उ—इति पादपूरणः'—इति वि०।

"अश्वो न" यथाश्वो राजानं वाहयति स्व-पुरं प्रापयतीति वाहन-भूतो यः "अग्निः" "समिध्यते" आहुति-प्रदानेन सम्यग् दीप्यते "तं" तादृशमग्निं "हविष्मन्तः" सम्भृत-हविष्का यजमानाः "ईळते" कर्म-सिद्ध्यर्थं स्तुवन्ति ॥ २ ॥

अथ तृतीया।

१ २ २१ २ ३ १ १ ३ १ १
वृषण्वत्यावयंवृषन्वृषणःसमिधीमहि।

१ २ १ २ ३ २
अग्नेदीद्यत्म्बृहत्॥ ३ * ॥ २

"वृषन्" कामानां वर्षितः। हे "अग्ने!" "वृषणः" वृषणाः घृताद्याहुतीनां सेक्तारो वयं वृषणम् आहुति-द्वारा उदकस्य सेक्तारं तथा च स्मृतिः—"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः (मनु ३,७६)" —इति "दीद्यत्" दीप्यमानं "बृहत्" अतएव महान्तं तमिमग्निं "समिधीमहि" सम्यग् दीपयामः ॥ ३ ॥ २

तृतीय-ऋचे—प्रथमा।

१ २ ३।१ २ ३ १ २ ३ १ २
उक्षेवृहन्तोअर्च्चयःसमिधानस्यदोदिवः।

१ १ २ १ २
अग्नेशुक्रासईरते॥ १ † ॥

---

* ऋ० वे० १, १, २०, ५।

† ऋ० वे० ६, ३, २६, ४।

हे "दीदिवः" दीप्ताग्ने ! "समिधानस्य" समिध्यमानस्य "ते" तव "बृहन्तः" महान्तः "शुक्रासः" ज्वलन्तः "अर्चयः" दीप्तयः "उदीरते" उद्गच्छन्ति ॥ १ ॥

अथ द्वितीया ।

१२ ३२ १२३१२
उपत्वाजुह्वोऽ३ममघृताचीर्यन्तुहर्यत ।

१२३१२
अग्नेहव्याजुषस्वनः ॥ २ * ॥

हे "हर्यत" कामयमानाग्ने ! "मम" मदीया "घृताचीः" घृतमञ्चन्त्यः जुह्वः स्रुचः "त्वा" त्वाम् "उप यन्तु" । "नः" अस्माकं "हव्या" हव्यानि "जुषस्व" सेवस्व च ॥ २ ॥

अथ तृतीया ।

३१२ २२ ३ १२३१२ ३ १२
मन्द्रंहोतारमृत्विजञ्चित्रभानुं विभावसुम् ।

१ १२ ३१२
अग्निमीडेसउअवत् ॥ ३ † ॥ ३

"मन्द्रं" मोदनं "होतारं" देवानामाह्वातारम् "ऋत्विजम्" ऋतौ यष्टव्यं "चित्रभानुं" विविधदीप्तिं "विभावसुं" दीप्तिधनम्‡

---

* ऋ० वे० ५, ३, १६, ५ ।

† ऋ० वे० ५, ३, २७, १ ।

‡ 'विभावसुं'—विश्वस्य सर्वस्य भावयितारम्'—इति वि० ।

"अग्निम्" "ईडे" स्तौमि । "सः" अग्निः "अवत् उ"* अस्मदीयां स्तुतिं शृणोत्येव ॥ ३ ॥ ३

॥ आमहीयवम् ॥ उत्तेबृ३हन्तोअर्चयाः । समायि
धा१ना२ । स्मदा२३यिदिवाः । अग्नेशुक्रा । सआ२३
यिरताउ । वा३ ॥(१) उपत्वा३जुहवोममा । घृताचा
२यिर्मा२ । ओहा२३र्यता । अग्नेहव्या । जुषा२३स्व
नाउ । वा३ ॥(२) मद्र९ञ्चोइतारमृत्विजाम् । चित्रा
भा१नू२म् । विभा२३वसूम् । अग्निमीडायि । सऊ
२३अवाउ । वा३ । स्तोषे२३४५(३) ॥ १४ † ॥ [१]

॥ जरावोधीयम् ॥ मन्द्र९ञ्चोतोवा । रामृत्विजाम ।
चित्राभा२३नूम् । विभावासम् । अग्नायिमा१यिडा२३
यिसाः । उ । अवो३४५ई । डा(२) ॥ १५ ‡ ॥ [२] ३

---

* 'उ—इति पद-पूरकः'—इति वि० ।

† ऋ० मा० १०प्र० २ब० १४सा० ।

‡ ऋ० मा० १०प्र० २ब० १५सा० ।

अथ प्रगाथात्मके चतुर्थ-सूक्ते —

प्रथमा।

२ १ २ २१२ २ २ २ २ १ २
पाह्यिनोअग्नएकयापाह्यूऽ३ऽउतद्वितीयया।

२ २ १ २ २ १ २ २ १ २ २ १ २
पाहिगीर्भिस्तिसृभिरूर्ज्जांपतेपाह्यिचतस्रभिर्वसो ॥१*॥

हे "अग्ने" "नः" अस्मान् "एकया" ऋचा गिरा "पाहि" रक्ष। "उत" अपिच "द्वितीयया" ऋचा "पाहि" पालय। "पाहि" "तिसृभिः" "गीर्भिः" "ऊर्जाम्" अन्नानां बलानां वा "पते" स्वामिन्!। तथा "पाहि" "चतसृभिः" गीर्भिः हे "वसो" वासकाग्ने !॥ १॥

अथ द्वितीया।

२ १ २ २ २ २ १ २ २ १ २ १ २ १ २
पाह्यिविश्वस्माद्रक्षसोअराव्णःप्रस्मवाजेषुनोव।

१२ २२ २ १ २ २ १२ २२ २२
त्वामिद्धिनेदिष्ठन्देवतातयआपिन्नत्नामहेवृधे॥२*॥४

हे "अग्ने" "विश्वस्मात्" सर्वस्मात् "रक्षसः" "अराव्णः" अदातुः सकाशात्‡ "पाहि" रक्ष। सोऽस्मान् "वाजेषु" सङ्ग्रामेषु "प्राव" प्रकर्षेण रक्ष। "ओ"—इति पूरणः। "हि" यस्मात्

---

* ऋ० सा०१, १, ४, १ (१भा० १५१पृ०) ऋ० वे० ५, ४, २२, ४।

† ऋ० वे० ५, ४, २२, ५।

‡ 'अराव्णः—सिध्यत्कर्म-कारिणः'—इति वि०।

"नेदिष्ठम्" अन्तिकतमम्* "आपि" बन्धुभूतं "त्वाम् इत्" त्वामेव† "देवतातये" यज्ञाय सिद्ध्यर्थं "हुवे" वर्धनाय "नच्चा-मसे" व्याप्नुमः [नच्चति व्याप्तिकर्मा (निघ०२,१८,२) ॥ २ ॥ ४

॥ रौरवम् ॥ पाहिनोअग्नाइआयिकाइ३४या । पाह्यु
तद्वितीययापाहिगोभिस्तिस्रभिरूर्ज्जाइ३यतायि । ओहा
३उवा । पाहिचतस्रभाइ३ यिर्हायि । ओहा ३ उवा ।
वसा । औ३होवा ॥(१) पाहिचतमृ३भिर्वा२३४साउ ।
पाहिचतस्रभिर्वसोपाहिविश्वस्माद्रक्षसोआ२राव्णाः । ओ
हाउवा । प्रस्नवाजेषुना२३हायि । ओहाउवा । अ
धा । औ३होवा ॥(२) प्रस्नवाजेषू३नोआ२३४वा । प्रा
स्नवाजेषुनोवत्वामिन्द्रजेदिष्टन्देवता२तयायि । ओहाउ
उवा । आपिन्नक्षामहा२३यिहायि । ओहाउवा । वृ
धा । औ३होवा । हो५ई । डा(३) ॥ १६ ॥ [१]

---

* 'नेदिष्ठ'—मुनेरभिकम्'—इति वि० ।

† 'इत्—इति पदपूरणः'—इति वि० ।

‡ ऋ० गा० १०प्र० २अ० १६वा० ।

॥ दैर्घश्रवसम् ॥ पाह्यिनोअग्नएकयाओह्याओह्याउ।
पाह्यार्उतद्वितीयार्या। ओउह्या। ओउह्याउ४।
पाह्याउ४यिगोर्भायिः। नायिसृभिः। ऊर्ज्जाम्यतायि।
ओउह्या। ओउह्याउ४। पाह्याउ४यिचनाउ। ह्वभो
उ४वा। वापुसोद्ह्यायि(१) ॥ १७ * ॥ [२]

॥ सम्मतम् ॥ पाह्यिविश्वस्माद्रक्षसाः। अरावणःप्र
स्रवाजेषुनोअवा। तुवामाउयिह्वो। नायिविष्ठन्दे।
वताताया। ओह्योउ४वाह्यायि। आ। पायिन्नाउ३
ह्याउ। ह्योवाउह्यायि। मह्नेवाउद्वाउ४यि। ओउ३
४५ई। डा(उ) ॥ १८ † ॥ [३]

॥ यौधाजयम् ॥ पाह्याउयि। नोउअ। ग्न। आयिका
उ४या। पाह्याउयि। उताउ। द्विताउ४५। याउ३४

* ऋ० मा० १०म० २अ० १७सा०
† ऋ० मा० १०म० २अ० १८सा०।

५ २र १ २र १ २ १ ३र २
या । पाहायिगार्भायि । ति । इभा२यिः । जर्जा३४५म् ।
१ ५ २र १ ३ २
पा२३४ते । पाहा२यि । चता२ । सुभा३ ४ ५यिः ।
३ ५ ३र १ २ ४ ५ २३
वा२३४सो ॥(१) पाहा३१यि । चा३त । सु । भिर्वा२३
५ १ २ १ ३ २ ३
४साउ । पाहा३यि । चता२ । सुभा३४५यिः । वा२
५ २र १ २१ २र १ ३र २
३४सो । पाहायिविश्वा । स्मात् । रत्ता२ । सोआ३
३ ५ २ र ३ १
४५ । रा२३४व्णाः । प्रस्मा२यि । वाजा२यि । षुनो३४५ ।
३ ५ ३ १ २ ४र ५ २ ३ ५
आ२३४वा ॥(२) प्रस्मा३१ । वा३जे । षु । नोआ२३४वा ।
१ १ १र ३ १ ३ ५ २ १
प्रास्मा३ । वाजा२यि । षुनो३४५ । आ२३४वा । तुवा
२ १ १ र १ ३ १ ३ ५
मिद्दायि । ने । दिष्ठन्दा२यि । वता३४५ । ता२३४ये ।
२र १ ३ २ ५
आपा२यिम् । नाक्षा२ । मद्दे३४५ । वा २ ३ ४ ई(३)
॥ १८ * ॥ [४] ४

इति सामवेदार्थप्रकाशे उत्तरार्चस्य पञ्चदशस्याध्यायस्य
प्रथमः खण्डः ॥ १ ॥

---

* ऋ० मा० १०म० २सू० १८सा० ।

अथ द्वितीय-खण्डे—

इनोराजन्निति दृचात्मके प्रथम-सूक्ते,

प्रथमा।

३१ २ ३१२ २२३
इनोराजन्नरतिःसमिद्धो

२ ३ १२ ३१ २
रौद्रोदक्षायसुषुमाँअदर्शि।

१ १२ २२ ३ १ २३१
चिकिद्विभातिभासाबृहता

२ ३१२ ३१ २
सिक्नीमेतिरुशतीमपाजन्॥ १ *॥

हे "राजन्" दीप्यमानाग्ने! † त्वम् "इनः" ईश्वरः सर्वस्य भवसि। अथ परोक्षः—"अरतिः" हविरादाय देवान् प्रति गन्ता "समिद्धः" सन्दीप्तः "रौद्रः" शत्रूणां भयङ्करः "सुषुमान्" ओषध्यात्मना स्थितेरंशुः सुष्ठु सूयत इति सुसोमः, तेन तद्वान् शोभन-प्रसवो वा सोऽग्निः "दक्षाय" यजमानानां धनादि-वृद्ध्यर्थं कर्म-वृद्ध्यर्थं वा "अदर्शि" सर्वैर्दृश्यते। किञ्च "चिकित्" सर्वं जानानोऽग्निः "विभाति" विशेषेण दीप्यते तथा "बृहता" महता "भासा" तेजसा ज्वाला-लक्षणेन "असिक्नीं" रात्रिम् "एति" सायं-होम-सिद्ध्यर्थं गच्छति। किकुर्वन्? "रुशतीं"

---

* ऋ० वे० ७, ५, ३१, १।

† 'इनः राजाभिषीयते, द्वितीयं यद्राज-पदम् तदग्नेरेव सोमलं प्रतिपादयति' —इति वि०।

श्वेतवर्णां दीप्तिम् "अपाजन्" अपगमयन् सर्वतो विकिरन् [यद्वा, रुशतीं दीप्तामुषस मागच्छन् अपच्यिपन् परित्यजन् रात्रिं गच्छति। सामर्थ्याद्रात्रिं परित्यजन्नुषसं प्रातर्होम-सिद्ध्यर्थं गच्छतीत्यर्थो लभ्यते ॥ १ ॥

अथ द्वितीया।

३ १र २र १ १र २र ३ २
कृष्णंयदेनीमभिवर्पसाभू

२ २३ १ ३ ३ २ ३ २
ज्जनयन्योषांबृहतःपितुर्जाम्।

३ १ ३ १र १र ३ २
ऊर्ध्वं भानुꣳसूर्यस्यस्तभाय

३ १र २र ३ १र १र
न्दिवोवसुभिररतिर्विभाति ॥ २* ॥

सोऽग्निः "यद्" यदा "कृष्णां" कृष्ण-वर्णाम् "एनीं" गच्छतीं रात्रिं "वर्पसा" आत्मीयेन ज्वाला-लक्षणेन रूपेण "अभिभूत्" अभिभवति। किंकुर्वन्? "बृहतः" महतः "पितुः" सर्वस्य जगतः पालयितुः पितृभूताद्वा आदित्यात् "जां" जायमानां "योषाम्" उषसं "जनयन्" अभिव्यञ्जयन्। तदा "अरतिः" गमनशीलोऽग्निः "दिवः" द्युलोकस्य "वसुभिः" वासयितृभिः आच्छादनैः आत्मीयैस्तेजोभिः "सूर्यस्य" "भानुं" दीप्तिम् "ऊर्ध्वम्" उपरिष्टात् "स्तभायं" स्तभ्नयन् "वि भाति" विशे-षेण दीप्यते ॥ २ ॥

---

* ऋ० वे०७, ४, २१, २।

अथ तृतीया।

३ २ ३ २ ३ १ २ ३ २ ३
भद्रोभद्रयासचमानआगात्

१ २ ३ २ ३ क २ २ ३ २
स्वसारञ्जारोअभ्येतिपश्चात्।

३ १ २ २ ३ २ ३ २ ३ १
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्

२ ३ १ २ ३ २ ३ १ २
शश्वद्वर्णैरभिराममस्थात्॥ ३ *॥ ५

"भद्रः" भजनीयः कल्याणः "भद्रया" भजनीयया 'सचमानः "आगात्" आगच्छति। ततः "पश्चात्" "जारः" जरयिता शत्रूणां "सोऽग्निः" "स्वसारं" स्वयं सारिणीं भगिनीं वा आगतामुषसम् "अभ्येति" अभिगच्छति। तथा "सुप्रकेतैः" "सुप्रज्ञानैः "द्युभिः" दीप्तिभिस्तेजोभिः सह "वितिष्ठन्" सर्वतो वर्त्तमानः सोऽग्निः "उशद्भिः" श्वेतैः "वर्णैः" वारकैराभीयैस्तेजोभिः "रामं" क्षणं श्यावं तमः† "अभ्यस्थात्" सायंहोमकाले अभिभूय तिष्ठति॥ ३॥ ५

---

* ऋ० वे० ७, ५, ११, ३।

† "अभिरामं—अभिरमणीयं रूपमस्थात्'—इति वि०।

॥ औशनम् ॥ आयिनाः । राजन्नरतायिः । समा
३यिद्वाः । राजानरतायिः । समाऽयिद्वाः । रौद्रोदक्षा ।
याऽसुषु । माऽअदशा । चिकिद्विभातिभासा । वृद्धा
२३ता । असिक्नीमायि । तीऽरुण । तीऽ४३म् । आ
२पाऽपृजाऽ५ऽ६न् ॥(१) काण्वम् । यदेनीमभिवा । प
साऽभूत् । जनयन्यो । षाऽमन्वृह । ताःपितुर्ज्जाम् । ऊ
र्ध्वभानुऽसवित्र्यं सा । स्तभाऽ३यान् । दिवोवद्ध । भीऽ
रर । ताऽ४३यिः । वाऽयिभाऽपृताऽ५ऽ६यि ॥(२) भाद्राः ।
भद्रयासचमा । नद्याऽगात् । स्वसारज्जा । रोऽषभि ।
णतिपश्चात् । सुप्रकेतैर्द्युभिरग्नायिः । विताऽ३यिष्ठान् ।
रुग्मङ्गिर्वा । णैऽरभि । राऽ४३ । माऽ३माऽपृस्थाऽ
५ऽ६त्(३) ॥ २० * ॥ [१] ५

---

* ऊ० गा० १०प्र० २अ० २०खा० ।

अथ द्वितीय-सूक्ते—

प्रथमा।

१२ ३१२ ३१२
कयातेअग्नेअङ्गिरऊर्जोनपादुपस्तुतिम्।

१२ ३१२
वरायदेवमन्यवे ॥ १ * ॥

हे "अङ्गिरः" अङ्गिरसां वरिष्ठ! [यद्वा, अङ्गति सर्वत्र गच्छतीति अङ्गिराः ताट्टय!] हे "ऊर्जोनपात्" ['नपात्'—इत्यन्ननाम (निघ०२,२,१३)] अन्नस्य पुत्र! [हविर्भिर्वर्धमानत्वात्! यद्वा नपादिति नाम, हविर्लक्षणस्यान्नस्य नमः!।] "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः (मनुः३,७०)"—इति वृष्टेरौषधय ओषधिभ्योऽग्निरिति अन्नस्य नमा] हे "देव" द्योतमान! "अग्ने" "वराय" सर्ववरणीयाय† "मन्यवे" अन्नमभिमन्यमानाय ‡ "ते" तुभ्यं "कया" कीदृश्या वाचा "उपस्तुति" स्तोत्रम् अहं मरेयम्। त्वं मह्यान् खलु अहंमन्यः तदर्थं कथं स्तुतिं कुर्यामिति ऋषिरग्निं प्रति वदति॥१॥

---

* ऋ० वे० ६, २, ५, ७।

† 'वराय—वरिष्ठाय'—इति वि०।

‡ 'मन्यवे—दीप्तये'—इति वि०।

अथ द्वितीया।

१२११ ११२ २१ १
दाशेमकस्यमनसायज्ञस्यसहसोयहो।

१२ २१२
कदुवोचदूदग्नमः॥ २ *॥

ऋषिरग्निमाह ब्रूते—हे "सहसोयहो"† ['यहुः'—इत्यपत्यनाम (निघ०२,२,११) बलेन निष्पाद्यमानत्वात्] बलस्य पुत्र! हे अग्ने! "कस्य" कीदृशस्य "यज्ञस्य" यज्ञवतो यजनीय-देववतो वा यजमानस्य "मनसा" युक्ताः सन्तो हवींषि तुभ्यं वयं "दाशेम" प्रयच्छेम† [पूजायां बहुवचनम्] किञ्च, तुभ्यम् "इदं" "नमः" हविर्नमस्कारं वा "कत्" कदाः "वोचे" अहं वदामि? "उ" [—इति प्रश्ने। ऋषिः, 'कदा दास्यामि? कदा स्तोष्यामि?'—इत्यग्निं पृच्छति। वोचे—ब्रूञादेशस्य लुङ्यात्मने पदे उत्तमैकवचने रूपम्]॥ २॥

अथ तृतीया।

१ २१उ २ २ २ १२ २१२ २१
अधात्वंहिनस्करोविश्वाअस्मभ्यंसुक्षितीः।

१२ २ २१
वाजद्रविणसोगिरः॥ ३ ¶॥ ६

---

* ऋ० वे० ६, ३, ५, ५।

† 'दाशेम—इदम्'—इति वि०।

‡ 'कत् उ वोचे—कउवोचे—इत्येवं द्रष्टव्यम्। नपुंसके पुंस्त्विक'—इति वि०।

¶ ऋ० वे० ६, ६, ६, १।

हे अग्ने ! "अध" अथानन्तरं "त्वं हि" [हिरवधारणे] त्वमेव "अस्मभ्यम्" "करः" कुरु देहीत्यर्थः [करोतेर्लेटड़ागमः]। किमित्यपेक्षायामाह—"नः" अस्मदीयाः "गिरः" त्वद्विषयाः "विश्वाः" सर्वाः स्तुतीः एवं कुरु यथा "सुक्षितीः"* [क्षियन्ति निवसन्त्यत्रेति, क्षितयो गृहाः शोभन-निवासाः यत्रा] हित-मनुष्याः—कल्याण-पुत्र-पौत्र-युक्ताः, तथा "वाजद्रविणसः" अन्न-युक्ता धनवतीः अथवा वाजो दीप्तिः सर्व्वतो दीप्तिधनाश्च कुरु। त्वदस्माभिः स्तुतः सन् गृह-पुत्रान्न-धनादीनि देहीत्यर्थः ॥३॥

॥ महावामदेव्यम् ॥ काऽऽया। तेआ३ग्नेऽअङ्गि
रा:। ऊ। जोनयादुपस्तु। तायिम्। औ२३चोचा
यि। वरा२३यदायि। वमौचोऽ३। ऊम्मा२। न्याऽऽ२
वोऽ३५हायि ॥(१) दाऽऽशे। मका३स्मा३मनसा। या।
अस्यसचसोय। चा। औ३होहायि। कदू२३वोचायि।
इदौहोऽ३। ऊम्मा२। नाऽऽमोऽ३५चायि ॥(२) आऽऽ५
भा। तुवाऽ३ऽचाऽ३यिनस्कराः। वायि। स्वाअस्मभ्यऽ

* 'सुक्षितीः—शोभनाः क्षितीः यैर्यासि अधस्तात् करोषि'—इति वि०।

१ १ २ २ १२ २
सुश्चि। तायिः। औ२३ह्वोह्वायि। वाजा२३द्रवायि।

३ २ २ १ १ २
णयोह्वो३। ऊम्मा२। गाऽ२यिरो३पूहायि(३) ॥१*॥ [१]६

अग्नआयाहीति प्रगाथरूपे तृतीय-सूक्ते,

प्रथमा।

२ ३ १ २ ३ २ ३ १ २
अग्नआयाह्यग्निभिर्होतारन्त्वावृणीमहे।

१२ २२ ३ १ २ ३ १ १ ३ १ २ ३ १ ३ १ २
आत्वामनक्तु प्रयताहविष्मतीयजिष्ठम्बर्हिरासदे॥१†॥

हे "अग्ने!" "अग्निभिः" यष्टृभिः सह "आ याहि" आगच्छ। तदर्थं "होतारं" देवानामाह्वातारं "त्वा" त्वां "वृणीमहे" त्वामागतं "प्रयता" अध्वर्यु हस्ताभ्यां नियता "हविष्मती" घृतवती "यजिष्ठं" "बर्हिः" बर्हिषि "आसदे"‡। आसाद्य च "अनक्तु" सिञ्चतु॥ १॥

अथ द्वितीया।

१ २ १ २ २ २ ३ १ १ ३ २
अच्छाहित्वासहसःसूनोअङ्गिरःसुचक्षसरन्त्यध्वरे।

१ १२ २२ ३ १ १ ३ १ ३ १ २ ३ २
ऊर्ज्जोनपातुशतक्रतोयमोमहेग्निंयज्ञेषुपूर्व्यम्॥ २¶॥ ७

---

* ऊ० गा० ११प्र० १अ० १सा०।

† ऋ० वे० ६, ४, ११, १।

‡ 'आसदे—आसादनार्थम्'—इति वि०।

¶ ऋ० वे० ६, ४, ११, १।

हे "सहसः सूनो" बलस्य पुत्र ! बलेन मथ्यमानत्वात्, हे "अङ्गिरः" अङ्गिरसां मध्ये मुख्य !* [अथवा अङ्गतिर्गति-कर्मा सर्वत्र गन्तः !] "त्वा" त्वाम् "अध्वरे" यागे "अच्छ" अभिप्रायं "स्रुचः" "चरन्ति" गच्छन्ति। अतः "ऊर्जः" अन्नस्य "नपातं" नपातयितारं रक्षकं बलस्य वा नप्तारं† "घृतकेशं" प्रदीप्तकेशं‡ "पूर्व्यं" पुरातनं पूरकं वा "अग्निं" "यज्ञेषु" अस्मदीयेषु "ईमहे" स्तौमि ॥ २ ॥ ७

॥ नौधसम् ॥ आ२३४। ग्नआयाच्चिय। ग्नायि
भायिः। होतारत्वा। वाऽर्णायिमाऽहायि। आ२३
त्वाम्। आनक्तु। प्रय। ता। हाविष्मा२३४ती। या
२३जायि। ष्ठम्बर्हिरो२३४वा। सा२३४दे ॥(१) या२३
४। जिष्ठम्बर्हिरा। सादायि। यजिष्ठम्बा। हीऽरासा
ऽदायि। आ२३क्षा। हायित्वा। सद्म। साः। नो

---

* 'अङ्गिरः—अङ्गानां रसभूतः जठरस्थमेव'—इति वि०।

† 'ऊर्जोनपातम्—अन्नानां पुत्रभूतम्, अन्नाऽत्या अग्निर्जायते तेन पुत्रः अथवा अन्नानां पवितारं रक्षितारमित्यर्थः'—इति वि०।

‡ 'घृतकेशं—केशभूता ज्वाला घृतेन वर्धते तस्माद् घृतकेशोऽग्निः तम्'—इति वि०।

२३ ५ १ २ १ २१ ५
अङ्गा२३४यिराः। सू२३चाः। चारन्तियो २ ३ ४ वा।
३ ५ १ ५ ४ ५ २
ध्वा२३४रे ॥(२) सू२३४। चश्चरन्तिय। ध्वारायि। सु
१ २ १ २ २ १ २ १२ २
चश्चरा। तो३आध्वा३रायि। ऊ२३र्जो। नापातम्।
१ १ २ ३ ५ १ २ १
घृत। के। ग्रामायिमा२३४ढायि। आ२३ग्नीम्। या
२ २१ ५ ३ ५
ग्नेषुपो२३४वा। वी२३४याम्(३) ॥ २ * ॥ [१]

२ २ २ १ २
॥ नैपातिथम्॥ अग्नआयाह्यग्निभा३यिरे। होता
१२ १ २ २ ३२ ५ १२
रत्वा। वृणायिमहा३यि। हा। औहो२३४हा। आ
२१. १२२ १ ७ २ ३२
त्वामनक्तुप्रयता। हवायिष्मता२३यि। हा। औहो२
५ २१ २ २ ३२ ५ २
३४हा। यजायिष्टाम्बा३। हा। औहो२३४हा। हा
१ ५२ २ ३ ५ १ २
२यिरा२३४औहोवा। सा२३४दे॥(१) यजिष्ठम्बहिरास
२ १ २ १ २ २ ३२
दा३ए। याजिष्ठम्ब। हिरासदा३यि। हा। औहो२
५ १२ २२ १ २ १२ २२ १ ७
३४ हा। अच्छाहित्वासहसःसू। नोआङ्गिरा २ ३:।

---

* ऊ० गा० ११प्र० १ख० २सा०।

ह्वा। औहो२३४ह्वा। सुचाश्वारा३। ह्वा। औहो२३
४ह्वा। तार्आ२२४औहोवा। ध्वा२३४रे ॥(२) सुचश्च
रन्त्यध्वरा३ए। सूचश्वर। तियाध्वरा३यि। ह्वा। औ
हो२३४ह्वा। ऊर्ज्जोनपातङ्घृतके। श्रमायिमह्वा२३यि।
ह्वा। औहो२३४ह्वा। अग्नायिंयाज्ञा३। ह्वा। औ
हो २ ३ ४ ह्वा। षू २ पू २ ३ ४ औहोवा। वा २ ३ ४
याम्(३) ॥ ४ * ॥ [२] ७

अच्छानदृति प्रगाथात्मके चतुर्थ-सूक्ते—

तत्र प्रथमा।

अच्छानःशोरशोचिषज्ञिरोयन्तुदर्शतम्।
अच्छायज्ञासोनमसापुरूवसुम्पुरुप्रशस्तमूतये ॥१॥

---

* ऋ० मा० १२प्र० ३च० ४सा०।

† ऋ० वे० ४, ५, १२, ५।

"अच्छ" अभिमुखं "यन्तु" गच्छन्तु "नः" अस्माकं "गिरः" स्तुतयः। कम्? "शीरशोचिषम्"* अग्नानशीलज्वालं वाग्निं "दर्शतम्" सर्वैर्दर्शनीयम्। तथा "यज्ञासः" यज्ञस्य अस्मदीया "नमसा" हविषा आज्यादि-लक्षणेन "अच्छ" अभिमुखं "यन्तु" गच्छन्तु। कीदृशम्? "पुरुवसुं" प्रभूत-धनं "पुरु-प्रशस्तं" बहुभिः सम्यक् स्तुतम्। किमर्थम्? "ऊतये" अस्माकं रक्षणाय॥ १॥

अथ द्वितीया।

३ २ ३।२ २२ ३ १ १ ३ २ ३ १ १

अग्निꣳहनुꣳसद्दसोजातवेदसन्दानायवार्य्याणाम्।

३ २।३ ३ २ ३ १ १।२ २२ ३ १ २ ३ २

द्वितायोभूदमृतोमर्त्येष्वाहोतामन्द्रतमोविशि॥२॥८

"यः" अग्निः "अमृतः" अमरण-धर्म्मा देवेषु भवति, सः "मर्त्येषु आ" [आकारश्चार्थे] "मर्त्येषु" मनुष्येषु च "अभूत्" अभवत्—इत्येवं "द्विता" द्वैधं भवति। देवेऽप्यमृतत्वमस्य प्रसिद्धम्। मनुष्येषु कीदृशोऽभूत्? उच्यते—"विशि" विशु यजमानरूपासु प्रजासु "होता" होम-निष्पादकः "मन्द्रतमः" मादयिष्टतमश्च भवति। तमच्छ यन्तिति समन्वयः [अथवा 'यः' अमृतः 'द्विता' द्वित्वं द्वैधं द्विःप्रकारोऽभूत्। कथं मर्त्येषु सामान्येन तदाह—पाकादि-साधनो भवद्भिस्तत् प्रसिद्धम्

* 'दीप्तिशीलम्'—इति वि०।

† ऋ० वे० ६, १, १२, ५।

'विशि' यजमानरूपायां तु 'होता' 'मन्द्रतमश्च' अभवद्वित्येवं द्वित्वम्] ॥ २ ॥ ८

॥ कालेयम् ॥ अक्कानाऽःग्रीरशोचिषाम्। गिरो
यन्नू। दर्शंताऽ३म्। अक्कायज्ञाऽ। सो२३४। नम
सापुरु। वाऽ३मम्। पुरुप्रशो। वाऽ३४ओ३४वा। स्त
मूप्रतयायि ॥(१) पुरुप्राऽ३शस्तमूतयायि। पुरुप्रशा। स्त
मूतयाऽ३यि। अग्निꣳहनूऽम्। सा२३४। हसोजा
तवे। दाऽसाम्। दानायवो। वाऽ३४ओ३४वा। रि
याप्णाम् ॥(२) दानायाऽवारियाणाम्। दानायवा।
रियाणाऽ३म्। हितायोभूऽत्। आ२३४। मृतोमर्त्ति
योषूऽवा। चोतामन्द्रो। वाऽ३४ओ३४वा। नमोपृक्षि
ग्रायि। चोपृई। डा(३) ॥ ३ * ॥ [१]

॥ आयस्यीयम् ॥ अक्कानःग्रीरग्रो१चायिषाम्। गि

* ऋ० गा० ११प्र० १अ० ३मा०।

१ १ २ २१२ २२ १२२
रो२यन्नू२। दा२र्शातम्। आच्छायज्ञासोनमसा।
१२ १२२१२२ १ २ १ २
पुरुवा१क्ष२म्। पुरुप्रशस्तमूतये। पू२३रु। प्रशास्ता
२ १ ३२ १ ५ २
३मू। ऊम्। तया३। ओ२३४वा ॥(१) पुरुप्रशस्तमू
२ १ १ १ १ ७
१तायायि। पुरु२प्रशा२। स्तमू२तायायि। आगि
२२१ २२ २ १ २ २ १२२१२
ए३क्षन्नु३सहसोजा। तवायिदा१सा२म्। दानायवारि
२ २ १ १ १ २ २ १ ३२२
याणाम्। दा२३ना। यावा३री। ऊम्। याणा३म्।
१ ५ १ २ २ २ १ १
ओ२३४वा ॥(२) दानायवारी१याणाम्। दाना२यवा
१ ७ २२ १ २२ १
२। री२याणाम्। ह्वायितायोभदस्तोम। तियायि
२ १२ २ २ १ २२ १ २ १
षू१वा२। स्तोतामन्द्रतमोविग्रि। स्तो२३ता। मन्द्रा
२ २ १ ३ २ १ ५ ३ १ १ १
ता३माः। ऊम्। विग्रा३। ओ२३४वा। स्ते २ ३ ४
१
५(३) ॥ ७ * ॥ [२] ८

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य पञ्चदशस्याध्यायस्य
द्वितीयः खण्डः ॥ २ ॥

---

* ऋ० मं० २३प्र० २च० ७मा०।

अथ तृतीय-खण्डे—

अदाभ्यइति तृचात्मके प्रथमे सूक्ते,

प्रथमा ।

१ १ २२ २ २ २ १२ २२
अदाभ्यःपुरएताविशामग्निर्मानुषीणाम् ।

२ २ २२ २२ १२
तूर्णीरथःसदानवः ॥ १ * ॥

"मानुषीणां" मनोर्जातानां "विशां" प्रजानां "पुरएता" सन्मार्ग-दर्शनेनानायतो गन्ता, अतएव "तूर्णीः" तूर्णिताः† प्रजाः विदित-कर्म्मप्रवर्त्तनेनानुगृह्णीतुं त्वरा-युक्ताः आलस्य-रहिताः "रथः" हविषां वहनाद्रथ-सदृशः "सदा" सर्वदा तत्कर्म्मणि "नवः" नूतनः पुनर्मथनादभिनवः, एवंविधोऽग्निः "अदाभ्यः" अहिंस्यः न केनापि तिरस्कार्य इत्यर्थः ॥ १ ॥

अथ द्वितीया ।

२१२.२२ २ १ २ २ १ २ २ १ २
अभिप्रयाꣳसिवाङ्ससादाꣳअश्नोतिमर्त्यः ।

१ २ २ १ २
क्षयम्पावकशोचिषः ॥ २ ‡ ॥

---

* ऋ० वे ३, १, ९, ५ ।

† 'तूर्णीः—त्वरितगामी'—इति वि० ।

‡ ऋ० वे० ३, १, १०, १ ।

"दाखान्" हविषां दाता "मर्त्यः" मनुष्यः यजमानः "वाहसा" हविषां वाहकेनाग्निना "प्रयांसि" अन्नानि "अभि अश्नोति" अभितः सर्वतः प्राप्नोति । किञ्च "पावक-शोचिषः" शोधकदीप्तेः अग्नेः सकाशात् "क्षयं" गृहं चाश्नोति ॥ २ ॥

अथ तृतीया ।

३ १२ २२ ३ २ ३ १ २ ३ २ ३ १ २

साङ्काञ्चिश्वाअभियुजःक्रतुदवानामदृक्तः ।

३ २ ३ १ २

अग्निस्तुविश्रवस्तमः ॥ ३ * ॥ ९

"अभियुजः" अभियोक्त्रीः "विशः" सेनाः "साङ्कान्" सहमानः स्व-बलेन तिरस्कुर्वाणः अतएव "अदृक्तः" शत्रुभिरहिंसितः "देवानां" "क्रतुः" कर्त्ता हविःप्रदानेन पोषकः† । एवभूतः "अग्निः" "तुविश्रवस्तमः" [तुवि-शब्दो बहु-वाची (निघ० ३,१,२), श्रवः-शब्दोऽन्नवाची (निघ० २,७,९)] अतिशयेन बहुविधान्नोपेतो वर्त्तते यस्मादेवं तस्मादस्मानपि बहुविधान्नोपेतान् करोत्विति भावः ॥ ३ ॥ ९

१ २ १ १ २

॥ संहितम् ॥ अदाभ्यःपुरः । आ२यिता । विशा

१ २ १२ १ २

२म् । आ२३गोः । मानू२षाणाम् । तू२३णीः ।

१ ७ २ ५

रा२थाः । सदा२३ । हाउवा३ । ना२३४वाः ॥(१)

---

* ऋ० वे० ३, १, १० २ ।

† 'क्रतुः—यज्ञः'—इति वि० ।

२ १ २र १ २र १ २
अभिप्रयाꣳसि। वा२चसा। दाश्वा२ꣳ। आ२३ग्नी।
१ १ २ १ ७
तिमा२र्त्तायाः। त्रा२३याम्। पा२वा। कामो२ ३।
२ ५ १र १र २र
त्राउवा३। चीर३४षाः॥(२) साङ्क्रान्विश्वाञ्च। भा२
२ २ १ २ १र १
यियुजाः। क्रतू२ः। दा२३यिवा। नामा२मार्क्षाः।
२ १ ७ २
आ२३गोः। तू२वायि। श्रवा२३। त्राउवा३। ता२३
५
४माः(३)॥ ४ *॥ [१] ९

अथ भद्रोनोअग्निराहुत इति प्रगाथात्मके द्वितीयसूक्ते,

सैषा प्रथमा।

२ १ २ ३ १र २र ३ २ ३ १ २ २ १ २ ३ २
भद्रोनोअग्निराहुतोभद्रारातिःसुभगभद्रोअध्वरः।
२ २ ३ १र २र
भद्राउतप्रशस्तयः॥ १ †॥

"आहुतः" हविर्भिस्तर्पितः "अग्निः" "नः" अस्माकं "भद्रः" कल्याणः भवतु। हे "सुभग" शोभन-धनाग्ने! "भद्रा"

---

* ऋ० गा० ११प्र० १अ० ४सा०।

† ऋ० आ० १, १, २, ५ (१भा०२८२पृ०) = ६, १, ३२, ४ = य० वे १५, १८-२९।

कल्याणी "रातिः" दानं चास्माकं भवतु। 'भद्रः" कल्याणः "अध्वरः" यागश्च भवतु। "उत" अपिच "भद्राः" कल्याणाः "प्रशस्तयः" प्रशंसाः स्तुतयश्च भवन्तु॥ १॥

अथ द्वितीया।

३ १२ १२ ३ २ २ १ २ ३ १ १ ३ २

भद्रम्मनःकृणुष्वृत्रतूर्येयेनासमत्सुसासहिः।

११ ३ १ २ ३ २ २ १ १ ३ १ २ ३ १ २

अवस्थिरातनुहिभूरिशर्द्धतांवनेमातेअभिष्टये॥ २*॥ १०

हे "अग्ने!" "वृत्रतूर्ये" सङ्ग्रामे "भद्रं" "मनः" "कृणुष्व" अस्माकं कुरु। "येन" मनसा त्वं "समत्सु" सङ्ग्रामेषु "सासहिः" भृशं शत्रूनभिभवसि। अपिच "शर्द्धताम्" अभिभवतां शत्रूणां "भूरि" भूरीणि बहुनि "स्थिरा" स्थिराणि दृढान्यपि बलानि "अव तनुहि" पराजितानि कुरु। वयञ्च "अभिष्टिभिः" अन्वेषण-साधनैः हविर्भिः स्तोत्रैश्च† "ते" त्वां "वनेम" सम्भजेमहि [यद्वा, 'ते' तव प्रसादात् अभिष्टिभिः अभीष्टैः फलैः 'वनेम' सङ्गच्छेमहि]॥ २॥ १०

---

* ऋ० वे० ६, १, ३२, ५ = य० वे० १५, ३९-४०।

† "अभिष्टिभिः"—इति ऋ०-पाठः य०-पाठश्च।

¶ 'अभिष्टिभिरित्यन्यान्यवेदीय पाठभवलम्ब्यायं व्याचष्टे। विवरणकारेऽवलम्ब्यायं सामवेदीयमेव पाठमवलम्ब्य व्याख्यातम्; तथाहि—'अभिष्टये—अभिष्टिर्यज्ञः तस्मै अभिष्टये'—इति।

२१८२ ४ ५ २ ३ ५ २
॥ सफम् ॥ भद्रोनोऽग्निः। आऽ२३४ताः। भ
१८२८१ १ २ ४ २ ५
द्रारातायिःह्व२। भगभाद्रोऽआ३। ध्वा३२३४रा:।
१ १ २ ४ २ ५
भद्राः। उताप्राऽग्ना३। स्ता३४पूयोऽद्दायि(१)॥५*॥[१]१०

अथाग्नेवाजसोति तृतीय-तृचे,

प्रथमा।

२ ३ १ २ ३ १ २ १ २
अग्नेवाजस्यगोमतऽईशानःसहसोयहो।
२ १ ३ ३ २ ३ १ २
अस्मेदेहिजातवेदोमहिश्रवः॥ १ †॥

हे "सहसः यहो" बलस्य पुत्र! "अग्ने!" "गोमतः" बहुभिर्गोभिर्युक्तस्य "वाजस्य" अन्नस्य "ईशानः" ईश्वरस्त्वमसि। अतः "अस्मे" अस्मासु हे "जातवेदः" जातधन! जातानां वेदितो वाग्ने! "महि" प्रभूतं "श्रवः" अन्नं "देहि" प्रयच्छ। [सहसोयहो—पराङ्गवद्भावात् "आमन्त्रितस्य च (८, १, १९)" —इति षष्ठ्यामन्त्रित-समुदायो निहन्यते। अस्मे—सुपां सु-लुक् (७, १, ३९)—इति सप्तम्याः ये-आदेशः॥ १॥

---

* ऋ० मा० ११म० १ख० ५सा०।

† ऋ० मा० १, १, १, १, (१मा० १११ प०) = ऋ० वे० १, ५, १७, ४ = य० ० १५, २५।

अथ द्वितीया।

१ २ १ १८ १८ २ १ २ २ १ १ २ १
सद्दधानोवसुःकविरग्निरीड्योगिरा।

१ २ २ १ १
रेवदस्मभ्यम्पर्वणीकदीदिहि॥ २ *॥

"सः" अग्निः "दधानः" दीपन-शीलः "वसुः" निवासयिता सर्वेषां, "कविः" क्रान्त-दर्शनः मेधावी वा "गिरा" स्तोत्र-रूपया वाचा "ईड्यः" स्तोतव्यो भवति हे "पर्वणीक" अनीकं मुखं पुरुभिः बहुभिः अनीक-स्थानीयाभिः ज्वालाभिः युक्ताग्ने! "अस्मभ्यं" "रेवत्" धनं-युक्तमन्नं यथा भवति तथा "दीदिहि" दीप्यस्व [दीदेति छान्दसो दीप्ति-कर्मा]॥ २॥

अथ तृतीया।

१ १ १ २२उ २ १ १ २ १८ १८
क्षपोराजन्नुतत्मनाग्नेवस्तोरुतोषसः।

१ २ २ १ १ २ १ १
सतिम्मजन्मरुत्सोदहप्रति॥ ३ †॥ ११

हे "राजन्" राजमान! "अग्ने"! "क्षपः" राक्षसान् स्वकीयैः पुरुषैर्बाधस्व। "उत" अपिच "त्मना" न केवलं मन्यैरेव आत्मना च तान् बाधस्व। कदा? इति चेत्, उच्यते—"वस्तोः" सर्वाण्यहानि‡ "उत" अपिच "उषसः" कालोपलक्षण-

* ऋ० वे० १, ५, १७, ५ = य० वे० १५, २९।

† ऋ० वे० १, ५, १७, ६ = य० वे० १५, ३०।

‡ 'वस्तोः—गृहस्य उपद्रवकराः'—इति वि०।

रात्रीश्च [अत्यन्तसंयोगे द्वितीया (२, ३, ४) सर्वेष्वहःसु सर्वासु रात्रिषु चेत्यर्थः] "हे तिग्मजम्भ" तीक्ष्ण-मुखाग्ने ! "रक्षसः" राक्षसान् उक्त-प्रकारेण जपयित्वा स एव त्वं "प्रति दह" प्रत्येकं प्रतीत्य दह न किञ्चिद्दग्धव्यमित्युदाहरेत्यर्थः ॥ २ ॥ ११

॥ पौष्कलम् ॥ अग्नेवाऽजस्र। गोमा२३४ताः। ईशा
नःसा। वसोया२३४हो। अस्मायिदेहाय। जा
ता२वा२३४५यिदा६५६ः। मह्यिश्रवा२३४५ः(१) ॥ ६* ॥१]

॥ शुध्यम् ॥ अग्नेवाजा२स्य। गोमतोवा। ईशा
नःसा। वसोयहो। अस्मायिदेहिजातवेदोम। हा२३
यि। श्रवाउवा। शूधिया२ ॥(१) सदधानो२व। शु
ष्कवोवा। अगिरोऽयि। नियोगिरा। रेवदस्मभ्यम्पु
र्वणीक। हा२३यि। दिदाउवा। शूधिया२ ॥(२)
वपोराजा२नु। तत्मनोवा। अग्नेवस्तोः। उतोषसः।

---

* ऋ० मा० ११प्र० १अ० ६वा०।

२ १२२ १ २
सतिम्मजभ्मरण्यसोद। ढा२३। प्रताउवा। मूधिया

१ २ १
२। ए२३धिया४३। ओ२३४५ई। डा(३) ॥ ७* ॥ [२] ११

इति सामवेदार्थप्रकाशे उत्तरार्चस्य पञ्चदशस्याध्यायस्य तृतीयः खण्डः ॥ ३ ॥

अथ चतुर्थ-खण्डे—

विशोविशोवोअतिथिमिति त्रचाभके प्रथमे सूक्ते।

प्रथमा।

१ १ २ २ १ २ २ १ १ २ १
विशोविशोवोअतिथिंवाजयन्तःपुरुप्रियम्।

१ २ १ २ २ १ १ १ २ २ १ १ २
अग्निंवोदुर्यंवचःस्तुषेशूषस्यमन्मभिः ॥ १ † ॥

हे ऋत्विजो यजमानाय "वः" यूयं "वाजयन्तः" अन्नमिच्छन्तः "विशः विशः" सर्वस्याः प्रजायाः "अतिथिं" पूज्यं "पुरुप्रियं" बहु-प्रियम् "अग्निं" स्तुत्या परिचरेति शेषः। अहञ्च "वः" युष्मदर्थं "दुर्यं" गृह-हितम् "अग्निं" "वचः" अनु "स्तुषे" स्तौमि "शूषस्य" बलस्य लाभार्थकैः साधनैः "मन्मभिः" मननीयैः स्तोत्रैः ॥ १ ॥

---

* ऋ० मा० ११प्र० १अ० ७सा०।

† ऋ० मा० १, २, ४, ७ (१मा० २४३ पृ०) = ऋ० वे० १, ४, २१, १।

अथद्वितीया।

१२ १२ २ १२ २२ २ १२
यज्जनासोहविष्मन्तोमित्रंनसर्पिरासुतिम्।

१२ २ २ १२
प्रशंसन्तिप्रशस्तिभिः॥ २ * ॥

"यम्" अग्निं "जनासः" जनाः यजमानाः "हविष्मन्तः" सन्तः "मित्रं न" मित्रमिव सखायमिव वा "सर्पिरासुतिं" सर्पिरासूयते क्षयते यस्मिन् तादृशं "प्रशंसन्ति" स्तुवन्ति "प्रशस्तिभिः"॥ २॥

अथ तृतीया।

१२ २ १२ २१ २२३१ २
पन्थांसञ्जातवेदसंयोदेवतात्युद्यता।

३१२ १२ ३१
हव्यान्यैरयद्दिवि॥ ३†॥ १२

"पन्थांसम्" अतिशयेन स्तोतारं साधुतमिति यजमानं स्तुवन्तं "जातवेदसं" जातधनं स्तुमइति वाक्य-शेषः। "यः" अग्निः "देवतातिः" यज्ञे "उद्यता" उद्यतानि "हव्यानि" हवींषि "दिवि" "ऐरयत्" प्रेरयति दिवि देवेभ्यः॥ ३॥ १२

---

* ऋ० वे० ८, ४, २१, १।

† ऋ० वे० ८, ४, २१, २।

॥ श्यावाश्वम् ॥ विश्नो३१। वा ३ यिशे। वोऽ ।
ता३यिथिम्। एद्दिया। वा। जयन्तःपुरु। प्रिया२
म्। एद्दिया२। अग्निंवोदुरो३याऽम्। वा२३४चाः।
णेदा२यि। एद्दिया२। स्तुषेघृषास्वाऽमा३। न्मा३४
५भोऽहायि(१) ॥ ८ * ॥ [१]

॥ आन्धीगवम् ॥ विश्नोविश्नोवो१अतायिथायिम्।
वाजय। तःपू२३रु। ऊम्मा२१ऽ२। प्रियमग्निंवोदुर्य्यं
वचा२३४५ः। स्तुषाऽउवा। स्वू२षा। स्वा२३मा। न्म
भायिः। औ२३होवा ॥(१) स्तुषेघृषस्वमान्माभायिः।
यज्ञना। सोदा२३वा। ऊम्मा२१ऽ२। यस्तोमिचस्व
सख्यिं रास्तमा२३४५यिम्। प्राप्रा३उवा। सा२न्तायि।
प्रार३प्रा। स्तिभायिः। औ२३होवा ॥(२) प्रप्रयन्ति

* ऊ० मा०.११५० १च० ८खा०।

प्रशा१स्तायिभायिः। पन्याएसम्। जाता२३वा। ऊ
म्मा२१२। दसंयोदेवतात्युद्यता२३४५। दाव्या३उवा।
ना२षायि। रा२३यात्। दिवा। औ३द्योवा। द्यो
५ई। डा(३) ॥ ८ * ॥[२]

॥ यज्ञायज्ञीयम्॥ विशोऽपुवि। शोश्वोा३अतायि
थायिम्। वाजयन्ताः। पू३रूप्रोा३याम्। अग्रा२यिं
वः। दुरो२३याम्। ऊम्मायि। वाा३चाः। स्तुषेप्रुष
स्मा२३न्मभाउ॥(१) स्तुषायि। प्रुषस्मन्मभिर्यज्ञना
सो। दाा३वायियाा३न्ताः। मित्रा२३न्न। सर्प्या२३यि
रा। ऊम्मायि। स्तु३तायिम्। प्राग्रएसन्तिप्रशा२स्ति
भाउ॥(२) प्राशा। सन्तिप्रशस्तिभःपन्याएसज्जा। ता

* ऋ० मा० ११०अ० १ख० ८सा०।

१ २ २.१ ८ १ ८ ९ १
ऽवायिदाꣳसाम्। योदे२व। ताता२३ज। ऊम्माधि।
१ २ १ ८ ८ ३१
याꣳता। ह्वाव्यान्यैरवा२ह्विाउ(३) ॥ १० * ॥ [३]

॥ गौरीवितम् ॥ ५ ३१ ४८ ५
विश्नः। विश्नो३। वोअतिथायिम्।
१८ १ ८४ ४
वाजयन्तःपुरुप्रियाꣳम्। आग्निंवोदू३१२३। रियाꣳ५
१८ ८१ ४ ५ ४ ५
पूवचाः। ख्वषेपूषाꣳ१२३। स्यमोवा। न्मा५भोदिहा
यि(१) ॥ २ † ॥ [४] १२

अथ द्वितीय-ऋचे—

प्रथमा।

१ २ ३२ ३ १ २ ३ १ ३ ३
समिद्धमग्निꣳसमिधागिरागृणे
१ १ ३ २ ३ १ २ ३ २ ३ १
घृतचिम्यवकम्पुरोचध्वरेध्रुवम्।
२३ १ २ ३ १ २ ३ १
विप्रꣳहोतारम्पुरुवारमद्रुहं
३ २ ३ १ २ ३ १ २
कविꣳसुम्नैरीमहेजातवेदसम् ॥ १ ‡ ॥

---

* ऋ० मा० ११प्र० १च० १०षा०।

† ऋ० मा० १८प्र० १च० १षा०।

‡ ऋ० मे० ४, ५, १२, २।

"समिद्ध" सम्यग्दीप्तम् "अग्निं" "समिधा" समिन्धन-हेतु-भूततया "गिरा" स्तुत्या "गृणे" अहं स्तौमि [यद्वा, 'समिधा' समिद्भिर्दारुभिः 'समिद्धं' सम्यक् दीप्तम्]। अपिच "शुचिं" स्वयं शुद्धं "पावकं" सर्वेषां शोधकं "घृतं" नित्यं तमग्निम "अध्वरे" यज्ञे "पुरः" करोमीति शेषः। तथा "विप्रं" मेधाविनं "होतारं" देवानामाह्वातारं "पुरुवारं" बहुभिर्वरणीयम्* "अद्रुहम्" अद्रोग्धारं सर्वेषां मनुकूलं "कविं" क्रान्त-दर्शनं "जातवेदसं" जातानां वेदितारमग्निं "सुम्नैः" सुखकरैः स्तोत्रैः "ईमहे" सम्भजामहे [यद्वा, द्वितीयार्थे तृतीया (२, १, ८५)। सुम्नानि धनानि, ईमहे याचामहइति ॥ १ ॥

अथ द्वितीया।

२ १ १ २ ३ १ १ ३ १ २
त्वान्दूतमग्नेअमृतंयुगेयुगे
२ १ १ २ १ २ २
हव्यवाहन्दधिरेपायुमीड्यम्।
२ १ २ १ १ २ २ १ १ ३ २
देवासश्वमर्त्तासश्वजागृविंविभुं
३ २ ३ १ २ १ १ २
विश्पतिन्नमसानिषेदिरे ॥ २ † ॥

---

* 'पुरुवारं—पुरुवाजं, बहुभिर्वाजैर्युक्तम्,—इति वि०।

† ऋ० वे० ७, ५, १८, ३।

हे "अग्ने !" "त्वां" "देवासः" देवाश्च "मर्त्यासः" मनुष्याश्च "दूतं" "दधिरे" विदधिरे कृतवन्तः । कीदृशं त्वाम् ? "अमृतम्" अमरणम्, "युगे युगे" काले काले तद्यागानुष्ठान-समये "हव्यवाहं" हविषां हव्यानां वोढारं "पायुं" पालयितारम्* "ईड्यं" स्तुत्यम् । अपिच ते उभयविधा; "जागृविं" जागरणशीलं† "विभुं" व्याप्तं विश्पतिं विशां प्रजानां पालयितारम् अग्निं "नमसा" हविर्लक्षणेनान्नेन नमस्कारेण वा "निषेदिरे" उपसेदिरे ॥ २ ॥

अथ तृतीया ।

३१२ ३२१ २२३२
विभूषन्नग्न उभयाꣳ अनुव्रता

२२३ २ ३ ११३ १२
दूतो देवानाꣳ रजसी समीयसे ।

१२३ १ २३ २ ३१२
यक्षे धीतिꣳ सुमतिमावृणीमहे

१२ ३ १२ ३ १२
धस्मान स्त्रिवरूथः शिवो भव ॥ ३ ॥ १३

---

* पायुं—पानीयं सोमम्—इति वि० ।

† 'जागृविम्—जनान् दयास्निग्धत्वेन यो जागर्त्ति स जागृविः तम् जागृविम्—इति वि० ।

‡ ऋ० वे० ४, ५, १२, ४ ।

हे "अग्ने!" उभयान् "उभयविधान् देवान् मनुष्यांश्च* "विभूषयन्" अलङ्कुर्वन् त्वम् "अनुव्रता" व्रतान्यनु † "व्रतेषु" कर्मसु यागेषु "देवानां" "दूतः" सन् "रजसी" द्यावापृथिव्यौ "समीयसे" सञ्चरसि देवानां नेतुं द्युलोकं गच्छसि हवींषि भजामहे। "अध" अतः कारणात् "विश्वरथः" विश्वानस्त्वं ‡ "नः" अस्माकं "शिवः" सुखकरः "भव" "सः" [—इति पदपूरणम्]॥ ३ ॥ १३

॥ यज्ञायज्ञीयम्॥ समाऽ५यिष्वम्। आऽग्नाऽयिऽ
समिधा। गायिरागृणेषूचिम्यावकम्पुरोआ। ध्वाऽरा
यिध्रऽवाम्। विप्रा२ऽहोतारम्पुरुवारमद्रु। चक्षा२ऽ
वीम्। ऊम्मायि। सू३म्नाईः। आयिमचेजातवा२यि
दसाउ॥(१) सान्त्वाम्। दूतमग्ने अमृतम्पुगेयुगेहव्यवा
चन्दधिरेपा। यूऽमायिडाऽयाम्। देवा२ऽसश्चमर्त्तास
श्चजागृ। विंवा२ऽयिभूम्। ऊम्मायि। वाऽयिश्रपा।

---

*'उभयान्—मृत्विजो मनुष्यांश्च'—इति वि०।

†'अनुव्रताः—अरक्षं प्रपन्नाः'—इति वि०।

‡'विश्वरथः—विश्वानम् गार्हपत्यादि अथवा भूलोकादि'—इति वि०।

तायिन्नमसानिषा२यिदिराउ ॥(२) रायिवायि। भूषन्न
ग्राउभयाएअनुव्रतादूतोदेवानाएरजसी। सा३ मीया३
सायि। यत्ते२धीतिएसुमतिमावृणीम। द्यआ२३धा।
ऊम्मायि। स्मा३नाः। त्वायिवरूथःग्निवो२भवाउ। वा
३४५(३) ॥ ११* ॥ [१]

॥ कावम् ॥ समोवा। ध्वमग्निएसमिधा। गिरा
गार्णा२यि। प्रुचिम्पावकम्पुरोआ। ध्वरेध्रूवा२म्।
विप्रएहोतारम्पुरुवा। रमद्र हा२३म्। कावोएद्यन्ना
यिः। ईमद्दायिजा२३। तावा३यिदा५सा६५६म् ॥(१)
तुवोवा। दूतमग्नेअस्कृताम्। युगेयूगा२यि। द्यव्यवा
द्यन्दधिरेपा। युमीडाया२म्। देवासस्थमर्त्तासाः। च
जागृवा२३यिम्। वायिभू३वायिष्णा। तिन्नमासा२३।

* ऊ० मा० ११०५० १च० ११मा०।

१ २ ४ २१
नायिषा३यिदा५यिरा६५६यि॥(२) विभोवा। षन्नग्नउ

२ १ १२ २ २ २ २ २ २
भयाए। अनुव्रता२। दूतोदेवानाएरजसी। समी

१ १ २ २ २ २ १ २
यासा२यि। यन्तेधीतिएसुमतिमा। वृणीमाहा२३थि।

१ २ ४ ५ १ २ ४
आधाइस्मानाः। त्विवरुथा२३ः। शायिवोइभापूवा ६ ५

६(३)॥ १२*॥ [२] १३

अथ तृतीय-सूक्ते—प्रथमा।

११ २ २३ २ ३१ १ ३ १ ३
उपत्वाजामयोगिरोदेदिशतीर्हविष्कृतः।

३ १२ २२
वायोरनीकेअस्थिरन्॥ १†॥

हे अग्ने! "हविष्कृतः" यजमानार्थं "गिरः" स्तुतयः "जामयः" स्वसारइव "देदिशतीः" तव गुणान् दिशन्त्यः "त्वा" त्वाम् "उप अस्थिरन्" उपतिष्ठन्ते "वायोरनीके" समीपे त्वां समेधत्यः अस्थिरंश्च॥ १॥

---

* ऋ० मं० ११म० १अ० १२सा०।

† ऋ० आ० १, १, १, ३ (१भा० ११३ पृ०) = ऋ० वे० ६, ७, ११, १।

अथ द्वितीया।

१२ ३ १२ २२ ३ २ ३ १२ २२
यस्त्रिधात्वृतम्बर्हिस्तस्यावसन्दिनम्।

१ २ ३ १२ ३१
आपश्चिन्नि दधापदम् * ॥ २ ॥

"यस्य" अग्नेः "त्रिधातु" त्रिपर्व "ऋतम्" अनाहतं च "अवन्दिनम्" अबद्धञ्च स्तरण-काले बर्हिरवद्यं भवति "बर्हिः" "तस्थौ" आसदनार्थं तिष्ठतीत्यर्थः ॥ २ ॥

अथ तृतीया।

३ २ ३ १ २ ३ १२ २२ ३ १ २
पदन्देवस्यमीढुषोनाधृष्टाभिरूतिभिः।

३ १२ २२ ३ २
भद्रासूर्यदृवोपदृक् ॥ ३ ‡ ॥ १४

"मीढुषः" कामानां सेक्तुः "देवस्य" द्योतमानस्याग्नेः पदं स्थानं "धृष्टभिः" शत्रुभिः अबाधिताभिः "ऊतिभिः" रक्षाभिः भजनीयं भजतीत्यर्थः। तथैवास्य "उप दृक्" उपदृष्टिरपि "सूर्य इव" यथा सूर्यः तद्वत् "भद्रा" मनुष्यैर्भजनीया भवति ॥ ३ ॥ १४

---

* ऋ० वे० ६, ७, ११, ४।

† 'त्रिधातु—स्वर्ण-रजत-लाक्षैः त्रिभि र्धातुभि. यथा वा त्रिधातु इति पदपूरणः' —इति वि०।

‡ ऋ० वे० ६, ७, ११, ५।

॥ वारवन्तीयोत्तरम् ॥ उपत्वाजा। औहोहायि।
मायोगा२३४थिराः। देदायिग्रा२३४च्चा। तीर्त्वविष्का
३४। औहोवा। इहा२३४हायि। उरुवा२३४र्त्ताः।
वायोर। नायिकेअस्था३४। औहोवा। इहा२३४च्चा
यि। औहो३१२३४रान्। एच्चियाईच्चा ॥(१) यस्यत्रिधा
औहोहायि। तूआवा२३४र्त्ताम्। बर्हायिस्ता२३४हा
यि। स्थावसन्दा३४। औहोवा। इहा२३४च्चायि। उ
रुवा२३४नाम्। आपश्चित्। नायिदधापा३४। औ
होवा। इहा२३४हायि। औहो३१२३४दाम्। एच्चिया
ईहा ॥(२) पदन्देवाऔहोचायि। स्थामायिढू२३४च्चा।
अनाधा२३४च्चा। ष्ठाभिरुता३४औहोवा। इहा२३४च्चा
हायि। उरुवा२३४भीः। भद्राच्च। व्यादित्रोपा३४औ

४ ५ १ ३ ५ ११ २ ५ ४
द्दोवा। दूद्दा२३४द्दावि। औद्दो३१२३४द्दुक्। एद्दिया

५ ४
ई३द्दा। द्दोपूई। डा(३) ॥ १२ * ॥ [१] १४

इति सामवेदार्थप्रकाशे उत्तरार्चस्य पञ्चदशस्याध्यायस्य

चतुर्थः खण्डः* ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ १५ ॥

॥ इति सप्तमस्य द्वितीयोऽर्धप्रपाठकः† ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्येण विरचिते माधवीये सामवेदार्थप्रकाशे
उत्तरार्चे पञ्चदशोऽध्यायः ॥ १५ ॥

---

* ऋ० मा० ११प्र० १अ० ११सा०।

† 'सप्तमाच्चाग्निहुतः चिदतो मर्धे * * *'—इति वि०।

‡ 'सप्तमस्य द्वितीयोऽध्यायः समाप्तः'—इति वि०।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १६ ॥

॥ अथ षोड़शोऽध्यायआरभ्यते* ॥

तत्र,

प्रथमे खण्डे —

अभित्वापूर्वपीतयइति प्रगाथात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

३ १ १ २ १ २ ३ १ २ १ १ ३ १ २
अभित्वापूर्वपीतयइन्द्रस्तोमेभिरायवः ।

१ १ १ २ २ १ २ ३ १ २ ३ १
समीचीनासऋभवःसमस्वरन्रुद्रागृणन्तपूर्व्यम् ॥१†॥

हे "इन्द्र !" "आयवः" मनुष्याः स्तोतारः "स्तोमेभिः" स्तोत्रैः "त्वा" त्वाम् अभिष्टवन्ति । किमर्थम् ? "पूर्वपीतये" सर्वेभ्यो देवेभ्यः पूर्वं प्रथमतएव सोमस्य पीतये पानाय [सवन-मुखे हि चमसंगणैरिव सदस्यैव सोमो ह्रियते] तथा "समीचीनासः" सम्यताः "ऋभवः" [प्रथम-वाचकेन शब्देन

---

* 'इदानीं सर्वेस्वारब्ध, पुनस्तानुभाख्याति'—इति वि० ।

† ऋ० भा० ३, २, १, ४ (१भा० ५२९ प०) = ऋ० वे० ५, ७, २२, २ ।

त्रयोऽप्युपलक्ष्यन्ते] ऋभुर्विभ्वावाज इत्येते "समस्वरन्" त्वामेव सम्यगस्तुवन् [स्वृ शब्दोपतापयोः(भ्वा०प०)] "रुद्राः" रुद्रपुत्रा महतश्च "पूर्व्यम्" पुरातनं हरिं त्वामेव "गृणन्त" अभ्यस्तुवन् हत-बध-समये 'प्रहर भगवो जहि वीरं जयस्व'—इत्येवं रूपया वाचा त्वां स्तुतवन्त इत्यर्थः ॥ १ ॥

अथ द्वितीया।

३ १ १ २ २ ३ १ ३ १ १ ३ २ ३ १ २
अस्येदिन्द्रोवावृधेवृष्णश्चग्वोमदेसुतस्यविष्णवि।

३ १ १ २ २ ३ १ १ ३ १ १ २ ३ १ २
अद्यातमस्यमहिमानमायवोनुष्टुवन्तिपूर्वथा ॥ २* ॥ १

"अस्येत्" अस्यैव † यजमानस्य "वृष्णः" वृषत्वं वीर्यं "शवः" बलं च "इन्द्रः" "वावृधे" वर्धयति "सुतस्य" अभिसुतस्य सोमस्य पानेन "विष्णवि" कृत्स्न-देहस्य व्यापके "मदे" हर्षे सति तस्यैव यजमानस्य बलं वर्धयतीत्यर्थः। "अद्य" अस्मिन् काले "अस्य" इन्द्रस्य "तम्" उक्तगुणं "महिमानं" महत्वम् "आयवः" मनुष्याः ‡ "अनु ष्टुवन्ति" तस्यानुपूर्वेण स्तुवन्ति, "पूर्वथा" [पूर्वशब्दादिवार्थे "प्रत्न"पूर्व (४, ३, १११) इत्यादिना था-प्रत्ययः] यथा पूर्वस्मिन् काले अस्तुवन् एव मिदानीमपि तेनैव क्रमेणैव स्तुवन्तीत्यर्थः ॥ १ ॥ १

---

* ऋ० वे० ५, ७, १९, २।

† 'इत्—इति परपूरणः'—इति वि०।

‡ 'आयवः—ऋत्विग्यजमानौ'—इति वि०।

॥ षट्कारणिधनम् ॥ अभित्वापूर्वपीतये। अभि
त्वाऽपूवपीतयाये। इन्द्रस्तोमेभीऽरायवाऽः। भिस्ता
याऽवाऽरः। ओमोऽवा। समीचीनासऽआभवःसाऽमा
स्वराऽन्। समास्वाऽराऽरन्। ओमोऽवा। रुद्रागृ
णन्ताऽपूर्वियाऽम्। तपूर्वाऽयाऽरम्। ओ३। वाऽ३
४ओहोवा ॥(१) रुद्रागृणन्तपूर्वियम्। रुद्रागा३णंतप्
र्वियाम्। रुद्रागृणन्ताऽपूर्वियाऽम्। तपूर्वाऽयाऽरम्।
ओमोऽवा। अस्मेदिन्द्रोवावृधेवृष्णीऽयाऽश्वाऽः।
ष्णियाऽश्वाऽवाऽरः। ओमोऽवा। मदेसुतस्याऽवा
यिष्णवाऽयि। स्ववायिष्णाऽवाऽरयि। ओम्। ओ
२। वाऽ३४। ओहोवा ॥(२) मदेसुतस्यविष्णवि। म
देसुतस्यविष्णवायि। मदेसुतस्याऽवायिष्णवाऽयि।
स्ववायिष्णाऽवाऽरयि। ओमोऽवा। अद्यातमस्यमद्धि

मानाऽमायवा२:। नमाया१वा२३:। ओमोऽवा। अ
नुष्टुवन्तीऽपूर्वथा२। तिपूर्वा१था२३। ओम्। ओ२।
षा२३४ओऽहोवा। ऊ२३४पा(३) ॥ १६* ॥ [१]

॥ कण्वरथन्तरम् ॥ आभित्वापूर्ण्वपीतयायि। इन्द्र
स्तोमायि। भीऽरायाऽवाः। समीचीनासऋभवःसम
स्वरा२३४नैहो। रुद्रागा२३४र्णा। तपू३ आउवा२३।
ए३। विथमा ॥(१) रुद्रागृणतपूर्वियाम्। आऽस्थेदा
ऽयिन्द्राः। वावृधेवृष्मियऽग्नवा२३४ऐहो। मदेऽह२३४
ता। स्वाऽ१उवा२३। ए३। ष्णविया ॥(२) मादेषु
तस्यविष्णवायि। आऽद्याताऽमा। स्यमहिमानमायवा
२३४ऐहो। अनुष्टू२३४वा। तिपू३आउवा२३। ए३र्वथ
आ(३) ॥ १६† ॥ [२] १

---

* ऊ० मा० ११प्र० १अ० १६षा०। † ऊ० मा० २२प्र० १अ० १६षा०।

प्रवामर्चन्त्युक्थिनइति चतुर्ऋचं द्वितीयं सूक्तम्,
तत्र प्रथमा।

१ १ ३ १ २ ३ १ १ ३ १ १
प्रवामर्चन्त्युक्थिनोनीथाविदोजरितारः।

१ १ ३ १ १ १ २
इन्द्राग्नीइषआवृणे॥ १ *॥

हे "इन्द्राग्नी!" "उक्थिनः" [उक्थं शस्त्रं तद्वन्तः]शस्त्रिणः स्तोत्रादयः "वां" युवां प्रार्चन्ति—इह कर्मणि स्तुतिरूपाभिर्वाग्भिः पूजयन्ति। तथा "नीथाविदः" स्तोत्राभिज्ञाः साम,ज्ञानकुशला "जरितारः" स्तोतारः उद्गात्रादयः अभिलषित-फलावाप्तये युवामर्चन्ति। अहमपि "इषः" अन्नस्य लाभार्थम् "इन्द्राग्नी" युवाम् "आ वृणे" सर्वतः सम्भजे पूजयामीत्यर्थः॥१॥

अथ द्वितीया।

१ १ ३ १ १ ३ १ १
इन्द्राग्नीनवतिम्पुरोदासपत्नीरधूनुतम्।

३ १ १ ३ १ १ १
साकमेकेनकर्म्मणा॥ २†॥

हे "इन्द्राग्नी!" "दासपत्नीः" दासयन्ति उपक्षयन्तीति दासाः उपक्षयितारः शत्रवः, तेषां पतयः पालकाः यासां ता दासपत्नीः "नवतिं" नवति-सङ्ख्काः "पुरः" एवंविधाः शत्रु-

---

* सर्वेयं पुनः ८, २, १७, १ = ऋ०वे० ३, १, ११ १

† सर्वेयं पुनः ८, २, १७, ३ = ऋ० वे० ३, १, १२, १।

पुरीः "एकेन कर्मणा" एकेनैवोद्योगेन युवां "साकं" सह युगपत् "अधूनुतम्" अकम्पयतं, तावित्युक्त्वा आह्वयामीति शेषः ॥१॥

अथ तृतीया।

१ २ ३ १ १ २ २७ ३ १ २ ३ १ १
इन्द्राग्नी अपसस्पर्युप प्रयन्ति धीतयः।

२ १ १ २ २ १ २
ऋतस्य पथ्या अनु ॥ ३ * ॥

हे "इन्द्राग्नी!" "धीतयः" सोमस्य धातारः पातारो होत्रादयः "ऋतस्य" कर्म-फलस्य "पथ्याः" पथः मार्गान् "अनु" लक्षीकृत्य "अपसः" अस्माभिः क्रियमाणस्य परितः सर्वतः समीपे "पर्युप" "प्र यन्ति" प्रकर्षण वर्त्तन्ते अतः सोमपानार्थं युवामागच्छतमिति भावः [यद्वा,'धीतयः' 'ऋतस्य' यज्ञस्य 'पथः' मार्गान् 'अनु' लक्षीकृत्य 'अपसः' कर्मणः 'परि' परितः 'उप प्र यन्ति' प्रवर्त्तन्ते, अतः स्तोतव्यतया युवामागच्छतामिति ॥ ३ ॥

अथ चतुर्थी।

१ २ २ १ २ २ १ २ २ १ २
इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च।

२ १ २ १ १ २ २
युवोरप्नुर्यं क्षितम् ॥ ४ † ॥ २

---

* ऋचैव पुनः ८, २, १४, २ = ऋ० वे० ३, १, १२, २।

† ऋचैव पुनः ८, २, १४, १ = ऋ० वे० ३, १, १२, ४।

हे इन्द्राग्नी! "वां" युवयोः "तविषाणि" बलानि "प्रयांसि अन्नानि* "च" "सधस्थानि" सहस्थितानि परस्परमवियुक्त्य वर्त्तन्ते। तथा "असूर्यं" दृष्टिधारायाः प्रेरकं त्वं "युवोः" युवयोरेव "हितं" निहितं वर्त्तन्ते तस्मात् सोमपान प्रभृतिषु सर्व-कर्मसु इन्द्राग्नोः सहैव वर्त्तनमिति भावः [सधस्थानि—ष्ठा गति-निवृत्तौ च (भ्वा० प०) "आतोऽनुपसर्गे कः (३,२,३)" "सधमाद्यस्थयोश्छन्दसि (६, ३, ९६)—इति सस्य सधादेशः ॥ ४ ॥ २

अथ ग्रन्थ ऋषिति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

३ २ १ २ २ १ २ १ २ ३ १ २
ग्रन्धूग्रऽश्वुग्रचीपतइन्द्रविश्वाभिरूतिभिः।

२ १ ३ ४ २ २ १ १ २ ३ २ १ १ २ २ १ १
भगन्नहित्वायग्रसंवसुविदमनुग्रूरचरामसि॥१॥

हे "ग्रचीपते!" "इन्द्र!" "ग्रन्धि" "विश्वाभिः" सर्वाभिः "ऊतिभिः" मरुद्भिः सह। हे "शूर हे वीर! "भगं न" भाग्यमिव "यशसं" यशस्विनं "वसुविदं" धनस्य लम्भकं "त्वा" त्वाम् "अनु चरामसि" अनुचरामः परिचरामइत्यर्थः॥ १ ॥

---

* 'प्रयांसि—प्रकर्षेण यातव्यान्यध्वरादि यज्ञरूपाणि'—इति वि०।

† ऋ० भा० ३,३, १,(१भा० ५२१ पृ०) = ऋ० वे० ६, ५, १५-५।

अथ द्वितीया।

१ १र २र ३ १र २र३ १ २ ३ १ १
पौरोअश्वस्यपुरुकृद्गवामस्युत्सोदेवहिरण्ययः।

१ ३ १र २र ३ १ १ ३ २उ ३ १ ३ १र २र
नकिर्हिदानम्परिमर्ध्दिषत्तेयद्यामितदाभरः॥ २*॥३

हे इन्द्र। त्वम् "अश्वस्य" "पौरः" पूरयिता† "असि" भवसि। तथा गवां "पुरुकृत्" बहुकर्तासि। हे "देव" "हिरण्ययः" हिरण्मय-शरीरस्वम् "उत्सः" उत्स-सदृशोऽसि। हे इन्द्र "त्वे" त्वयि वर्त्तमाने "दानम्" अस्मद्विषये देयं धनं वा "न किर् हि परि मर्द्धिषत्" न कश्चित् हिनस्ति। अतो "यद्य द्यामि' तत्तदाभर मह्यम्॥ २॥ ३

१ र र र १
॥ हारायणम्॥ अग्ध्यू षुणोहो३इन्द्रचीपतायि। आ

र र २ १ १र
यिग्द्रविस्वाभिरुतिभिः। भगान्ना३ही। त्वायशसाम्।

२ १ १ १ र २
वस्व३दायि। वायिदा३म्। अनुशूरचरोवा३ओ२३४

४ ४ ४ १ र र र १
वा। मा५सो६दायि॥(१) अनुशूरोहो३यिचरामसा

र र २ १ १ १
यि। अनुशूरचरामसि। पौरोआ३श्वा। स्यपुरुकृत्।

---

* ऋ० वे० ६, ४, ११।

† 'पौरः—पुरो भवः पौरः'—इति वि०।

२ २ १ १ २ २ १
गवाइएच्चायि। आसा२यि। उत्सोदेवच्चिरोवा३ओ२३

५ ४ ५ १ २ २ १
४वा। एयापुयोहच्चायि॥(२) उत्सोदेवोच्चो२यिच्चिरण्य

२ २ २ २ १
याः। उत्सोदेवच्चिरण्ययः। नकायिर्हा३यिदा। नम्य

२ ३ १ १ २ २
रिमा। धिषा३हायि। तूवा२यि। यद्यद्यामितदोवाइ

५ ४ ५
ओ२३४वा। भापुरोहच्हायि(३)॥१८*॥[१]

५ ४ २ ४ ५२ ४ ५ १
॥ अभीवर्त्तम्॥ शग्धाइऊइषुशचीपतोवा। आयि

२ २ १ १ १ २
न्द्रविश्वा। भिहूताःयिभा२यिः। भागन्नच्चाइ२२४यि।

३२ ४४ २ १ २ १ २ ३ २
त्वायशसम्। वसूवाःयिदा२म्। अनूशूःरा२। चरा

१ ३ १ १ १ १ ५ ४ २ ४ ५
३। मा२३४५। सा२३४५यि॥(१) अनूइशूइरचराम

४ ५ १ २२ १ २ १ २ २
सोवा। आनुशूर। चरामाःसा२यि। पौरोअश्वाइ१

२३४। स्यपुरुहूत्। गवामाःसा२यि। उत्सोदाःयि

३ २ १ ३ १ १ १ १ ५ ४ ३
वा२। चिराइण्या२३४५। याइ३४५ः॥(२) उत्सोइदेइ

---

* ऊ० गा० १२प्र० १ष० १८ऋ०।

४ ५ ४ ५ १ २ २२ १ २ १
वहिरण्ययोवा । ऊत्सोदेव । हिराण्या१या२: । ना

२ २ ४ ५ २ १ १ १
किर्हिदा३१२३४ । नम्परिम । धिषात्तू१वा२यि । यद्या

२ ३ २ १ ३ १ १ १ १
द्या१मा२यि । तदा३ । भा२३४५ । रा२३४५(३) ॥६*॥[२]

२ २ २ ३ ४ १
॥ मानवम् ॥ अग्ध्यू । शचीपा२३४तायि । अ

३ ५ १ २ २ २
चायिपा२३४तायि । आयिन्द्रविश्वा । भिरूता१यिभा२

१ २ १७ २ १ ३
यि: । भगम् । नहि । त्वायग्रमा३म् । वसू२वा२३४

५ १ २ २ १ १ ३ ५ २ २ ३
यिदाम् । अनुशूरा२३ । चा२रा२३४औहोवा । मा२३

४सो ॥(१) अनुशूरा । चरामा२३४साय‍ि । चरामा२ ३ ४

५ १ २२ १ २ २ २
साय‍ि । आनुशूर । चरामा१सा२यि । पौ । र: । अश्व ।

१७ १ १ ३ ५ १ २२ २ १
स्यापुरूकृ४त् । गवा२मा२३४साय‍ि । उत्सोदेवा २ ३ ।

१ ३ २ ५ २ २ २ २
चा२यिरा२३४औहोवा । ण्या२३४या: ॥(२) उत्सोदेवा ।

३ २ ५ २ ३ ५ १ २ २ १
हिरण्या२३४या: । हिराण्या२३४या: । उत्सोदेवहिरा

* ऊ० गा० ११प्र० २अ० ६सा०।

२ १ २ र १० २ १
ण्या१या२ः। नाकिः। हिदा। नापरिमा३। धिषा

३ ५ १ १ र १ १ ३ ५ र र
२त्तू२३४वायि। यद्यद्यामा२३यि। ता२दा२३४ओहोवा।

३ ५
भा२३५रा(३) ॥ ११ * ॥ [३] ३

अथ त्वंह्येहिचेरवइति प्रगाथात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

२३ ३ १ १ १२३ ३ १ २
त्वꣳह्येहिचेरवेविदाभगंवसुत्तये।

१ २ ३ १ २ ३ १ ३ १ २
उद्दावृषस्वमघवन्गविष्टयउदिन्द्राश्वमिष्टये ॥ १ † ॥

हे "इन्द्र!" "त्वं हि" त्वं खलु सामर्थ्यादेतेति गम्यते। अतः "एहि" आगच्छ। आगत्य च अस्मभ्यं "भगं" भजनीयं धनं "विदाः" लभस्व दत्स्व। किमर्थम्? "वसुत्तये" अस्माकं वसु-दानाय। हे "मघवन्" धनवन्! "गविष्टये" गा इच्छते मह्यं "उद्दावृषस्व" उत्सिञ्च गाइति शेषः। तथा हे इन्द्र! "अश्वमिष्टये" अश्वेषणवते मह्यम् अश्वान् उद्दावृषस्व उत्सिञ्चस्व देहि॥ १ ॥

---

* ऊ० गा० १८प्र० २अ० ११मा०।

† ऋ० आ० ३, १, ५, ८ (१मा०४९०४०)= सा० वे० ९. ५, ३९, १।

अथ द्वितीया ।

२ ३ २ ३ १ २ ३ १ २ ३ २ १ १ २
त्वम्पुरूसहस्राणिशतानिचयूथादानायमꣳहसे ।
१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
आपुरन्दरꣳस्वक्रमविप्रवचसद्न्द्रङ्गयन्तोवसे ॥ २ * ॥ ४

हे इन्द्र ! त्वं "पुरू" पुरूणि बहूनि "सहस्राणि शतानि च" "यूथा" गवादि-यूथानि "दानाय" यजमाना-विषयाय "मंहसे" अनुमन्यसे [यद्वा, दानाय दात्रे यजमानाय मंहसे प्रयच्छसि । मंहति दानकर्मा (निघ० ३, २०, १०)] अथ परोक्षेण ब्रवीति—"पुरन्दरं" शत्रु-पुराणां दारयितारम् "इन्द्रम्" "अवसे" रक्षणाय तर्पणाय वा "गायन्तः" स्तुवन्तः विप्रवचसः" विविध-प्रकृष्ट-वचना वयम् "आ" आगन्तारम् अभिमुखं वा "चक्रम" कूर्मः ॥ २ ॥ ४

॥ कौल्मलबर्हिषम् ॥ ५ ४ २ ४ २ ५ २ १
तुवाꣳइचोꣳइचिरवायि । वि
१ २ १ २ २ २ १ २ २
दाभगवꣳइत्तायाꣳइयि । उद्वावृषस्वमघावान् । ऐ
१ १ २ २ १ ५
ढोयि । गाꣳइविष्टयायि । उदिन्द्राश्वमोवाꣳओꣳइवा ।
५ ५ ४ २ ४ ५ १
ष्टाꣳइयोꣳइहायि ॥(१) उदाꣳइयिन्द्राꣳअश्वमिष्टयायि । उदि
२ १ २ २ १ २ २ १
न्द्राश्वमाꣳइयिष्टायाꣳइयि । त्वम्पुरूसहस्राणी । ऐढो

* ऋ० वे० ६, ४, २६, २ ।

यि। ग्रा२तानिचा। यूथादानायमोवा३ओ२३४वा।
ह्वा५सोऽहायि ॥(२) यूथा३दा३नायमꣳहसायि। यूथा
दानायमा२ꣳहासा२३४यि। आपुरन्दरच्चक्रमा। ऐ
च्चोयि। विप्रा२वचसाः। इन्द्रङ्गायन्तोवा३ओ२३४वा।
वा५सोऽहायि(३) ॥ १९ * ॥ [१]

॥ कण्वबृच्चतं ॥ औच्चोतुवꣳहिया३ए। च्चियायिरा१
वा२३४यि। च्चाहोयि। वायिदाभगंवसुत्तये। उद्वा
वा१र्षा२३४। हाच्चो। स्वामघवन्। गवायिष्टा१या२
३४यि। हाहोयि। उदायिन्द्रा१आ२३४। च्चाहो।
उदाआ१यिन्द्रा२३४। हाच्चो। स्वमा३यि। ष्टा२३४
यायि। उऊवाऽहाउ। वा ॥(१) औहोउदिन्द्रआ३ए।
स्वमायिष्टा१या२३४यि। च्चाच्चोयि। तूवम्पुरू। सहा

* ऊ० गा० ११प्र० १च० १९मा०।

२ ३र २ १ २ ३र
स्रा१णा२३४यि। ह्वाहोयि। ग्रताना१यिचा२३४। ह्वा

२ १र २ ३र २ ३ २ १
ह्वोयि। यूथादा१ना२३४। ह्वाहो। यमाइ। ह्वा२३

५ ५ ३र र र र र
४साय़ि। उक्रवाऽ्ह्वाउ। वा ॥(२) औह्वोयूथादाना

२ १ २ ३र २ १ २
३ण। यमाऽ्ह्वा१सा२३४यि। ह्वाहोयि। आपुरन्दरम्।

१ २ ३र ३ १ २ ३र
चक्रमा१वा२३४। ह्वाहोयि। प्रवाचा१सा२३४:। ह्वा

२ १ २ ३र २ ३र २ १
ह्वोयि। इन्द्रागा१या२३४। ह्वाहो। तोआइ। वा२

५ ५
३५साय़ि। उक्रवाऽ्ह्वाउ। वा(३) ॥ १८ * ॥ [२] ४

अथ योविश्वेति प्रगाथात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा।

२उ ३ १ २ ३ २ ३ १ २ ३ १र २र
योविश्वादयतेवसुहोतामन्द्रोजनानाम्।

२ ३ १र २र ३ १ २ ३ १र २र ३ १ २
मधोर्नपात्राप्रथमान्यस्मैप्रस्तोमायत्वग्नये ॥ १ † ॥

---

* ऋ० गा० २२प्र० १अ० १८सा०।

† ऋ० आ० १, १. ४, १० (१भा०१६५४०) = ऋ० वे० ६, ७, १४, १।

"होता" देवानामाह्वाता "मन्द्रः" मोदतः "यः" अग्निः "विश्वा" सर्वाणि "वसु" वसूनि धनानि "जनानां" जनेभ्यः "दयते" प्रयच्छति; तस्मात् "अग्नये" "मधोः" मदकरस्य सोमस्येव "प्रथमानि" मुख्यानि "पात्रा" पात्राणि "स्तोमाः" "प्र यन्तु" प्रगच्छन्तु ॥ १ ॥

अथ द्वितीया।

९ ३ १ ३ १ ३क १ २ ३ १ २ ९ १ २ ३ १ २
अश्वन्नगीर्भीरथ्यꣳसुदानवोमर्मृज्यन्तेदेवयवः।

३ १ ३ १ २ २ ३ २ ३ १ ० ३ १ २
उभेतोकेतनयेदस्मविश्पतेपर्षिराधोमघोनाम्॥ २*॥५

हे "दस्म" दर्शनीय! "विश्पते" विशां पते अग्ने! यं त्वां "सुदानवः" शोभन-दानाः "देवयवः" देवानात्मन इच्छन्तो यजमानाः "रथ्यं" रथस्य वोढारम् "अश्वं न" अश्वमिव "गीर्भिः" स्तुतिभिः "मर्मृज्यन्ते" परिचरन्ति त्वमस्माकं यजमानानां "तोके" पुत्रे "तनये" पौत्रे "उभे" उभयस्मिन् "मघोनां" धनवतां "राधः" धनं "पर्षि" प्रयच्छ॥ २॥ ५

१२ २ २ २ २ २ १
॥ दर्घश्वसम्॥ योविश्वादयतेवस्वोहाओहा ३ ए।

१ १२ २ ऽ २ ऽ २ २
होतारमन्द्रोजनारनाम्। ओ३हा। ओ३हा३ए३४।

९ २ ३ २ १ २ २ १ २ ऽ २
मधो३४र्नपा। चाप्रथ। मानायस्मायि। ओ ३ हा।

---

* ऋ० वे० ६, ७, १४, १।

ऽ २ २ ३ २ ३ २ २ १ ५ ४
ओ३ह्वाइ३ए३४। प्रस्तो३४मायाइ। तुवो२३४वा। ग्मा
५ २ र र र र र २ १र
युयोऽहायि ॥(१) प्रस्तोमायत्वग्नयओहाओह्वाइ३ए। प्रस्तो
१२र ऽ १ ऽ २ ऽ ३ २ ३
मा२यत्वग्नये। ओ२ह्वा। ओ३ह्वाइ३ए३४। अश्वाइ३४न्न
२ १ २ १र २ ऽ २ ऽ
गायि। भायिरथि। यज्ञद्दानवाः। ओ२ह्वा। ओ३
२ २ ३ २ ३ २ २र १ ५ ४
ह्वाइ३ए३४। मन्द३४ज्यन्ताइ३यि। देवो२३४वा। याम्
५ २ र र र र र २
वोऽहायि ॥(२) मन्दज्यन्तेदेवयवओहाओह्वाइ३ए। मन्
१ र १२ ऽ २ ऽ २ २ ३ २
ज्यन्ता२यिदेवयवः। ओ२ह्वा। ओ३ह्वाइ३ए३४। उभा
३र २ १ २र १ २ ऽ २
इ४यितोकायि। तानये। दस्माविग्नपतायि। ओ२ह्वा।
ऽ २ २ ३ २ ३र २ १ ५ ४
ओ३ह्वाइ३ए३४। पर्षा३४यिराधाइः। मो२३४त्रा। धो
५
नोऽहायि(३) ॥ ५ * ॥ [१] ५

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य षोड़शस्याध्यायस्य

प्रथमः खण्डः ॥ १ ॥

---

* ऋ० मा० ११५० २ अ० ५ मा० ।

अथ द्वितीय-खण्डे—

इमम्मेवरुणेत्येकर्चं प्रथमं सूक्तम्,

सा ऋगेषा ।

३ १ १ ३ १ २ ३ १ २
इममे वरुणश्रुधी हवमद्याचमृडय ।
१ २ ३ १ ४ २ ४
त्वामवस्युराचके ॥ १ * ॥ ६

हे "वरुण !" "मे" मदीयम् "इमं" "हवम्" आह्वानं "श्रुधि" शृणु [श्रु श्रवणे (भ्वा० प०), लोटो हिः, "श्रु-शृ-पॄ-कृ-वृभ्यश्छन्दसि (६, ४, १०२)"—इति हेर्धिरादेशः, "बहुलं छन्दसि (२, ४, ७३)"—इति विकरणस्य लुक् "अन्येषामपि दृश्यते (६,३,१३७ वा०)"—इति संहितायां दीर्घः] । किञ्च "अद्य" † अस्मिन् दिने "मृडय" अस्मान् सुखय "अवस्युः" रक्षणेच्छुः [अवस्-शब्दात् "सुप आत्मनः क्यच् (३, १, ८), "क्याच्छन्दसि (३, २, १७०)"—इति उ-प्रत्ययः] एवं विधोऽहं त्वां वरुणम् "आ" आभिमुख्येन "चके" शब्दयामि [कै, गै शब्दे (भ्वा० प०), अस्माल्लिटि "आदेच (६, १, ४५)"—इत्यात्वं, द्विर्भाव-चर्त्वे, "आतोलोप इटि च (६,४,६४)"—इत्याकार-लोपः, "तिङ्तिङः (८, १, २८)"—इति निघातः ; स्तौमीत्यर्थः ॥ १ ॥ ६

* ऋ० वे० १, २, १८, ४ ।

† संहिताया(म्) दीर्घत्व(म्) नि· "निपातस्य च (६, ३, १३६)"—इति सत्र दीर्घः ।

कयात्वन्नइत्येकर्चं द्वितीयं सूक्तम्,

सा ऋगेषा।

१२ १२१२१२ १८
कयात्वन्नऊत्याभिप्रमन्दसेवृषन्।
१२ १ २२१२
कयास्तोत्भ्यआभर ॥ १ * ॥ ७

हे "वृषन्" कामानां वर्षितः इन्द्र! "कया" केन "ऊत्या" [अव रक्षणादिषु (भ्वा० प०), गत्यर्थः "ऊति-यूति (३,३,९७)" —इत्यादिना निपातितः]। केनाभिगमनेन "नः" अस्मान् "अभि" अभितः "प्र मन्दसे" प्रकर्षेण मादयसि अस्मदीयं यज्ञं प्रति सोमपानार्थमागमनेन वा त्वदीयस्तुति-श्रवणार्थमागमनेन वा कदा अस्मान् प्रमादयसीति। किञ्च "कया" केन "अभि" गमनेन "स्तोत्भ्यः" अस्मभ्यं धनम् "आ भर" बिभर्षि?— इतीन्द्रं स्तोता पृच्छति ॥ १ ॥ ७

अथेन्द्रमिद्देवतातयइति प्रगाथरूपं द्वितीयं सूक्तम्,

तत्र प्रथमा।

२ ३ २१२ २१ १ २क२२३२
इन्द्रमिद्देवतातयइन्द्रम्प्रयत्यध्वरे।
१२ २२३१२ ११ १११ १ ११
इन्द्रंसमीकेवनिनोहवामहइन्द्रन्धनस्यसातये ॥ १ † ॥

---

* ऋ० वे० ९, ६, २४, ४।

† ऋ० भा० ३, २, १, ७ (१भा० ५१५ पृ०) = ऋ० वे० ४, ७, २५, ४।

"देवतातये" [देवैः स्तोतृभिस्तायते विस्तार्य्यत इति] देवतातिर्यज्ञस्तदर्थम् "इन्द्रम् इत्" देवेषु मध्ये इन्द्रमेव "हवामहे" आह्वयामहे। "अध्वरे" यज्ञे "प्रयति" प्रगच्छति उपक्रान्ते सति "इन्द्रं" हवामहे। तथा "समीके" सम्यग्जाते सम्पूर्णे च यागे "वनिनः" सम्भजमानाः वयम् "इन्द्रम्" इन्द्रमेवाह्वयामहे [यद्वा, समीकमिति सङ्ग्राम-नाम (निघ० २, १७, ११), समीके सङ्ग्रामे इन्द्रमाह्वयामहे] "धनस्य" "सातये" लाभाय "इन्द्रम्" इन्द्रमेव आह्वयामहे। अतः शीघ्र मिन्द्र आगच्छत्वित्यर्थः ॥ १ ॥

अथ द्वितीया।

१२ ३१८ २८ ३ २ ३११ १२
इन्द्रोमङ्गारोदसीपप्रथच्छवइन्द्रःसूर्य्यमरोचयत्।

१२१ २३ १२ ३११ ३१ ३१२
इन्द्रेहविश्वाभुवनानियेमिरइन्द्रेसेनासइन्दवः॥ २ * ॥ ८

अयम् "इन्द्रः" "शवः" शवसः आत्मीयस्य बलस्य "मङ्हा" महिम्ना महत्त्वेन "रोदसी" द्यावापृथिव्यौ "पप्रथत्" अप्रथयत् विस्तारितवान्। तथा स्वर्भानुसूनुं "सूर्य्यम्" "इन्द्रः" "अरोचयत्" अदीपयत् तस्यासुरेण बधेन प्रकाशितवान्। अपिच "इन्द्रे ह" अस्मिन्नेवेन्द्रे "विश्वा" विश्वानि व्याप्तानि "भुव-

* ऋ० वे० ५, ७, १९, १।

नानि" भूतजातानि "येमिरे" उपरमन्ते इन्द्रेण नियम्यन्त इत्यर्थः। तथा "स्वानासः" स्वानाः अभिषूयमाणाः "इन्दवः" सोमाश्च अस्मिन्नेवेन्द्रे नियम्यन्ते परमात्मन्यन्तर्भवन्तीत्यर्थः ॥२॥८

॥ यौक्ताश्वमम् ॥ इन्द्रेमिद्देवता। तयायि। इन्द्र
प्रयतियध्वा २३ रायि। आयिन्द्रा२म्। समौकेवनि
नोच्चवामा२३च्चायि। आयिन्द्रा२म्। धानस्रसो२३४
वा। ता२३४ये ॥(१) इन्द्रधनस्रसा। तयायि। इन्द्र
धनस्रसाता२३यायि। आयिन्द्रो२। मङ्कारोदसीपप्रथ
च्छा२३वाः। आयिन्द्रा२:। सूर्य्यमरो२३४वा। चा२३
४यात् ॥(२) इन्द्रःसूर्य्यमरोचयात्। इन्द्रःसूर्य्यमरोचा२३
यात्। आयिन्द्रे२। त्वविश्वाभुवनानियेमा२३यिरायि।
आयिन्द्रे२। स्वानासओ२३४वा। दा२३४वा(३) ॥१२*॥[१]

॥ नैपातिथम् ॥ इन्द्रमिद्देवतानया३ए। आयिन्द्रम्प्रय।

* ऋ० मा० ११प्र० २अ० १२सा०।

१ २ २, ३र ५ १ २ र १र
तियाध्वराइयि। हा। औहो२३४हा। इन्द्रꣳसमीके
२ १ २ १ ७ २, ३र ५
वनिनः। हवामहाइयि। हा। औहो२३४हा।
२ १ १ २, ५र ५ १ ,२
इन्द्राꣳधानाइ। हा। औहो२३४हा। स्याइसा२३४
५र र ३ ० ५ २ र २ १
औहोवा। ता२३४ये ॥(१) इन्द्रन्धनस्यसातयाइए। आ
२ १ २ २, ३र ५
यिन्द्रन्धन। स्यसातयाइयि। हा। औहो२३४हा।
१ र २ १र र २र १ २ १ ७ २, ३र
इन्द्रोमङ्कारोदसीप। प्रथाचक्रवाइः। हा। औहो२३
५ १ र २ २, ३र ५ १
४हा। इन्द्राःसूर्य्याइम्। हा। औहो२३४हा। आ
३ ५र र ३ ५ २ र र
इरो२३४औहोवा। चाइ३४यात् ॥(२) इन्द्रःसूर्य्यमरोच
२ १ २र १ १ २, ३र
याइदे। आयिन्द्रःसूर्य्यम्। अरोचयाइत्। हा। औ
५ १र २ १ २र १ २र १ ७
हो२३४हा। इन्द्रेहविश्वाभुवना। नियायिमिराइयि।
२, ३र ५ १ २ २, ३र
हा। औहो२३४हा। इन्द्रेस्वानाइ। हा। औहो२३
५ १ ,२ ५र र ३ ५
४हा। साइआ२३४औहोवा। दाइ३४वाः(३) ॥५॥[२]८

अथ विश्वकर्मसम्बन्धिनेकचत्वारिंशं चतुर्थं सूक्तम्,

सा ऋगेषा।

१ १ २ १ १ ३ २
विश्वकर्म्मन्हविषावावृधानः
३ १ १ ३ २ १२ १२
स्वयंयजस्वतन्वाऽऽऽऽस्वाहिते।
१ २ ३ २ १ २ ३ १ १
मुह्यन्त्वन्येअभितोजनास
३ १२ १२ ३ १ २ ३ १ २
इहास्माकम्मघवासूरिरस्तु॥ १ * ॥ ९

हे "विश्वकर्मन्" विश्व-विषय-कर्मवन्! † एतन्नामक-परमेश्वर! "हविषा" हविर्भूतेन विश्वकर्मणा मया दत्तेन वा हविषा "वावृधानः" वर्द्धमानः ["विश्वकर्म्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुहवाञ्चकार स आत्मानमप्यन्ततो जुहवाञ्चकार"—इत्यादि निरुक्तम् (दै० ४, २६) पूर्वमुदाहृतं "स्वयं" स्वयमेव "तन्वा" शरीरेण "स्वाहिते" अग्नौ दत्तो हविः "यजस्व" पूजय। "अन्ये" मर्त्याः "जनासः" जनाः अयष्टारोऽस्मद्याग-विरोधिनो वा "मुह्यन्तु" मुग्धा भवन्तु, "अभितः" सर्वतः। अथ परोक्षकृतः—"इह" अस्मिन् यागे "अस्माकं" "मघवा" अस्मद्दत्तेन हविर्लक्षणेन धनेन धनवान्

---

* ऋ० वे० ८, ३, १६, ६ = य० वे० १७, २२।

† 'विश्वकर्मा सर्वस्य कर्ता'—इत्यादि निरु० दै० ४, १५।

सः "सूरिः" स्वर्गादि-फलस्य प्रेरकः "अस्तु" भवतु [अत्र "विश्वकर्मन् हविषा वर्द्धयमानः (दे०४, २७)"—इत्यादि निरुक्तं द्रष्टव्यम्* ॥

तन्वांखाहिते"-"पृथिवीमुतद्याम्" —इति पाठो ॥ १ ॥ ८

अयारुचेति ऋचात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा।

३ २ ३१२ २२ ३ २७ ३ १ १
अयारुचाहरिण्यापुनानोविश्वाद्वेषाꣳसि

३ १ १ ३ २ ३ २ ३ १ १
तरतिस्वयुग्वभिःहरोनस्वयुग्वभिः।

१ २ ३ १ २ ३ १ १ ३ १ २ ३ १ २
धारापृष्ठस्यरोचतेपुनानोऋरुषोहरिः

२ ३ २ ३ १ १ ३ १ २ २ ३ १ १ ३ १ २
विश्वायद्रूपापरियास्युक्तभिःसप्तास्येभिर्हरिभिः ॥१॥

"पुनानः" पूयमानः सोमः "हरिण्या" हरित-वर्णया "अया" अनया "रुचा" रोचमानया धारया "विश्वा" सर्वाणि "द्वेषांसि" द्वेष्टॄणि रक्षांसि "तरति" विनाशयति। तत्र दृष्टान्तः—

---

* अत्रेयं मद्दीधर-व्याख्या—"हे विश्वकर्मन्! 'हविषा' महत्तेन 'वाजधानः' वर्धमानो जातवर्धः सन् मम यज्ञे 'द्यविवो' द्युस्थितानि भूतानि 'उत' अपिच 'वां' द्युलोकाश्रितानि भूतानि 'स्वं यजस्व' अदनुग्रहाय। किञ्च त्वत्प्रसादाद् 'अस्मे अभितः' स्थिताः 'सपत्नाः' शत्रवः 'सन्तु' मोघं प्राप्नुवन्तु, किञ्च 'दृढ' यज्ञे 'मघवा' इन्द्र 'अस्माकं' 'सूरिः' पण्डितः आत्मज्ञानोपदेशकः 'भव'।"—इति १७, २२ ।

† ऋ० आ० ५, १, ३, ७ (१मा० ८२३ ई०) = ऋ० वे० ७, ५, २४, २ ।

"सूरो न" यथा सूर्यः "सयुग्वभिः" सह युक्तैः रश्मिभिः तमांसि हिनस्ति तद्वत् [सयुग्वभिरिति द्विरुक्तिरादरार्था । यद्वा, धारया युक्तः सोमः युक्तैस्तेजोभिः सह रक्षां तरति]। तस्य "पृष्ठस्य" दशापवित्रस्योपरिसिक्तस्य "धारा" "रोचते" दीप्यते "पुनानः" पूयमानः "हरिः" हरितवर्णः सोमः "अरुषः" आरोचमानो भवति "यद्" यः सोमः "सप्तास्येभिः" रसहरण-ग्रीलैः आस्यैः "ऋक्वभिः" स्तुतिमद्भिः "ऋक्वभिः" तेजोभिः "विश्वा" विश्वानि व्याप्तानि "रूपा" रूपाणि नक्षत्राणि "परि याति" गच्छति व्याप्नोति ॥

"पृष्ठस्य"-"सुतस्य"—इति पाठो ॥ १ ॥

अथ द्वितीया ।

९ ९ १ १ २ १ २ २ १ २ २ २ १ २
प्राचोमनुप्रदिशंयातिचेकितत्स॒रश्मिभि

२ २ ४ २ १ १ २ १ २ २८
र्यतेदर्शतोरथोदैव्योदर्शतोरथः ।

१ १ २ २ २ १ ३ २ १ २
अग्मन्नुक्थानिपौ॒स्येन्द्रञ्चायहर्षयन्

१ २ २ १ २ २ ८ २ १ २ २ १ २ १ २
वज्रञ्चयद्गवथोअनपच्युतासमत्सनपच्युता ॥ २ * ॥

"चेकितत्" जानानः सोमः "प्राचीं" पूर्वां "प्रदिशं" प्रकृष्टां दिशम् "अनु याति" अनुगच्छति । किञ्च "दर्शतः"

---

* ऋ० वे० ७, ५, २४, ३।

सर्वदर्शनोयः "दैव्यः" देवेषु भवः तव "रथः" सूर्यस्य "रश्मिभिः" "सं यतते" सङ्गच्छते। पुनः "दर्शतः रथः"—इत्यादरार्थौ। ततः "पौंस्या" पुंस्त्वावगमानि "उक्थानि" स्तोत्राणि "अगमन्" इन्द्रं गच्छति "यद" यदा "समत्सु" सङ्ग्रामेषु "अनपच्युता अनपच्यूतौ शत्रुभिरपराजितौ, सोमस्त्वञ्च इन्द्रश्च युवां "समत्सु" सङ्ग्रामेषु सह भवथः, तदा स्तोत्रागमनादीनि भवन्ति। पुनः "अनपच्युता"—इत्यादरार्थौ ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३ १ २ ३ २ ३ २ ३ १ २
त्वꣳहत्यत्यणीनांविदोवसुसम्मातृभि

३ १ २ २ ३ २ १ २ ३ २ ३ १ २
र्मृज्जयसिस्वआदमक्रतस्यधीतिभिर्हि मे।

३ २ ३ २ उ ३ २ उ ३ १ २ ३ १ २
परावतोनसामनद्यचारणन्तिधीतयः

३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
त्रिधातुभिररुषीभिर्वयोदधेरोचमानोवयोदधे ॥३*॥ १०

हे सोम! त्वं "त्यत्"† त्यानि "वसु" गवादीनि धनानि "पणीनां" पणिभिः अपहृतं तत् गवात्मकं धनं "विदः" अविदः अलभथाः। "आ" अपिच "ऋतस्य" यज्ञस्य "धीतिभिः" धात्रीभिः "मातृभिः" वसतीवरीभिः "स्वे" आत्मीये "दमे" यज्ञे "सम्मर्जयसि" सम्यक् शुद्धो भवसि। "परावता न" दूर-

* ऋ० के० ७. ४, २४. २।

† 'लक्ष्यलक्षणयोः पर्यायः'—इति वि०।

स्याद्देशात् यथा "साम"* साम-ध्वनिः श्रूयते तथा तव "तत्" साम-ध्वनिः सर्वैः श्रूयते असौ सोमाभिषवाभिप्रायेणोक्तः। "यत्र" यस्मिन् शब्दे "धीतयः" कर्मणो धर्त्तारो यजमानाः "रणन्ति" रमन्ते, "रोचमानः" सोऽयं सोमः "त्रिधातुभिः" त्रयाणां लोकानां धारयित्रीभिः† "अरुषीभिः" आरोचमानाभिः दीप्तिभिः "वयः" अन्नं‡ "दधे" स्तोतृभ्यः प्रयच्छति। पुनः "वयो दधे" —इत्यादरार्थो॥ ३ ॥ १०

१ २ १ र २

॥ गायत्रपार्श्वम्॥ आया। हुचाहरा३१उवा२३यि।

५ २ र १र २र१र र २ १ २ १र २र

ओ२३४या। पुनानोविश्वाद्वेषाᳪसितरतिसयुग्वभिःहूरो

१ २ १ २ १र र २ १ २र र र १र २ १र २र १ १र१र

नसयुग्वभिर्द्धारापृष्ठस्यरोचतेपुनानोअरुषो हर्विश्वायद्रूपा

२ १र २ १ ३ १ १ १ १ २ १ २ ३ २ १

परियास्यृक्वभो२३४५:। सप्तासो१ये२। भिरा३। ऋ२

४ १ १ १ १ १

३वा३। काभा२३४५यिः(१) ॥ ३ ¶ ॥ [१] १०

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य षोड़शस्याध्यायस्य द्वितीयः खण्डः॥ २ ॥

---

* 'साम शब्द साधु वचनः'—इति वि०।

† 'त्रिधातुभिः—सुवर्ण-रजत-ताम्रैः'—इति वि०।

‡ 'वयः—स्थानम्'—इति वि०।

¶ ऊ० गा० १०५० २ख० ३गा०।

अथ तृतीय-खण्डे —

उतनोगोषणिमित्येकर्चं प्रथमं सूक्तम्,

सा ऋगेषा।

१ १२ २ २३ १ २ ३ १ २ ३ २ ३ २

उतनोगोषणिन्धियमश्वसांवाजसामुत।

३ १ २ ३ १ २

नृवत्क्रणुह्यूतये ॥ १ * ॥ ११

"उत" अपिच हे "पूषन्!" "गोषणिं" गवां सनित्रीं दात्रीं "अश्वसां" अश्वानां सनित्रीं "वाजसां" वाजानामन्नानां सनित्रीम् "उत" अपिच "नृवत्" नृवतीं नृणां वनित्रीं दात्रीम् एवम्भूतां "धियं" बुद्धिं कर्म च "नः" अस्माकम् "ऊतये" तस्यै उपभोगार्थं "क्रणुहि" कुरु।

"ऊतये"-"वीतये"—इति पाठो ॥ १ ॥ ११

अथ शशमानस्येत्येकर्चं द्वितीयं सूक्तम्,

सैषा ऋक्।

१ १२ ३ १ २

शशमानस्यवानरःस्वेदस्यसत्यशवसः।

३ १२ २२३ १ २

विदाकामस्यवेनतः ॥ १ † ॥ १२

हे "सत्यशवसः" अविनश्वर-बलाः "नरः" नेतारः मरुतः! "शशमानस्य" युष्मान् स्तुतिभिः सम्भजमानस्येत्यर्थः, "स्वेदस्य"

---

* ऋ० वे० ४, ८, १८, ४। † ऋ० वे० १, ६, १२, ३।

स्रावक मन्त्रोच्चारण-जनितेन श्रमेण स्त्रिद्यमान-गात्रस्य "वेनतः" [वेनतिः कान्ति-कर्मा (निघ०२,६,४)] कामयमानस्य* "वा"-शब्दः समुच्चये, एवम्भूतस्य स्तोतुश्च "कामस्य" काममभिलाषं "विद" लम्भयत प्रयच्छतेत्यर्थः ॥ १ ॥ १२

उपनस्सूनवइत्येकर्चं तृतीयं सूक्तम्,

सैषा ऋक्।

१२ ३२१ १ १ ३ २ ३ १ २ ३ २

उपनःसूनवोगिरःशृण्वन्त्वमृतस्यये।

३ १ २

सुमृडीकाभवन्तुनः॥ १ †॥ १३

"अमृतस्य" मरण-रहितस्य प्रजापतेः "ये" "तनवः" पुत्राः ते देवाः "नः" अस्माकं "गिरः" स्तुतीः "उप शृण्वन्तु" "नः" अस्माकं "सुमृडीकाः" सुष्ठु मृडयितारः सुखयितारश्च "भवन्तु" सन्तु ॥ १ ॥ १३

प्रवाम्यहोति तृचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

२३ २ ३ १ २ ३ १ २

प्रवाम्यद्रिध्वोअध्युपस्तुतिम्भरामहे।

२ ३ २ ३ १ २

शुचीउपप्रशस्तये॥ १ ‡॥

---

* 'सत्यश्रवसः—सम्यग्बलस्य 'विदाः' विद्वांसो वयं 'कामस्य' कमनीयस्य 'वेनतः' स्तूयमानस्य'—इति वि०।

† ऋ० वे० ४, ८, १५, २। ‡ ऋ० वे० २, ८, ८, ५।

हे द्यावापृथिव्यौ ! "द्यवो" द्योतमाने "वां" युवाभ्याम् "उपस्तुतिं" स्तोत्रं "महि" महत् प्रभूतम् "आभि प्र भरामहे" प्रकर्षेण सम्पादयामः ॥ १ ॥

अथ द्वितीया ।

३ २३क०१र ३ २३ ३ १ २
पुनानेतन्वामिथःस्वेनदक्षेणराजथः ।

३ १ २ ३ २ ३ २
उह्याथेसनादृतम् ॥ २ * ॥

हे देव्यौ ! "तन्वा" स्वीयया मूर्त्या "दक्षेण" बलेन च "मिथः" प्रत्येकं "पुनाने" शोधयन्त्यौ यज्ञं यजमानं वा युवां "राजथः" ईश्वरे भवथः [यद्वा, 'तन्वा' स्व शरीरैकदेशेन 'मिथः' प्रत्येकं पुनाने शोधयन्त्यौ द्यौः स्वीयेनोपरेण भुवं सा च स्वकीयेन कार्ष्णेन चन्द्रमसं स्थिते दिवमिति विवेकः] "सनात्" सदाकालम् "ऋतं" यज्ञम् "उह्याथे" वहथः ॥ २ ॥

अथ तृतीया ।

३ २ ३ १ २ ३ १ १ ३ १ २ ३ १ २
महीमित्रस्यमाधथस्तरन्तीपिप्रतीऋतम् ।

१ २ ३ १र २र
परियज्ञन्निषेदथुः ॥ ३ † ॥ १४

"मही" महत्यौ द्यावापृथिव्यौ "मित्रस्य" मित्रभूतस्य स्तोतुरभिमतं "माधथः" माधयथः । "ऋतम्" अन्नं "तरन्ती"

---

* ऋ० वे० ३, ८, ८, ६ ।

† ऋ० वे० ३, ८, ८, ७ ।

हे "गावः" धर्मदुघा यूयम् "अवटे" महावीरे महावीरम् "उप वद" उपावत [वर्ण-व्यत्ययः उपायच्छत] यस्मात् "यज्ञस्य" धर्मयागस्य साधनभूते "रप्सुदा" रप्सुदे [रिप्सोः फल-प्रदे-रिप्सोरश्विनादीतव्ये। यद्वा, रपणं शब्दनं रप् मन्त्रः तेन सुष्ठु दातव्ये। अथवा, षूद् क्षरणे (भ्वा० आ०) रपा मन्त्रेण क्षरणीये ईदृशे] गवाजयीः पयसो "महो" महतो बहुले अपेक्षिते उपावत [गो-शब्दोऽजायामप्युपलक्षकः अजापयसोऽपि महावीरे आमेचनीयत्वात्]। अपिचास्य महावीरस्य "उभा" उभौ "कर्णा" कर्ण-स्थानीयौ द्वौ रुक्मौ "हिरण्यया" हिरण्मयौ सुवर्ण रजत-मयावित्यर्थः॥

"अवटे"-"अवतम्"—इति पाठौ॥ १॥

अथ द्वितीया।

१ २ ३।१ २।३ १ २।३ १ २।३ १ २
अभ्यारमित्प्रयोनिषिक्तम्पुष्करेमधु।
१ १ १।३ १ २
अवटस्यविसर्जने॥ २॥*

"अद्रयः" आद्रियमाणाः अध्वर्यादयः "अभ्यारमित्" अभि गम्यैव "निषिक्तम्" अतिरिक्तम् "मधु" "पुष्करे" प्रह्वे उपयमनीय-पात्रे† सिञ्चति अग्निहोत्रार्थम् "अवटस्य" महावीरस्य "विसर्जने" विसर्जन-समये होमानन्तरं महावीरमासन्ध्यामासादय॥

"अवटस्य"-"अवतस्य"—इति पाठौ॥ २॥

* ऋ० वे० ५ ५. १६ १। † 'पुष्करे—द्रोणकलशे'—इति वि०।

अथ तृतीया।

३ १ ३ १२ ३२३१ २ १ १२
सिञ्चन्तिनमसावटमुच्चाचक्रन्यरिज्यतम्।

३ १ २ २१ २
नीचीनबारमक्षितम्॥ ३ *॥ १६

"अक्षितम्" अक्षीणम् ईदृशं क्षीराद्यवशेषमुक्तम् आहवनीयस्योपरि "नमसा" नमनेन "सिञ्चन्ति" क्षरन्ति महावीरेण हि आहवनीये हूयते॥

"अवटम्"-"अव्रतम्"—इति पाठो॥ ३॥ १६

इति सामवेदार्थप्रकाशे उत्तरार्चस्य षोडशस्याध्यायस्य तृतीयः खण्डः॥ ३॥

अथ चतुर्थ-खण्डे—

माभेमेति प्रगाथात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१ २१ १ २ १ २ १ १ २८
माभेममाश्रमिन्वोग्रस्यसख्येतव।

२ २ १ १ २ १ २ १ २८ १८ २ १ १ १
महस्तेवृष्णोअभिचक्ष्यद्भुतस्यरेमतुर्वय्यंयदुम्॥ १†॥

---

* ऋ० वे० ४, ५, १३, ५।

† ऋ० वे० ५, ७, २१, २।

हे इन्द्र! "उग्रस्य" उद्गूर्ण-बलस्य तव "सख्ये" सखित्वे सति वयं "मा भेम" मा भेम कुतश्चिदपि शत्रोर्भीता माभूम "मा श्रमिम" श्रान्ताः पीड़िताश्च मा भूम "तुर्वणिः" कामानां वर्षितुः "ते" तव सम्बन्धि "महत्" प्रभूतं हन्त्र-बधादि-लक्षणं "कर्म" "अभि चक्ष्यम्" अभितः ख्यापनीयं स्तोतव्यम् अतः महानुभावस्य तव सख्य-प्राप्तानां भीति-श्रमौ न जायेते इत्यर्थः। तत् कथमवगम्यते? इति चेत् उच्यते—"तुर्वशम्"; "यदुम्" एतत्सञ्ज्ञकौ च* त्वत्प्रसादात् सुखेन जीवन्तौ "पश्येम" दृष्टवन्तः खलु वयम्। अतः कारणात् त्वत्सख्यं प्राप्तस्य भयादिकं न जायत इत्येतदुपपन्नमित्यर्थः॥ १॥

अथ द्वितीया।

३ १र २र १ २र ३ २ ३ २ ३ १ २
सव्यामनुस्फिग्यंवावसेवृषानदानोअस्यरोषति।

२ ३ १ २ ३ ३ १ २ ३ २ ३ १ ३ २ ३ २ ३ १ २
मध्वासम्पृक्ताःसारघेणधेनवस्त्वयमेद्रिद्रवापिव॥२॥१७

"वृषा" कामानां वर्षिता इन्द्रः "सव्या" दक्षिणन "स्फिग्यं" कटि-प्रदेशम् "अनु" [तृतीयार्थे अनोः कर्मप्रवचनीयत्वम् (१, ४,८५)] स्फिग्या शरीरैकदेशेनैव "वावसे" वस्ते सर्वं भूतमाच्छा-

---

* 'तुर्वशं यदुम्'—एतौ चक्षिय कुमारौ—इति वि०।

† ऋ० वे० ५, ७, ३१. २।

दयति स्वयं कृत्स्नं जगदतीत्य वर्त्तत इत्यर्थः [ऋगन्तरञ्च दर्शयति—"यदन्यया स्फिग्या चामस्याः"—इति]। अपिच "दानः" अवखण्डयिता [दान अवखण्डने (भ्वा०प०), पचाद्यच्। (३,१, १३४) सच "अस्य" इममिन्द्रं "न रोषति" न हिनस्ति [रुष हिंसायाम्/(भ्वा०प०) इन्द्रं हिंसितुं कश्चिदपि शक्तो नास्तीत्यर्थः। यद्वा, हे यजमान! 'दानः' हविषां दाता त्वम् 'अस्य' इन्द्रस्य 'न रोषति' रोषं न जनयतीत्यर्थः]। उत्तरोऽर्द्धः प्रत्यंचकृतः—"मारुषेण" सरघा मधुमक्षिका, तत्सम्बन्धिना "मध्वा" मधुना लुप्तोपमानमेतत्. मधुनेव रसवता क्षीरादिना अपण-द्रव्येण सम्पृक्ताः संसृष्टाः संस्कृताः "धेनवः" धेनुवत्-प्रीति-जनकाः अस्मदीयाः सोमाः [यद्वा, धिविः प्रीणनार्थो (भ्वा०प०) 'धेनवः' प्रीणयितार इत्यर्थः। अथवा धेट् पाने (भ्वा० प०)—"धेट इच्च (उ० ३, ११)"—इत्यौणादिको नप्रत्ययः सन्नियोग इकारान्तादेशश्च। पातव्याः सोमा इत्यर्थः]। यतएवमतः कारणात् हे इन्द्र! "स्तूयम्" क्षिप्रम् "एहि" अस्मत्समीपमागच्छ, आगत्य च सोमा यस्मिन्नुत्तरवेदिलक्षणे स्थाने क्षर्यन्ते तं देशं "द्रव" शीघ्रं गच्छ [द्रु गतौ (भ्वा०प०)—इति धातुः "व्यचोऽतस्तिङः (६, ३, १३५)"—इति सांहितिको दीर्घः] तदनन्तरम् अध्वर्युणा दत्तं सोमं "पिब" तेन सोमेन सम्यक् स्वोदरं पूरयेत्यर्थः

इमाउत्वेति प्रगाथाख्यकं द्वितीयं सूक्तम्,

तत्र प्रथमा ।

२ १ २ २ १ १ २ १८ १८
इमाउत्वापुरुवसोगिरोवर्धन्तुयाममम ।

३ १ १ १ १ १ २ १ १ १८ १८
पावकवर्णाःशुचयोविपश्चितोभिस्तोमैरनूषत ॥ १* ॥

हे "पुरुवसो" बहुधनेन्द्र ! "मम" मदीयाः "इमाः" "गिरः" स्तुतरूपा वाचः "त्वा" त्वां "वर्धन्तु" वर्धयन्तु । तथा "पावकवर्णाः" अग्नि-समान-तेजस्काः अतएव "शुचयः" शुद्धाः "विपश्चितः" विद्वांसः उद्गातारश्च "स्तोमैः" स्तोत्रैः बर्हिष्यमानादिभिः "अभ्यनूषत" त्वामभिष्टुवन्ति [नु स्तुतौ कुठादिः(प०)॥१॥

अथ द्वितीया ।

३ २ ३ १ १ १ २ १ १ २ १ १
अयꣳसहस्रमृषिभिःसहस्कृतःसमुद्रइवपप्रथे ।

३ १८ १८ ३ १ १ १ १ १ १ १ १ १ १ १
सत्यःसोअस्यमहिमागृणेशवोयज्ञेषुविप्रराज्ये ॥ २† ॥ १८

"अयम्" इन्द्रः "सहस्रं" सहस्र-सङ्ख्याकैः ऋषिभिः अतीन्द्रियार्थ-दर्शिभिः स्तोढभिः"सहस्कृतः" सहसा बलेन युक्तः कृतः [स्तुत्या हि देवताया बलं वर्धते; सच एवं स्तुतः सन्]"समुद्रइव", उदधिरिव "पप्रथे" प्रथितो विस्तीर्णो बभूव । "अस्य" चेन्द्रस्य

---

* ऋ० आ० १, २, १, ८ (१भा० ५१७१०)=ऋ० वे० ५, ७, २५, १।

† ऋ० वे० ५, ७, २५, ४ ।

"सत्यः" अवितथः "सः" प्रसिद्धः "महिमा" महत्वं "ग्रवः" बलं "यज्ञेषु" यागेषु "विप्रराज्ये" [राज्ञः कर्म्म राज्यम्] विप्राणां स्तोतृणां राज्ये स्तुत-ग्रन्थ-सङ्घे * "गृणे" स्तूयते ॥ २ ॥ १८

॥ ग्रैतम् ॥ इमाउत्वापुरु । वसा३४ ओहोवा ।
गायिरोवर्ह्व । तुयाममा२३४ । ओ३ह्वा । पावकवर्णाः ।
शूचा२३याः । विपा२ः । चा२३४यिताः । अभिस्तोमा
यिराइनू । ङम्मायि । पा२ता२३४ओहोवा ॥(१) अ
भिस्तोमैरनू । पता३४ओहोवा । आभिस्तोमैः । अनू
पता२३४ । ओ३ह्वा । अयंसहस्रम् । आर्षा२३यि
भायिः । सचा२ः । का२३४र्त्ताः । समुद्रादूर्वाइपा ।
ङम्मायि । प्रा२था२३४ओहोवा ॥(२) समुद्रदूर्वप । प्र
था३४ओहोवा । सामुद्रद् । वपाप्रथा२३४यि । ओ३
ह्वा । सत्यःसोमस्य । माहा२३यिमा । गृणा२यि । ग्रा

* 'विप्रराज्ये - ब्राह्मणाध्यक्ष-भूमे राज्ये' — इति वि० ।

५ १ २ २ २ १ ३
२३४वाः। यज्ञेषुवायियाश्रा। ऊम्मायि। जाश्या२३

५ २ २ ३ ५
४औहोवा। वाश्र३४ह्व(३)॥ १० * ॥ [१]

॥ नौधसम्॥ १ २ ५ ४ २ ५ २ ४ ५
आ२३४यि। माउत्वापुरू। वासा

२ १ २ २ १ २ १
उ। गिरोवर्द्धा। तू३यामाश्मा। पाश्२वा। काव

२ १ २ १ २ ३ ५ १ २
र्णाः। प्रुच। यो। वायियद्धा२३४यिताः। आश्३भायि।

१ २ २ १ ५ ३ ५ १ २
स्तोमैरनोश्३४वा। पाश्३४ता॥१) आ२३४। भिस्तो

५ २ २ ४ ५ २ १ २ २ १ २
मैरनू। षाता। अभिस्तोमायिः। आ३नूषा ३ ता।

१ २ १ २ १ २ १ २ ३
आश्३याम्। साहस्रम्। ऋषि। भायिः। साहस्का

५ १ २ १ २ १ ५ ३ ५
२३४र्त्ताः। साश्३म्। द्राइवपोश्३४वा। प्राश्३४थे॥(२)

१ ५ ४ ४ २ १ २
साश्३४म्। उद्राइवप। प्राथायि। समुद्रायि। वा

१ २ २ १ २ १ २ १ २ १
३पाप्राश्थायि। साश्३त्याः। सोअस्य। मच्चि। मा

* ऊ० मा० १२प्र० १ख० १०मा०।

२ ३ ५ १ २ १ २१
गार्णायिग्रा२३४वाः। या२३ज्ञायि। षूविप्ररो २३४
५ ३ ५
वा। जी२३४र्ये(३) ॥ ५ * ॥ [२] १८

अथ यस्यायमिति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

२ ३ २उ ३ २ ३ १ २ ३ २ ३ २
यस्यायंविश्वआर्यादासःशेवधिपाअरिः।

३ १ २ ३ २ ३ २ ३ १ २ ३ १र २र ३ २
तिरश्चिद्यर्यरुशमेपवीरवितुभ्येत्सोअज्यतेरयिः॥ १॥

"यस्य" यज्ञस्य "अयं" "विश्वः" सर्वो लोकः "आर्यः" प्रभुरपि "शेवधिपाः" निधि-पालकः ["विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि"—इति (ऋ०वे०८१,२,२२,४) मन्त्रान्तरे पठितत्वात्] "दासः" भृत्यइव "अरिः" भवति स यज्ञः "अर्ये" स्वामिनि "रुशमे" नियन्तरि "पवीरवि" सरस्वत्याः पितरि ["पावीरवी कन्या चित्रायुः सरस्वती"†—इत्युक्तम्] "तिरश्चित्" तिरोभूतोऽपि "तुभ्येत्" हे इन्द्र! तुभ्यमेव "रयिः" हविर्लक्षणं धनमुद्दिश्य "अज्यते" प्राप्तो भवति [अयमभिप्रायः—विप्र-क्षत्रादिकः सर्वो लोकः बृहस्पतिः, मच राजसूयादि रूपस्य यज्ञस्य भृत्या वर्तते, स तादृशो यज्ञो मन्त्र-रूपायाः सरस्वत्याः

● ऋ० गा०१८प्र० २ष० ५मा०। † ऋ० वे० ६, ४, १८, ४।
‡ निरुक्त-दैवतकाण्डेषु त्रिशत्तमं खण्डं "पवि. ग्न्योभवतीत्यादिकं द्रष्टव्यम।

पिङ्ग-स्थानीये परमेश्वर-स्वरूपे गूढोऽपि सन् त्वं हे इन्द्र ! त्वदर्थमेवं हविर्दातुं प्रकटीभवति तथाविधस्तव महिमेति] ॥ १ ॥

अथ द्वितीया ।

३ २ ३ १२ ३ २ ३ १ २ २ १ २
तुरण्यवोमधुमन्तङ्घृतश्चुतंविप्रासोअर्कमानृचुः ।

३ २ ३ १ २ ३ १२ २ ३ २ ३ २ २ १ २
अस्मेरयिःपप्रथेवृष्ण्यंशवोऽस्मेसोनासइन्दवः ॥ २* ॥ १९

"तुरण्यवः" यागादि-कर्मसु त्वरण-शीलाः† "विप्रासः" मेधाविन ऋत्विजः "मधुमन्तं" मधु-क्षीराद्याहुति-युक्तम्, [घृतमाज्यं द्योतते क्षरति यस्मिन्नाहुति-हारेणेति] "घृतश्चुतम्‡", "अर्कम्" अर्चनीयमिन्द्रम् "आनृचुः" पूजयन्ति§ । किमर्थम् ? इत्युच्यते—"अस्मे" अस्मभ्यं "रयिः" हविर्लक्षणं धनं "पप्रथे" प्रख्यातं भवतु । तथा "वृष्ण्यं"वर्षण-शीलं सोम-निबन्धनं "शवः" बलमपि प्रथताम् । तथा "अस्मे" अस्मासु "सोनासः" सुवानाः अभिषुताः "इन्दवः" सोमाः प्रख्याता भवन्तु । एवं फलं कामयमानाः ऋत्विजः इन्द्रं पूजयन्तीत्यर्थः ॥ २ ॥ १९

---

* ऋ० वे० ९, ४, १९, ५ ।

† 'तुरण्यवः—वेगवन्तः'—इति वि० ।

‡ 'घृतश्चुतं—घृतमिश्रम्, उदकमिश्र-सोमम्'—इति वि० ।

¶ 'अर्कं'—द्रोणकलशम्'—इति वि० ।

§ 'आनृचुः—सोमवन्तः'—इति वि० ।

॥ कालेयम् ॥ यस्यायाऽविश्वाऽअर्य्याः। दासाःशेवा।
धिपाऽरा२ऽयिः। तिरश्चिदाऽ। यें२३४। रुशमेपवी।
रा३वायि। तुभ्येत्सोऽ। वा३४३ओ३४वा। ज्यते५र
यायिः ॥(१) तुभ्येत्सोऽअज्यतेरयायिः। तुभ्येत्सोऽआ।
ज्यतेरयाऽयिः। तुरण्यवाऽ। मा२३४। धुमन्तङ्
न। शूऽताम्। विप्रासोऽ। वा३४३ओ३४वा। कमा
५नूचूः ॥(२) विप्रासोऽअर्कमानूचूः। विप्रासोऽआ।
कमानूचूऽः। अस्मेरयाऽयिः। पा२३४। प्रशेवृष्णि
यम्। शाऽवाः। अस्मेस्वानी। वाऽ४ऽओऽ४वा।
सऽआपुयिन्दवाः। द्यो५ई। डा(३) ॥ ११ * ॥ [१] १९

---

* ऋ० मा० १५प्र० १ष० ११मा०।

अथ गोमत्रइन्दो इति ऋचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १ २ ३ १ २
गोमन्नइन्दोअश्ववत्सुतःसुदक्षधनिव।

१ २ ३ २ ३ २ ३ १ २
पुचिच्चवर्णमधिगोषुधारय ॥ १ *॥

हे "सुदक्ष" हे सुबल! हे "इन्दो" सोम! "सुतः" अभिषुतस्त्वं "नः" अस्माकं "गोमत्" यज्ञ-साधन-गो-युक्तम् "अश्ववत्" अश्वयुक्तं धनं "धनिव" धन्व [वर्ण-विकारोऽत्र] गमय [धविर्गत्यर्थः (प०)भ्वादिः] ततोऽहं "शुचिं" पूतं दीप्यमानं "वर्णं" रसं "च" "गोषु" गव्येषु क्षीरादिषु "अधि धारय" अधिमिश्रयामीत्यर्थः ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ १
सनोहरीणाम्पतइन्दोदेवसरस्तमः।

१ १ ३ २ ३ १ २ ३ १ २
सखेवसख्येनर्योरुचेभव ॥ २ †॥

हे "हरीणाम्पते" अस्मदीयानां हरित-वर्णानां पशूनां स्वामिन्! हे "इन्दो" सोम! "देव!" "सरस्तमः" अतिशयेन दीप्त-रूपोपेतः "नर्यः" कर्म-नेतृभ्य ऋत्विग्भ्यः हितः "सः" त्वं

---

* ऋ० आ० ६,२,३,९ (२मा० २१८पृ०)=ऋ० वे० ७, ५, ८, ४।

† ऋ० वे० ७, ५, ८, ५।

"नः" अस्माकं "रुचे भव" दीप्तिकरो भव। कदृव? "सखेव" यथा सखा "सख्ये" मित्राय दीप्तिं करोति, तद्वत् ॥ २ ॥

अथ तृतीया।

१ २ ३ २ ३ १र २र ३ १ २ ३ १ ९
सनेमित्वमस्मदाअदेवङ्कश्चिदत्रिणम्।
३ १ २३ २ ३ २ ३ १ २ ३ २
साह्वाꣳइन्दोपरिबाधोअपहयुम् ॥ ३ * ॥ २०

हे सोम! "त्वं" "सनेमि" पुराणं सख्यम् "अस्मद्" अस्मासु "आ" कुरु। अपिच "अदेवम्" अदेवन-शीलं† "कश्चिद्" अपि "अत्रिणम्" अदन-शीलं राक्षसम् अस्मत्तः "अप" गमय। किञ्च हे "इन्दो" सोम! साह्वान् शत्रून् अभिभवन् "बाधः" बाधमानान् "परि" जहि। तथा "हयुं" हयवन्तं सत्यानृत-युक्तं वाह्याभ्यन्तरमय-हयोपेतं वा राक्षसमस्मत्तोऽपगमय ॥३॥२१

१र र १ २ र
॥ अुधम् ॥ गोमन्ना२यिन्दो। अश्ववोवा। सुतः
२ १ २३ ९ १ २ १९ १ २ १र
सुदा। क्षधनिवा। पूुचिच्चवर्णमधिगोषु। धा२३।
२ १र १ र र १
रयाउवा। पूुधिया२ ॥(१) सनोचरा२यिणाम्। पतो
१ १र १र १ २३२१ र २ १ १र १ २ १र
वा। इन्दोदेवा। अरक्षमाः। सखेवसख्येनरियोरु।

---

* ऋ० वे० ७, ५, ८, ६।

† 'अदेवं—देवानां भक्तो न भवति अभावदेवः तम् अदेवम्'—इति वि०।

२ १र १ र
चा २ ३ यि। भवाउवा। शूधिया २ ॥(२) सनेमिरू २

१ २र१र२१ २ ३ २ १ २र
वम्। अस्मदोवा। आदेवङ्काम्। चिदत्रिणाम्। सा

र २र १ २१र१र १ २ १र
ङ्काण्इन्दोपरिबाधोअ। पा२३। द्वयाउवा। शूधिया

१ २, १
२। ए२३च्चियाअ४३। ओ२३४५ई। डा(१) ॥ १४ * ॥[१]

२र र १ २, १
॥ चैतम् ॥ गोमन्नइन्दोअश्वावात्। सुतःसुदक्षध

२ १ ५ १, ३
निवा। शुचिच्चवर्णमाअधायिगो२३४ह्वायि। षू२धा२३

५र र २ १ १ १ १ १ २ र र र १
४औहोवा। ए ३। रया२३४५॥(१) सनोहरीणाम्पा

२ १ र र २ र २ १
ताथि। इन्दोदेवश्चरस्तमाः। सखेवसख्येनाअरायियो

५ १, ३ ५र र २ १ ३ १ १
२३४ह्वायि। रू२चा२ ३ ४ औहोवा। ए ३। भवा २ ३

१ १ २ र १ २ १र र
४५ ॥(२) सनेमित्वमास्मात्। आदेवङ्क्चिदत्रिणाम्।

२र र र, १ ५ १, ३ ५र र
साङ्काण्इन्दोपरीअबाधो२३४हायि। आरया२३४औहो

२ १ ३ १ १ १ १
वा। ए३। द्वयू२३४५म्(३) ॥ २ † ॥ [२]

---

*ऊ० गा० १२प्र० १ष० ४सा०। † ऊ० गा० १७प्र० १ष० २सा०।

॥ पौष्कलम् ॥ गोमन्ना३इन्दो। आश्वा२३४वात्।
सुतःसुदा। ज्ञाधाया२३४यिवा। प्रुचायिच्चवा। णमा
२धा२३४५यिगो६५६। षुधारया२३४५॥(१) सनोहा३रो।
णाम्या२३४ताये। इन्दोदेवा। प्सारस्ता २ ३ ४ माः।
सखायिवसा। खिया२यिना२३४५र्या६५६ः। रुचेभवा
२३४५॥(२) सनेमी३तु। वामा२३४स्मात्। आदेव
काम्। चायिदत्रा२३४यिणाम्। साङ्काण्इन्दो। परा
२यिवा२३४५धा६५६ः। अपद्वय्२३४५म्(३)॥६*॥[३]२०

अथाञ्जत इति पञ्चमं सूक्तम्,

तत्र प्रथमा।

अञ्जतेव्यञ्जतेसमञ्जतेक्रतुंरिहन्तिमध्वाभ्यञ्जते।
सिन्धोरुच्छ्वासेपतयन्तमुक्षणं
हिरण्यपावाःपशुमप्सुगृभ्णते॥ १†॥

* ऊ० मा० १८म० २ष० ६सा०।
† ऋ० आ० ६, २, २, ११ (२मा० १८३म०) = ऋ० वे० ७, ३, २०, ३।

सोऽयमृत्विजः "अञ्जते" गोभिः, तथा "व्यञ्जते" विविध-मञ्जन्ति, "समञ्जते" सम्यगञ्जन्ति [स्तुत्यर्थत्वादपुनरुक्तिः]। तथा "क्रतुं" बल-कर्त्तारं "रिहन्ति" लिहन्त्यास्वादयन्ति देवाः। तथा पुनः "मध्वा" मधुना गव्येन "अभ्यञ्जते" तमेव सोमं "सिन्धोः" उदकस्य रसस्याधारभूते "उच्छासे" उच्छ्रिते देशे "पतयन्तं" गच्छन्तं [पत्लृगतौ (भ्वा० प०)—इत्यस्मात् स्वार्थिके णिचि हृद्भावश्छान्दसः] "उक्षणं" सेक्तारं "हिरण्यपावाः" हिरण्येन पुनन्तः "पशुं" द्रष्टारं ["पशुः पश्यतेः"—इति (निरु० नै० ३, १६) यास्केनोक्तत्वात्] "अप्सु" वसतीवरीषु "गृभ्णते" गृह्णन्ति ॥ १ ॥

अथ द्वितीया।

३ २ ३१२ ३१र २र
विपश्चितेपवमानायगायतमह्वीनधारात्यन्धोअर्षति।

२ ३२३१ २र ३२३
अह्निर्नजूर्णामतिसर्पतित्वच

२ ३ १र २र ३२३१२
मत्योनक्रीडन्नसरद्वृषाहरिः॥ २ *॥

"विपश्चिते" मेधाविने "पवमानाय" पूयमानाय "गायत" स्तुतिं कुरुत। सच "विपश्चित्" सोमः "महो न धारा" महती वर्ष-धारेव "अन्धः" अन्नं रसात्मकम् "अभ्यर्षति" "अह्निर्न"

---

* ऋ० वे० ७, ३, २०, ४।

† 'विपश्चिते—विश्वराजे'—इति वि०।

अहिरिव "जूर्णिं" जीर्णां त्वचम् "अति सर्पति" अतिमुञ्चति धारा दशापवित्रात् अभिषवादि-कर्म्मणा त्वचं विमुञ्चतीत्यर्थः। "अत्यः न" अश्व इव "क्रीड़न्" क्रीड़मानः "असरत्" सरति द्रोण-कलशं गच्छति। "वृषा" वर्षकः कामानां "हरिः" हरित-वर्णो रसः॥ २॥

अथ तृतीया।

३ १र १र ३ २ ३ १ ३ १ २ ३ १ २
अग्रेगोराजाप्यस्तविष्यतेविमानोअक्ष्णामुवनेष्वर्पितः।

१ २ ३ १ २ ३ १ २ ३ १
हरिर्घृतस्नुःसुदृशीकोअर्णवो

३ १ २ ३ २ ३क २र
ज्योतीरथःपवतेरायओक्यः॥ ३ *॥ २१

"अग्रेगः" अग्रे गन्ता† "राजा" राजमानः "आप्यः" सुसंस्कृतः सोमः "तविष्यते" स्तूयते यः "अक्ष्णा" दिनानां "विमानः" निर्म्माता चन्द्रकला-ह्रास-वृद्ध्यधीनत्वादहर्व्यवहारस्य निर्म्माता "भुवनेषु" उदकेषु वसतीवरी-सम्बन्धिषु "अर्पितः" स्थापितः सः "राजा" "तविष्यते"। किञ्च "हरिः" हरित-वर्णः "घृतस्नुः" प्रस्तोदकः "सुदृशीकः" शोभन-दर्शनः "अर्णवः"

---

* ऋ० वे० ७, ३, २०, ५।

† 'अग्रेग.— अग्रे देवानां गच्छति'—इति वि०।

उदकवान् [अर्णइत्युदकं नाम (निघ० १,१२,१) ["ज्योतीरथः" ज्योतिर्मय-रथः "रायः" धनस्य प्रापयिता "ओक्यः"["ओकइति निवास-नाम" (निरु० नै० ३, ३) तस्य हितः ॥ ३ ॥ २१

॥ काव्यम् ॥ अच्छोवा। तायिवियच्छतायि। सम

च्छतायि। क्रतुंरिच्छन्तिमधुवा। भियच्छाता२यि।

सिन्धोरुच्छासेपतया। तमुत्ताणा२३म्। त्तायिरा३ण्या

पा। वाःपप्रूसा२३। प्रूगा३भ्र्णापुता६५६यि ॥(१)

विपोवा। चितेपवमाना। यगायाता२। मत्तीनधा

रात्रतिया। धोअर्षाता२यि। अच्छिन्नजूर्णामतिसा।

पतित्वाचा२३म्। आत्यो३नाक्री। उन्नसारा२३त्। वार्षा

३त्ता५रा६५६यिः ॥(२) अग्नोवा। गोराजाअपियाः।

तविष्याता२यि। विमानोअक्षांभुवनायि। धुवर्य्यायिता

२:। त्तरिर्घृतःसुःसुदशायि। कोअर्णावा२३:। ज्यो

२ ४ ५ २ १ १ १ ४
तो ३ राथाः। पवनायिरा २ ३। याओ ३ का ५ या

६५६:(३) ॥ १७ * ॥ [१] २१

इति सामवेदार्थप्रकाशे उत्तरार्चस्य षोड़शस्याध्यायस्य
चतुर्थः खण्डः ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ १६ ॥

॥ इति सप्तमः प्रपाठकः† ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे
उत्तरार्चे षोड़शोऽध्यायः ॥ १६ ॥

———000@000———

* ऋ० गा० १२५० १ ब० १०सा०।

† 'इति सप्तमः प्रपाठकः'—इति वि० मूलादि सर्व-सम्मतम्।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १७ ॥

॥ अथ सप्तदशोऽध्यायआरभ्यते ॥

तत्र,

प्रथमे खण्डे—

विश्वेभिरग्नइत्येतत् सूक्तं प्रथमं सूक्तं,

तत्र प्रथमा ।

१ २ ३ १ १ ३ २ ३ १ १ २
विश्वेभिरग्नेअग्निभिरिमंयज्ञमिदंवचः ।

१ २
चनोधाःसहसोयहो ॥ १ * ॥

हे "सहसोयहो" बलस्य पुत्र ! देवतारूप ! "अग्ने !" "विश्वेभिः" अग्निभिः सर्वैराहवनीयादिभिर्युक्तः त्वम् "इयम्" अस्मदीयं "यज्ञम्" "इदम्" अस्मदीयं "वचः" स्तोमञ्च सेवमानः "चनः" अन्नं "धाः" अस्मभ्यं धेहि ॥ १ ॥

अथ द्वितीया ।

२ ३ १२ २१ ३ १ १ ३ १ २ ३ १ १ १
यच्चिद्धिशश्वतानदेवंदेवंयजामहे ।

१२ २१ ३ २
त्वेदूतयेहविः ॥ २ † ॥

---

* ऋ० वे० १, १, २१, ५ । † ऋ० वे० १, १, २२, १ ।

"देवं देवम्" अन्यमन्यं वरुणेन्द्रादिरूपं नानाविधं देवता-विषयं "यजामहे" तत्रापि तत् "हविः" सर्वं "त्वे इत्" त्वय्येव* ह्रियते अन्य-देवतान्तर-विधोगोऽपि त्वदीयैव सेवेत्यर्थः। [तना—तनु विस्तारे (तना० प०), "क्विप् च (३, २, ७६)"—इति क्विप्, यद्वा पचाद्यच्, "सुपां सुलुगिति (७, १, ३९) तृतीयाया आकारः। देवंदेवैं—"नित्यवीप्सयोः (८, १, ४)"—इति द्विर्भावः, "तस्य परमाम्रेडितम् (८, १, २)"—इति उत्तरस्या-म्रेडितसञ्ज्ञायाम् "अनुदात्तञ्च (८, १, ३)"—इति सर्वानु-दात्तत्वम्। यजामहे—"निपातैर्यद् यदि-हन्त (८, १, ३०)" —इति निघात-प्रतिषेधः। त्वे—युष्मच्छब्दात्सप्तम्येकवचनस्य "सुपां सुलुगिति (७, १, ३९) शे-आदेशः, "त्वमावेकवचने (७, २, ९७)"—इति मपर्य्यन्तस्य त्वादेशः, शेषलोपे "अतो गुणे (६, १, ९७)"—इति परपूर्वत्वम्, "शे (१, १, १३)"—इति प्रगृह्य-सञ्ज्ञायां "प्लुत-प्रगृह्या अचि (६, १, १२५)"—इति प्रकृतिभावः। ह्रियते—"अकृत्सार्वधातुकयोः (७, ४, २५)"— इति दीर्घः॥ २॥

अथ तृतीया।

३ १ १ ३ २ ११ २ ११२ २१
प्रियोनोअस्तुविश्पतिर्होतामन्द्रोवरेण्यः।

३ २ २ १ १ ३ १
प्रियाःस्वग्नयोवयम्॥ ३ †॥ १

---

* 'त्वे इत्—त्वे त्वाम्। इत् इति पदपूरणः'—इति वि०।

† ऋ० वे० १, १, २१, १।

"विशपतिः" विशां प्रजानां पालकः ["पत्यावैश्वर्ये (६, २, १८)"—इति पूर्वपद-प्रकृतिस्वरे प्राप्ते "परादिश्छन्दसि बहुलम् (६, २, १९९)"—इत्युत्तरपदाद्युदात्तत्वम्] "होता" होम-निष्पादकः "मन्द्रः" हृष्टः* "वरेण्यः" वरणीयः [वृञ एण्यः (उ० ३, ९८) वृषादित्वादाद्युदात्तत्वम्] एवं विशिष्टोऽग्निः "नः" अस्माकं "प्रियः" "अस्तु" भवतु। "वयम्" अपि "सुमनयः" शोभनाग्नि-युक्ताः [बहुव्रीहौ "नञ्सुभ्याम् (६, २, १७२)"—इति उत्तरपदाद्युदात्तत्वम्] एवम्भूताः अतस्तव प्रिया भूयास्मः इति शेषः॥ ३॥ १

अथेन्द्रं वदति ऋचं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २ ३ २ १ २ ३ १ २

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः।

३ १ २ ३ १ २

अस्माकमस्तु केवलः॥ १†॥

हे ऋत्विग्यजमानाः "विश्वतः" सर्वेभ्यः जनेभ्यः "परि" उपरि अवस्थितः "इन्द्रं" "वः" युष्मदर्थं‡ "हवामहे" आह्वयामः। अतः स इन्द्रः "अस्माकं" "केवलः" साधारणः "अस्तु" इतरेभ्योऽप्यधिकमनुग्रहमस्मासु करोत्वित्यर्थः [इन्द्रं—रन् प्रत्ययान्तः (उ० २, २८), निपातादाद्युदात्तः (६, १, १९७)॥ १॥

---

* 'मन्द्रः—दीप्तः'—इति वि०।

† ऋ० वे० १, १, १४, ५।

‡ 'व.—बहुवचनमिदमेकवचनस्य स्थाने द्रष्टव्यम्, इन्द्रं त्वाम्'—इति वि०।

अथ द्वितीया।

१२ २१२१२ १२ २१२
सनोवृषन्नमुच्चरुꣳसत्रादावन्नपावृधि।

१ २ १ १ २
अस्मभ्यमप्रतिष्कुतः॥ २ *॥

हे "सत्रादावन्" अस्मदभीष्ट-फलानां सर्वेषां सह प्रदातः! ["आतो मनिन् क्वनिब्वनिपश्च (३, २, ७४)"—इति वनिप्, "आमन्त्रितस्य च (६, १, १९८)"—इत्यादुदात्तत्वम्, पादादित्वान्न निघातः (८, १, १९)] अतः कारणात् व्रीह्यादिनिष्पत्त्यर्थं हे "वृषन्" वृष्टि-प्रदेन्द्र! [आमन्त्रित-निघातः (८, १, १९)] "नः" अस्मदर्थम् "अमुं" "दृश्यमानं "चरुं" मेघं [चरतीति चरुः†] "भृ-मृग्रीत्यादिना (उ० १, ७) उ-प्रत्ययः, प्रत्यय-स्वरेणान्तोदात्तः] "अपावृधि" उद्घाटय [वृञ् वरणे (स्वा० उ०), लोटः सिप्, तस्य "सेर्ह्यपिच्च (३, ४, ८७)"—इति हि, "स्वादिभ्यः श्नुः (३, १, ७३)", तस्य "बहुलञ्छन्दसि (३, ४, ७३)"—इति लुक् "श्नु-सु-धृ-णु पृ-कृ-तृभ्यश्छन्दसि (६, ४, १०२)"—इति हेर्धिरादेशः, तस्य ङित्त्वात् पूर्वस्य गुणाभावः, निघातश्च, उद्घाटयेत्यर्थः] तथैव "अस्मभ्यम्" अस्मच्छब्दात् "भ्यसोभ्यम् (७, १, ३०)"—इति भ्यमादेशः, "ग्रेषे-(७,२,९०)"—इति तदो लोपः, "बहुवचने झल्येत् (७,३,१०३)"—इत्येत्वं न भवति "अङ्कतस्तेः पुनर्ङित्त्वविधिर्नेष्टिलस्य"—

---

* ऋ० वे० सं० १, १४, १।

† "चरुश्चरतेर्वा मन्दुरम्भ्यश्चादापः"—इति निरु० मै० ६, १२।

इत्युक्तम्। प्रातिपदिक-स्वरेण स्मेत्यकारउदात्तः। "भ्यसोऽभ्यम् (७,१,३०)" इत्यभ्यमादेश-पक्षे "शेषे लोपः (७,२,९०)"—इति मपर्य्यन्त-शेषस्यादशब्दस्य लोपः, तदा उदात्त-निवृत्तिस्वरेण अभ्यमआदेरकारस्य उदात्तत्वम्] अस्मदर्थम् "अप्रतिष्कुतः" प्रतिशब्द-रहितः केनचिदप्रतिशब्दितः [कुङ् शब्दे (भ्वा०आ०) "निष्ठा (३, २, १०२)"—इति कर्म्मणि क्त-प्रत्ययः, प्रतेः प्राक् प्रयोगः, पारस्करादेराकृतिगणत्वात् (६, १, १५७) सुडागमः, सुषामादेराकृतिगणत्वात् (८, ३, ९८) षत्वम्, नञ्-समासे अव्यय-पूर्वपद-प्रकृतिस्वरत्वम् (८, २, २), यद्यदस्माभिर्याच्यते तत्र सर्वत्र नेति प्रतिशब्दं नोच्चारयति अतोऽस्मद्विषये कदाचिदप्यस्खलिताः। एतदेवाभिप्रेत्य यास्कआह—"अप्रतिष्कुतो अप्रतिस्खलितो वा (निरु० नै० ६, १६)"—इति] ॥ २ ॥

अथ तृतीया।

१ १ १ १ १ २ २ १ १ १ १
वृषायूथेव वंसगः कृष्टीरियर्त्योजसा।
१ २ ३ १ २
ईशानोअप्रतिष्कुतः ॥ ३ * ॥ २

"वृषा" कामानां वर्षिता इन्द्रः "ओजसा" स्वकीयेन बलेनानुगृह्णातु "कृष्टीः" मनुष्यान्† "इयर्त्ति" प्राप्नोति‡। कीदृशइन्द्रः? "ईशानः" समर्थः "अप्रतिष्कुतः" प्रतिशब्द-

* ऋ० वे० १, १, १४, ३।

† 'कृष्टिः—कारयिता द्विज.'—इति वि०।

‡ 'इयर्त्ति—आगच्छति'—इति वि०।

रक्षितः याच्यमानं न परिहरतीत्यर्थः। दृष्टस्य दृष्टान्तः—"वंसगः" वननीय गतिर्ऋषभः "यूथेव" गो-यूथानि यथा प्राप्नोति तद्वत् [यूथाद्वा—युवन्ति मिश्रीभवन्तीति यूथानि, यु मिश्रणामिश्रणयोः (अदा० प०), "तिथ-पृष्ठ-गूथ यूथ-प्रोथाः (उ०२,१२)"—इति क्थ-प्रत्ययान्तो निपातितः, निपातनाद्दीर्घत्वम्, प्रत्ययस्वरेण अकारउदात्तः (३, १, ३), "ग्रेरस्कन्दसि बहुलम् (६,१,७०)"—इति ग्रे-लुक्,"इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् (२,४,७१वा०)"—इति ममामेऽपि स एव स्वरः॥ ३॥ २

त्वन्नश्चित्रऊत्याविति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २ ३ १३ ३ १ १
त्वन्नश्चित्रऊत्यावसोराधांसिचोदय।

३ २ ३ १८ २८ ३ १ २ ३ १ ३ २ ३ १८ १८
अस्मरायस्त्वमग्नेरथीरसिविदागाधन्तुचेतुनः॥ १ *॥

हे "वसो" वासकाग्ने! "चित्रः" दर्शनीयस्त्वम् "ऊत्या" रक्षया सह "राधांसि" धनानि "नः" अस्मभ्यं "चोदय" प्रेरय "अस्य" लोके परिदृश्यमानस्य "रायः" धनस्य त्वं "रथीः असि" रंहिता नेता भवसि अतः कारणात् अस्मभ्यं धनानि प्रेरयेत्यर्थः। अपिच "नः" अस्माकं "तुचे" [अपत्य नामैतत् निघ० २, २, १) अपत्याय अपतन-हेतुभूताय पुत्रादये "गाध" प्रतिष्ठां "तु" क्षिप्रं "विदाः" लम्भय॥ १॥

---

* ऋ० सा० १, १, ३, ७ (१ भा० १६०पृ०)=ऋ० वे० ४, ८, १, ४।

अथ द्वितीया ।

१ १ १ ११ २८ २ २ २ ११८ २८ १ १ २
पर्षि तोकमुत तनयमप्स्वग्ने हिंसीरदब्धैरप्रयुत्वभिः ।

२ १ १ २ १ १ १ २ १ १ २ १ १ २
अग्ने चेडाꣳसि दैव्या युयोधि नो देवानिङ्कराꣳसि च ॥२*॥३

हे "अग्ने !" त्वम् अदब्धैः केनाप्यहिंसितैः "अप्रयुत्वभिः" अपृथग्भूतैः [यौतिरत्र पृथग्भावार्थः] सहितैः "पर्षभिः"† पालन-साधनैः "तोकं" पुत्रं "तनयं" पौत्रं च "पर्षि" पालय "दैव्या" देव-सम्बन्धीनि च "इडांसि" क्रोधान् "नः" अस्मत्तः "युयोधि" पृथक् कुरु ॥ २ ॥ ३

१ २ २ ३ २ २
॥ वारवन्तीयम् ॥ तुवन्नश्चा३ औहोवायि । त्राजता२३४

५ १ २ २ २ १ ५ १ २
या । वसोराधाꣳसिचोदायो२३४वायि । अस्मरायस्त्व

२ २ २ ३ ४ ५ १ २ ५ २ ३
मग्नेरथीरा३४औहोवा । इडा२३४वायि । उङ्गवा२३४

१ २ १ २ २ १ ७ २ १ ३ २ ४ २ ५ १ २
साय । विदागा । धान्तुचेतू३४ । औहोवा । इडा

५ ३ २ १ ४ २ ५
२३४वायि । औहो३ १ २३४ । नाः । एहियाइडा ॥(१)

---

* ऋ० वे० २, ८, २, ५ ।

† 'पर्षभिः—छान्दसी रेफलोपः तृतीयाबहुवचनञ्चेदं पर्तृभिः'—इति वि० ।

२ र र र १ २ ७ ५ २ र र
विदागाधाऔहोव्हायि। तूचायितू२३४नाः। विदागाध

र १ ५ ५ र २
न्तुचेतूनो२ ३ ४व्हायि। पर्षितोकन्ननयम्यर्तृभिष्टू३ ४।

३र ४र ५ २ १ ५ १ २
औव्होवा। पर्षायिता२३४व्हा। कन्ननयंयर्तृभिष्टू३४।

३र ४र ५ १ ३ ० ५ २ ३ ५ २ १
औहोवा। इव्हा२३४व्हायि। उरुवा२३४वाम्। अद

२र १ ७ २ ३र ४र ५ १ ३ ५
ब्धैः। आप्रयुत्वा३४। औव्होवा। इव्हा २ ३ ४ व्हायि।

३र २ ५र ५ २ र र र
औव्हो३१२३४। भोः। एव्हियाइव्हा॥(२) अदब्धैराऔ

१ २ ३ ५ २ र १
व्होव्हायि। प्रायत्वा२३४भायिः। अदब्धैरप्रयुत्वाभो२३४

५ १ र र र र र र ३र ४र ५ २
व्हायि। अग्नेव्हेडाएसिदैव्यायुयोधा३४। औव्होवा। अ

१ ५ १र र र र २ ३र
ग्नायिव्हा२३४यिव्हायि। डाएसिदैव्यायुयोधा ३ ४। औ

४र ५ १ ३ ५ २ ३ ५ २ १र ५
व्होवा। इव्हा२३४व्हायि। उरुवा२३४नाः। अदेवा।

१ ७ र २ ३र ४र ५ १ ३ ५ ३र
नायिङ्गराएसा३४। औव्होवा। इव्हा२३४व्हायि। औ

२ ५र ५ ४
व्हो३१२३४। चा। एव्हियाइव्हा। व्हो५ई। डा(३)॥६*॥[१]३

---

* ऋ० गा० १२म० २अ० ६सा०।

अथ किमित्तद्इति ऽचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

१र ९र ३ २ ३ २ ३
किमित्तेविष्णोपरिचक्ष्यंभूत्*
१र २र ३ १ २ ३ १ २
प्रयद्ववक्षेशिपिविष्टोअस्मि।
१र २र ३ १र २र ३ २उ
मावर्पोअस्मदपगूहएतत्
३ १ २ ३ २ ३ १ २
यदन्यरूपःसमिथेबभूथ॥ १†॥

[पुरा खलु विष्णुः स्वरूपं परित्यज्य कृत्रिमं रूपान्तरं धारयन् सङ्ग्रामे वसिष्ठस्य साहाय्यं चकार। तं जानन् ऋषिः अनया प्रत्याचष्टे। अत्र निरुक्तम्—"शिपिविष्टो विष्णुरिति विष्णोर्हैं नामनी भवतः। कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः।***॥ किन्ते विष्णोऽप्रख्यातमेतद् भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेपइव निर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिरपि वा प्रशंसा-नामैवाभिप्रेतं स्यात्। किन्ते विष्णोः प्रख्यातमेतद्भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्न-रश्मिः शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति। मावर्पो अस्मदपगूह एतत्। वर्प इति रूप नाम वृणोतीति सतः। यदन्यरूपः समिथे सङ्ग्रामे भवसि

---

* "परिचक्ष्यभूत्"—इति ऋ०-पाठः।

† ऋ० वे० ५, ६, १५, ६।

संयत-रश्मिः (निरु० नै० ५, ८)"—इति] तत्र कुत्सितार्थ-पक्षे योजना—हे "विष्णो !" "ते" तव तत् "नाम" "किं" "परिचक्षि" प्रख्याप्यं भवतीति शेषः [किं शब्दः क्षेपे। अप्रख्याप्य-मेव तद्भवति] "यत्" नामास्मभ्यं "प्र ववक्षे" प्रब्रूषे "शिपि-विष्टो अस्मि"—इति [अन्तर्णीतोपमानमेतत्। शेप इव निर्वे-ष्टितः तेजसा अन्नाच्छादितो भवामीति अश्लीलार्थ-वादिनीदं नाम न प्रशस्तमित्यर्थः। यद्वा, परिपूर्वो चक्षिर्वर्जनार्थः तन्नाम किं चक्षि परिचक्ष्यं परिवर्जनीयं परित्याज्यं विरुद्धार्थ-प्रति-पादकत्वात् स्वतएव परित्यक्तं हि तत्। शिष्टं समानं पूर्वेण]। अन्यम् उक्त-रूप-विलक्षणं यद् वैष्णवं रूपमस्ति "एतद्" "वर्पः" रूपम् "अस्मत्" अस्माकं "मा अप गूहः" अवगूढं संवृतं मा कुरु [गूह संवरणे (भ्वा० उ०)] अपितु तदेव रूपं प्रकट-यति। वैष्णवस्य रूपस्य गूहने का प्रशक्तिरिति चेत्—"यद्" यस्मात् त्वम् "अन्यरूप इत्" रूपान्तरमेव धारयन् "समिथे" सङ्ग्रामे "बभूथ" अस्माकं सहायो भवसि तस्मात् त्वयेदं गूहनं न कार्यमिति ॥ प्रशंसा-पक्षे तु—हे विष्णो ! "ते" तव तत् "नाम" "किं" "परिचक्षि" प्रख्यातं भवति ? न प्रख्यापनीयं स्वतएव प्रख्यातम्, अप्रख्यातम् प्रख्यापनीयम्। किं तन्नाम ? "शिपिविष्टो अस्मि" आविष्टोऽस्मीति यन्नाम "प्रब्रूषे"। यत एवं प्रख्यातरूप-स्त्वमतोऽस्माद् कामनाद् वैष्णवं रूपं संवृत्तं मा कार्षीः। इदानीं गूढरूपोऽपि "यद्" यस्मात् त्वं गूढोऽपि ज्ञायसएवेति व्यर्थमेव तस्य रूपस्य गूहनं "समिथे" सङ्ग्रामे "अन्यरूपः" कृत्रिम-रूपाद् यदन्यद् वैष्णवं रूपं शौर्यादि-लक्षणं तादृग्रूप एव "बभूथ" भवति।

तस्मात् त्वं गूढोऽपि ह्यायम एवेति व्यर्थमेव तस्य रूपस्य गूहनम्। अतो बहु-तेजस्कं यद्वैष्णवं रूपं तदेवास्माकं प्रदर्शयेति तात्पर्यार्थः॥ १॥

अथ द्वितीया।

१ २२ ३ १ २ ३ २ १ १
प्रतत्तेअद्यगिरिविष्टहव्यमर्ण्यः

२ ३ १ १ ३ २
शंसामिवयुनानिविद्वान्।

१ २ ३ २ ३ १ २ ३
तन्त्वागृणामितवसमतव्यान्

१ २ ३ १२ ३ २२ १ २
क्षयन्तमस्यरजसःपराके॥ २ *॥

हे "गिरिविष्ट" रश्मिभिराविष्ट! विष्णो! "ते" तव "तत्" प्रसिद्धं विष्णुरिति प्रख्यातं नाम "अर्ण्यः" स्वामी स्तुतीनां हविषां वा तथा "वयुनानि" ज्ञातव्यान्यर्थजातानि† "विद्वान्" जानन् यच्च "हव्यम्" आह्वान-योग्यं नाम अहम् "अद्य" इदानीं प्रशंसामि प्रकर्षेण स्तौमि। "तवसं" प्रवृद्धं‡ तं "त्वा" त्वां विष्णुम् "अतव्यान्" अतवीयान्¶ अप्रवृद्धतरोऽहं "गृणामि" स्तौमि। कीदृशम्? "अस्य" "रजसः" लोकस्य "पराके" दूरदेशे क्षयन्तं निवसन्तम्॥ २॥

---

* ऋ० वे० ५, ६, २५, ५।

† 'वयुनानि—नामानि'—इति वि०।

‡ 'तवसं—बलवन्तम्'—इति वि०।

¶ 'अतव्यान्—यः स्थापयितुं न शक्यते सोऽतव्यः'—इति वि०।

अथ तृतीया।

१ २ ३१२ २२ ३
वषट्तेविष्णवासआकृणोमि
१ २ ३ २
तन्मेजुषस्वशिपिविष्टहव्यम्।
१ २ ३ १ ३ १ २
वर्द्धन्तुंत्वासुष्टुतयोगिरोमे
३ १ २ ३ २ २ १ २
यूयम्पातस्वस्तिभिःसदानः॥ ३ * ॥ ४

हे "विष्णो!" "ते" तुभ्यं "आसः" आस्यात् "आ" अभिमुखं "वषट् कृणोमि" वषट्कारेण हवियाचयामि। हे शिपिविष्ट" शिपयो रश्मयस्तैराविष्ट! विष्णो! "तत्" वषट्कृतं "मे" मदीयं "हव्यं" हविः† "जुषस्व" सेवस्वं। "सुष्टुतयः" शोभन-स्तुत्यात्मिकाः "गिरः" वाचश्च "त्वा" त्वां "वर्द्धन्तु" वर्द्धयन्तु। हे विष्णो "यूयं" [बहुवचनं पूजार्थम्। यद्वा,] भवदादयो देवाः सर्वे "स्वस्तिभिः" अविनाशिभिः "नः" अस्मान् "सदा" सर्वदा "पात" रक्षत॥ ३ ॥ ४

५ ३२ २ ४२ १
॥ गौरीवितम्॥ किमित्। तेवाऽयि। षणेपरिचा।
१ २ २ २ १५ २ २
त्तिनामप्रयद्ववक्षेशिपिविष्टोअस्माऽयि। मावर्पाआ ३ १

---

* ऋ० वे० ५, ६, २४, ७।

† 'हव्यं—घृत-पुरोडाशादि लक्षणम्'—इति वि०।

४ २ १ २ ४२
२३। स्मदपगूहणतद्याप्रदन्या। रूपःसमा३१२३यि। थे
५ ४ ५ १ ३२ २ ४
वोवा। भूप्रथोऽहायि ॥(१) प्रतत्। तेआ३। द्यग्नि
५ १ २ २
पिवायि। ष्टहव्यमर्थ्यःग्रण्सामिवयुनानिऽविद्वा २ ३ न्।
२ २ ४ २ १
तान्त्वागृणा३१२३। मितवसमतव्यान्त्वापयन्ताम्। आ
२ ४ ५ ४ ५
स्यरजा ३ १ २ ३। सःपोवा। रा ५ को ६ हायि॥(२)
५ ३२ २ ४ २ ५ १ २ २
वषट्। तेवा३यि। ष्वासआ। क्षणोमितन्मेजूषस्व
१ २ २ २
ग्निपिविष्टहव्या२३म्। वाईन्तुत्वा३१२३। सुष्टुतयोगि
२ २ १ २ ४ २ ४
रोमेयूयम्पा। तासुवस्ता३१२३यि। भिःसोवा। द।५
५
नोऽहायि(३) ॥ ६ * ॥ [१] ४

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य सप्तदशस्याध्यायस्य
प्रथमः खण्डः† ॥ १ ॥

---

* ऊ० गा० २१प्र० ३अ० ६सा०।

† 'उक्तो वाजपेयः'—इति वि०।

अथ द्वितीय-खण्डे*—

वायोशुक्रोअयामीति तृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

१ २ ३ १ २ ३ २ ३ २ ३ १ २
वायोशुक्रोअयामितेमध्वोअग्रन्दिविष्टिषु ।

१ २ ३ १ २ ३ १ २ ३ १ २
आयाहिसोमपीतयेस्पार्होदेवनियुत्वता ॥ १ † ॥

हे "वायो !" तुभ्यं "शुक्रः" ‡ दीप्तोऽहं "मध्वः" मधुरं सोमरसं [कर्मणि षष्ठी (२, ३, ६५)] "अग्रम्" इतरेभ्यः पूर्वम्¶ "अयामि" प्रापयामि [अयतिरन्तर्भावित-ण्यर्थः] । किमर्थम् ? "दिविष्टिषु" दिवो द्युलोकस्येषणेषु सत्सु, हे "देव" वायो ! "स्पार्हः" स्पृहणीयस्त्वं "नियुत्वता" नियुद् वायोः प्रतिनियतोऽश्वः§, तेन साधनेन "आयाहि" "सोमपीतये" सोमपानाय ॥१॥

अथ द्वितीया ।

१ २ १ २ ३ १ २
इन्द्रश्चवायवेषाꣳसोमानाम्पीतिमर्हथः ।

१ १ २ २ २ ३ १ ३ २
युवाꣳहियन्तीन्दवोनिम्नमापोनसाध्वक ॥ २ ‖ ॥

---

* 'इदानीं राजसूयउच्यते'—इति वि० ।

† ऋ० वे० ३, ७, २३, १ ।

‡ 'शुक्रः सोमउच्यते'—इति वि० ।

¶ 'अग्र'—प्रधानभूतम्'—इति वि० ।

§ "नियुतो वायोः"—इति निघण्टावश्वनामसु (१, १५, १०) पाठादिति भावः ।

‖ ऋ० वे० ३, ७, २३, २ ।

हे "वायो" त्वम् "इन्द्रश्च" "एषां" गृहीतानां सोमानां "पीतिं" पानम् "अर्हथः"। "युवां" "इन्दवः" वाप्युदकाः सोमाः "यन्ति" प्राप्नुवन्ति "निम्नं" खात-प्रदेशम् "आपः न सध्र्यक्" उदकानि यथा सहैव गच्छन्ति तद्वत् सर्वे सोमा युवां "यन्ति हि" ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३ १ १ १ २
वायविन्द्रश्चगुष्मिणासरथꣳशवसस्पतो।

३ १ २ ३ २ ३ १ २ ३ १ २
नियुत्वन्तानऊतयआयातꣳसोमपीतये ॥ २ * ॥ ५

हे "वायो!" त्वम् "इन्द्रश्च" "शवसः" बलस्य "पती" पालयितारौ अतएव "शुष्मिणा" बलवन्तौ "नियुत्वता" नियुत्-सञ्ज्ञाश्ववन्तौ युवां "सरथं" समानमेव रथमारुह्येति शेषः। "नः" अस्माकम् "ऊतये" रक्षणाय "सोमपीतये" सोम-पानाय च "आयातम्" आगच्छतं [यद्वा, सरथमधितिष्ठन्तमारुह्य चायातमिति वाक्य-द्वयम्] ॥ २ ॥ ५

अथ चतुष्पेति तृचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १ २ २ ३ १ २ ३ १ २ २
अधत्तपापरिष्कृतोवाजाꣳअभिप्रगाहसे।

१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
यदीविवस्वतोधियोहरिꣳहिन्वन्तियातवे ॥ १ † ॥

---

* ऋ० वे० ३, ७, २६, ३। † ऋ० वे० ७, ४, २५, २।

"त्वपा" ["सुपां सु-लुगिति (७, १, ३९) पञ्चम्या आकारः] त्वपाया रात्रेः "अथ" अनन्तरं प्रातःकाले "परिष्कृतः" [भूषणार्थे "सम्पर्युपेभ्यः (६, १, १३७)"—इति करोतेः सुड़ागमः] अद्भिरलङ्कृतः [यद्वा, त्वपयित्र्यां सेनायामलङ्कृतः] सन् हे सोम! त्वं "वाजान्" अन्नानि बलानि च "अभि" लक्ष्य "प्र गाहसे" प्रगच्छसि। "विवस्वतः" परिचरणवतः यजमानस्य* "धियः" कर्म-साधन-भूता अङ्गुलयः "हरिं" हरितवर्णं त्वामंशुं "यातवे" पात्राण्यभिगमनाय "यदि" "हिन्वन्ति" प्रेरयन्ति तर्हि सवनानि गच्छसीति॥ १॥

अथ द्वितीया।

१ १ २ २ ३ १ २ ३ १ २
तमस्यमर्ज्यामसिमदोयदिन्द्रपातमः।

१२ २२ ३ १ २ ३ २ ३ २ ३ १ २
यञ्जावआसभिर्दधुःपुरानूनञ्चसूरयः॥ २†॥

"अस्य" सोमस्य "तं" रसं "मर्जयामसि" मर्जयामः शोधयामः अलङ्कुर्मो वा "यः" "मदः" मदकरः रसः "इन्द्रपातमः" इन्द्रेणात्यन्तं पीतो भवति। किञ्च "गावः" गन्तारः "सूरयः" स्तोतारः "पुरा च" "नूनं" इदानीं च "यं" सोम-रसम् "आसभिः" आस्यैः "दधुः" धारयन्ति च पिबन्तीति यावत् [यद्वा, 'गावः' धेनवः 'यं' सोमं तृणादिष्ववस्थितम् 'आसद्भिः' आस्यैः 'दधुः' धारयन्ति तृणरूपेण भक्षयन्ति॥ २॥

* 'विवस्वतः—आदित्यस्य'—इति वि०।

† ऋ० वे० ७, ४, २५, ३।

अथ तृतीया।

१२ २२ ३ १ २ ३ २ ३क २२
तङ्गाथयापुराण्यापुनानमभ्यनूषत।
३ १ २ ३ १ १ ३ २ ३ २ ३ १ २
उतोक्रपन्तधीतयोदेवानान्नामबिभ्रतीः॥ २ *॥ ६

"पुनानं" पूयमानं सोमं "पुराण्या" पुराकृतया "गाथया" स्तुत्या "अभि अनूषत" स्तोतारोऽभिष्टुवन्ति [नु स्तवने (अदा० प०), लुङि रूपम्]। "उतो" अपिच "नाम" कर्म्मार्थं नमनं "बिभ्रतीः" बिभ्राणाः "धीतयः" अङ्गुलयः "देवानां" सोम-रूप-हविः-प्रदानाय "क्रपन्त" कल्पयन्ति समर्था भवन्ति॥ २॥ ६

अश्वन्नत्वेति ऋचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

२३ २३२ १ ३१ १ ३१२ २२
अश्वन्नत्वावारवन्तंवन्दध्याग्निन्नमोभिः।
३ १ २ ३१ २
सम्राजन्तमध्वराणाम्॥ १ †॥

"अध्वराणां" यज्ञानां "सम्राजन्तं" सम्राट्-स्वरूपं स्वामिनम् "अग्निं" "नमोभिः" स्तुतिभिर्हविर्भिर्वा "वन्दध्यै" वन्दितुं प्रवृत्ता इति शेषः। अग्नेर्दृष्टान्तः—"वारवन्तं" वाल-युक्तम् "अश्वं न" अश्वमिव अश्वो यथा वालेन बाधकान् मशक-मक्षिकादीन्

* ऋ० वे० ७, ४, २५, ४।

† ऋ० आ० १, १, २, ७ (१भा० १२०पृ०)=ऋ० वे० १, २, २२, १।

परिहरति, तथा त्वमपि ज्वालाभिरस्महिरोधिनः परिहरसीत्यर्थः। [वारवन्तं—मतुपः पित्त्वादनुदात्तत्वम्; घञो जित्त्वादाद्युदात्तो वार-शब्दः, "कर्षात्वतः (६, १, १५८)"—इति अन्तोदात्तत्वं व्यत्ययेन प्रवर्त्तते ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ ३ २ २ ३ १ २ ३ १ २
सघानःसूनुःशवसापृथुप्रगामासुशेवः।

३ २ ३ १ २
मीढ्वाँ२अस्माकम्बभूयात् ॥ २ * ॥

"स घ" स एवाग्निः† "नः" अस्माकं "सुशेवः" सुसुखो भवत्विति शेषः। कीदृशः? "शवसा" बलस्य शवसः "सूनुः" पुत्रः [विभक्ति-व्यत्ययः] "पृथुप्रगामा" पृथु-प्रगमनः [प्रकर्षेण गमनं प्रगामः हलश्च (३, ३, १२१)"—इति घञ्, पृथुः प्रगामो यस्यासौ पृथु-प्रगामः, "सुपां सु-लुक् (७, १, ३९)"—इति पूर्वसवर्णआकारः, बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् (८,२,१)] किञ्च "अस्माकं" "मीढ्वान्" [मिह सेचने (भ्वा० प०)—इत्यस्मात् क्वसु-प्रत्ययान्तो "दाश्वान् साह्वान् मीढ्वांश्च (६, १, १२)"—इति निपातितः] कामानां वर्षिता "बभूयात्" [भवतेश्छान्दसलिटः तिङां तिङो भवन्तीति तिङादेशः, यासुट्, स्यानिवद्भावात् गुणभाव-द्विर्वचने "भवतेरः (७, ४, ७३)"—इत्यत्वं "तिङः (८, १, २७)"—इति निघातो भवत्वित्यर्थः ॥ २ ॥

* ऋ० वे० १, २, २२, २।

† 'घ-इति पादपूरणः'—इति वि०।

अथ तृतीया ।

१ १ २ २ ३ १ २ १ ३
सनोदूराच्चनिमर्त्यादधायोः ।
१ १२ ३ २ ३ १ १
पाहिसदमिद्विश्वायुः ॥ ३ * ॥ ७

हे अग्ने ! "विश्वायुः" [इण्गतावित्यस्माद् भावे एतेर्णिजन्तात् पुंसि, विश्वमयनं गमनं यस्येति बहुव्रीहिः, बह्वव्रीहौ विश्वं सञ्ज्ञायाम् (६, २, १०६)—इति पूर्वपदात्तत्वं व्याप्त-गमन इत्यर्थः] स त्वं "दराच्च" दूरेऽपि आराच्च आसन्नाद् "मर्त्यात्" मनुष्याद् वैरिणः "नः" अस्मान् "सदमित्" सर्वदैव† "नि पाहि" नितरां पालय ॥ ३ ॥ ७

॥ वारवन्तीयोत्तरम् ॥ २ र र १ २ अश्वन्नत्वा । औह्वोहायि ।
३ ५ २ १ ५ १ वारावार३४न्ताम् । वन्दाध्यार३४ह्वायि । अग्नायिन्न
२ ३र ४र ५ १ ३ ५ २ ३ मार३४ । औह्वोवा । इह्वार३४हायि । उक्षवा २ ३ ४
५ २ १र २ १ ७ २ ३र ४र ५ १ १ भोः । सम्राज । तामध्वरा३४ । औह्वोवा । इह्वा२३
५ ३र २ ५र ५ ४ह्वायि । औह्वो३१२३४ । णाम् । एह्यि४ह्वा ॥(१)

---

* ऋ० वे० १, १, २१, ३ ।

† 'इत्—इति पद-पूरणः'—इति वि० ।

२ २ २ १ २ ३ ५ २ १
सघानःसाऔहोहायि। नूःग्रावा२३४सा। पृथूप्रा२३४
५ १२२ २ ३२४२ ५ १ ३ ५
हा। गामाशुग्रा३४। औहोवा। इहा२३४हायि।
२ ३ ५ २१२ २ १ ७ ० ३२४२ ५
उक्षवा२३४वाः। मीढाऽअ। स्राकवभू३४। औहोवा।
१ ३ ५ ३२ २ ५२
इहा२३४हायि। औहो३१२३४। यात्। एहिया६
५ २ २ २ २ १ २ ३ ५
हा॥(२) सनोदूराऔहोहायि। चाअसा२३४हा।
२ १ ५ १२ २ ३२४२ ५ १ ३
निमार्त्ता२३४हायि। यादघ्वा३४। औहोवा। इहा२
५ २ ३ ५ २२ १ २ १ ३ २
३४हायि। उक्षवा२३४योः। पाहिस। दामिदिश्वा३४।
३२ ४२ ५ १ ३ ५ ३२ २
औहोवा। इहा२३४हायि। औहो३१२३४। यूः।
५२ ५ ४
एहियाहहा। हापुई। डा(३)॥१७*॥[१]

॥ वारवन्तीयाद्यम्॥ १ २ आश्वा। औहो२३४वा। ना
२ ३२ ५ १२२ १ २ ३२
त्वा। औहो२३४वा। वारवन्तंवन्दध्या। आग्ना। औ
५ १२२ १२ २ १ २२ १
हो२३४वा। नमोभिःसम्म्राजन्ताम्। आध्वराणाम्।

---

* ऊ० गा० १२प्र० १च० १७सा०।

४ ५ १ २ ३र ५ १ २
औ२३हावा ॥(१) साघा। औहो२३४वा। नाःसा।

३र ५ १ २ र १ ३र ३र
औहो२३४वा। नुःश्रवसापृथुप्रा। गामा। औहो२

५ १ र २र र १र २ १ २र १
३४वा। सुश्रवोमोढ्वाँअस्मा। काम्बभूयात्। औ२३

४ ५ १ २ ३र ५ ० १ २र ३र
होवा ॥(२) साना। औहो२३४वा। दूरा। औहो

२र १र २ १ ३ ४
२३४वा। चासाच्चनिमा। तीया। औहो२३४वा।

२र १र २र १ २ १ २र १ ४ ५
घायोःपाहिसदाम्। आयिदिस्वायूः। औ२३होवा।

४
होपूई। उा(३) ॥ १५ * ॥ [२] ७

त्वमिन्द्रप्रतूर्त्तिष्विति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १ २ ३ १र २र ३ १ २
त्वमिन्द्रप्रतूर्त्तिष्वभिविश्वाअसिस्पृधः।

३ १ २ ३ १ १ ३ १ २ ३ १ २ ३ १
अशस्तिहाजनितावृचतूरसित्वन्तूर्यतरुष्यतः ॥ १ ॥

हे "इन्द्र!" "त्वं" "प्रतूर्त्तिषु" सङ्ग्रामेषु "विश्वाः" सर्वाः "स्पृधः" युद्धकारिणीः शत्रु-सेनाः "अभि असि" अभिभवसि।

---

* ऋ० मा० २३प्र० १ऋ० १५सा०।

५१ ऋ० मा० ४, १, ३, ८ (१भा०६२३पृ०)=ऋ० वे० ६, ७, ३, ५।

किञ्च, हे "तूर्य!" शत्रूणां बाधकेन्द्र! "अग्रस्तिहा" दैत्यानामग्रस्तीनां हन्तासि। "जनिता" असुरेभ्यः अग्रस्तीनां जनयिता चासि। अतएव "विश्वतः" सर्वस्य दात्र-वर्गस्य सर्वप्रकारेण वा हिंसिता "असि" "तरुष्यतः" बाधकांश्च बाधमानोऽसि ॥ १ ॥

अथ द्वितीया।

१ १ ३ १ २ ३ १ १
अनुतेशुष्मन्तुरयन्तमीयतुः
३ १ ३ ३ १ ३ ११
द्यावाक्षामारुन्नमातरा।
१ २ ३ १ १ ३ १ १
विश्वास्तेस्पृधःश्नथयन्तमन्यवे
३ १ २ २ ३ १ २
वृत्रंयदिन्द्रतूर्वसि ॥ २ * ॥ ८

हे इन्द्र! "ते" तव "शुष्मं" बलं "तुरयन्तं" शत्रुं हिंसन्तं† "द्यावाक्षामा" द्यावापृथिव्यौ "मातरा" मातरौ "शिशुं न" शिशुमिव "अनु ईयतुः" अगच्छतः, गमन-मात्रेदृष्टान्तः। किञ्च, हे इन्द्र! त्वं "यद्" यस्मात् "वृत्रं" वृत्र-नामानं शत्रुं "तूर्वसि" हंसि। अतः "ते" तव "मन्यवे" क्रोधाय "विश्वाः" सर्वाः "स्पृधः" सङ्ग्राम-कारिणः सेनाः "श्नथयन्त" श्नथयिता खिन्ना भवन्ति ॥ २ ॥ ८

---

* ऋ० वे० ६, ७, ३, ६।

† 'तुरयन्तं—शीघ्र-गन्तारम्'—इति वि०।

॥ अभीवर्त्तम् ॥ तुवा ३ माग्नेयिन्द्रप्रतूर्त्तिघ्नोवा। आ
भिविश्वाः। असायिस्या१द्वा२ः। आग्नेत्वा३१२३४।
जनितावृ। त्वतूरा१सा२यि। तुवान्तूर्य्या२। तरू३।
ष्या२३४५। ता२३४५ः ॥(१) तुवाग्नेतूर्य्यन्तरुष्यतोवा।
तूवंतूर्य्य। तरुष्या१ता२ः। आनुतेमू३१२३४। म्नन्तु
रय। तमायिया१तू२ः। क्षोणायिग्मा१यिमू२म्। नमा
३। ता२३४५। रा२३४५ ॥(२) क्षोणा ३ यिशा
३ यिमून्नमातरोवा। क्षोणीग्मिमू३म्। नमाता १ रा
२। वायिश्वास्ता३१२३४यि। स्मृधश्चथय। तमान्या१
वा२यि। वृत्रांया१दा२। द्रतू३। वा२३४५। सा२३
४५यि(३) ॥ १८ * ॥ [१] ८

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य सप्तदशस्याध्यायस्य द्वितीयः खण्डः ॥ २ ॥

* ऊ० गा० १२प्र० २अ० १८खं०।

अथ तृतीय-खण्डे—

यज्ञइन्द्रमिति तृचं प्रथमं सूक्तम्,

तत्र प्रथमा।

२ १२ २२ ३ २३ ३ १ २
यज्ञइन्द्रमवर्द्धयद्यद्भूमिंव्यवर्तयत्।

३ १ १ ३ २ ३ १
चक्राणऔपशन्दिवि ॥ १ * ॥

"यज्ञः" यजमानैरनुष्ठीयमानो यागः "इन्द्रं" देवम् "अवर्द्धयत्" [श्रूयते हि—"इन्द्र इदं हविरजुषतावीवृधतमहो ज्यायो कृतः"—इति] "यद्" यस्मात् "भूमिं" पृथिवीं "व्यवर्त्तयत्" तृप्त्यादि-प्रदानेन विशेषेण वर्त्तमानमकरोत्। किङ्कुर्वन्? "दिवि" अन्तरिक्षे मेघम् "औपशम्" उपेत्य शयानं "चक्राणः" कुर्वन् [यद्वा, आत्मनि समवेतो वीर्य-विशेष औपशः, तमन्तरिक्षे कुर्वन्] ॥ १ ॥

अथ द्वितीया।

२ १२ ३ २ ३ १ २ ३ २
व्याऽन्तरिक्षमतिरन्मदेसोमस्यरोचना।

२ ३ १ २२ ३ २
इन्द्रोयदभिनद्बलम् ॥ २† ॥

---

* ऋ० आ० २, १, ३, ७ (१भा० १०१ पृ०) = ऋ० वे० ६, १, १४, ५
† ऋ० वे० ६, १, १५, २।

"सोमस्य" पानेन "मदे" हर्षे सति* "रोचना" रोचमानम् "अन्तरिक्षम्" अयम् "इन्द्रः" "वि अतिरत्" व्यवर्धयत्† "यद्" यस्मात् कारणात् "वलम्" आवृत्य-स्थितमसुरं मेघं वा "अभिनत्" व्यदारयत् ॥ २ ॥

अथ तृतीया।

१२ २२ ३ १ २ ३ १ २ १२ २२ ३ २
उद्गाआजदङ्गिरोभ्यआविष्कृण्वन्गुहासतीः।

३ १ २ ३ २
अर्वाञ्चमुनुदेवलम् ॥ ३ ‡ ॥ ९

"अङ्गिरोभ्यः" ऋषिभ्यः¶ वलानुचरैः पणिभिरपहृता गाः "उदाजत्" उदगमयत्। किङ्कुर्वन्? "गुहा" गुहायां विले "सतीः" विद्यमाना यथा न दृश्यन्ते तथा पणिभिर्निगूढास्ता गाः "आविष्कृण्वन्" प्रकाशयन्। अपिच पणीनामधिपतिं "वलम्" असुरमपि "अर्वाञ्चम्" अधोमुखं "नुनुदे" प्रेरितवान् ॥ ३ ॥ ९

अथ तृचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१२ ३ २ ३ १ २ ३ १ २
त्यमुवःसत्रासाहंविश्वासुगीर्ष्वायतम्।

१ २ ३ १२
आच्यावयसूतये ॥ १ § ॥

---

* 'मदे—सोमस्य भक्षणार्थम्'—इति वि०।

† 'वि—अन्तरिक्षम्, अतिरत्—विविधेन प्रकारेण अन्तरिक्षं व्यापयति'—इति वि०। ‡ ऋ० वे० ६, १, १५ ३।

¶ 'अङ्गिरोभ्यः—अङ्गिरो नाम देवाः'—इत्यादि वि०।

§ ऋ० आ० १, ९, ३, ६ (१भा० २८६४०) = ऋ० वे० ६, ६, १६, २।

यजमानः स्तोतारं सम्बोध्याह— हे स्तोतः! "सत्रासाहं" [सत्रा-शब्दो बहु-वाची] बहूनामभिभवितारं [यद्वा, शत्रून् स्व-बलेन सङ्कल्प जेतारं] "वः" युष्मदीयासु "विश्वासु" "गीर्षु" सर्वेषु स्तोत्रेषु "आयतम्" विस्तृतं सर्वत्रेन्द्र एव स्तूयते, तस्मात् तेषु "त्यं" तम् "उ" [—इत्यवधारणे] तमेवेन्द्रम् "ऊतये" अस्मद्रक्षणाय "आ च्यावयसि" [च्युङ् प्रुङ् गतौ (स्वा० आ०)] त्वदीयैः स्तोत्रैर्यज्ञं प्रत्याभिमुख्येनागमय ॥ १ ॥

अथ द्वितीया।

३१२ २२ ३१ १ ३१२ २२
युध्मꣳसन्तमनर्वाणꣳसोमपामनपच्युतम्।

१२ ३ ११
नरमवार्यक्रतुम् ॥ २ * ॥

एवं गुणोपेतमिन्द्रमागमय्याह—"युध्मं" शत्रूणां सम्प्रहारकं "सन्तम्" अतएव "अनर्वाणम्" अन्यैरधृत-गमनं, तस्मात् "अनपच्युतं" सङ्ग्रामेषु शत्रुभिरहिंसितं, "सोमपां" सोमस्य पातारम्, अस्य सोमस्य मदे सति "अवार्यक्रतुं" भटैरनिर्वार्णीय-कर्म्माणं, "नरं" सर्वस्य नेतारम्। एतादृग्गुणोपेतं तमिन्द्र मागमयेति पूर्वेण सम्बन्धः ॥ २ ॥

---

* ऋ० वे० ६, ६, १६, ३।

अथ तृतीया ।

१ ३२उ ३२१ २
शिक्षाणइन्द्रराय आपुरुविद्वाँ२ऋचीषम ।

१ २ ३२३१२
अवानःपार्येधने ॥ ३ * ॥ १०

हे "ऋचीषम" स्तुत्या समं† [यद्वा, ईष गति-हिंसादानेषु (भ्वा० प०), अस्मादमः प्रत्ययः, सर्वैर्गन्तव्य ! दर्शनीय ! वा] उक्त-गुणोपेत ! हे इन्द्र ! "विद्वान्" सर्व-विषय-ज्ञानवान् त्वम् "आ" शत्रुभ्यः आहृत्य "रायः" धनानि "नः" अस्मभ्यं‡ "पुरु" बहुवारं "शिक्ष"¶ प्रयच्छ [यद्वा, पुरु इति रायो विशेषणम्, बहूनि धनानि प्रयच्छ। किञ्च, "पार्ये" परा: शत्रवः तत्र§ "धने" आजिहीर्षिते शत्रु-धने "नः" अस्मान् "अव" रक्ष; शत्रून् हत्वा तद्धनेनास्मान् पालयेत्यर्थः ॥ ३ ॥ १०

१ ५ ४२ ५
॥ सत्रासाहीयम् ॥ त्या३४म् । उवःसत्रासाहम् ।

५ १२ २ १ १
ओहवा । विश्वासुगीर्षाया२ताम् । आ२च्या । वा२

---

* ऋ० वे० ६, ६, १६, ४।

† 'ऋचीषम—ऋचोष इति कर्मनाम, कर्मणा सत्यजनीयः'—इति वि० ।

‡ संहिता-पाठे तु "शिक्षा णः"—इति मूर्धन्य-चुतिः तत्र "मूर्धपदात् (८, ४, १०६)"—इति मूर्धन्यः ।

¶ संहिता-पाठे तु "शिक्षा"—इति दीर्घाभावः श्रूयते "ह्रस्वोऽतस्तिङ्यः (६, ३, १३५)"—इति दीर्घः ।

§ 'पार्ये—वरणीये धने—इति वि० ।

३ २ १६ २२ ३२ २ १ ५ ५
३या। सियौ३हो। वाचा३४३यि। ता२ ३ ४योई३चा

३ २ २ ६ ५
यि ॥(१) युध्मा ३ ४म्। सन्तमनर्वाणम्। ओ ६ वा।

१२ २ १ १ २ ०१
सोमपामनपच्यू२ताम्। ना२राम्। आ२३वा। रि

६ २२ ३२ २ १ ५ ५ ३
यौ३हो। वाचा३४३यि। क्रा२३४तोई३चायि ॥(२) शि

२ २ २ ५ ५ १ २ २
क्षा३४। णइन्द्रायआ। ओई३वा। पुरुविद्राएक्षचो

१ १ २ १६ २२ ३२ २
षा२मा। आ२वा। ना२३:पा। रियौहो। वाचा३४

१ ५ ५
३यि। धा२३४नोई३चायि(३) ॥ ४ * ॥ [१] १०

तवत्यदिति ऋचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

२३१ २ २२३ २७ ३१२ ०१२ २२
तवत्यदिन्द्रियम्बहत्तवदृष्ममुतक्रतुम्।

११ ३२३ १२०
वज्रएशिशातिधिषणावरेण्यम् ॥ १ † ॥

हे इन्द्र! "त्यत्" प्रसिद्धम् "इन्द्रियम्" इन्द्रस्य लिङ्गं ‡ "बृहत्" प्रभूतं वीर्यं "धिषणा" स्तुतिः "शिशाति" शिशति

---

* ऊ० गा० १३प्र० २ख० ४सा०।

† ऋ० वे० ६, १, १८, २।

‡ 'इन्द्रियं—वीर्यम्'—इति वि०।

तिक्ष्णीकरोति। तथा "तव" त्वदीयं "दक्ष" शोषकं बलम् "उत" अपिच "क्रतु" प्रज्ञानं बलं कर्म वा "वरेण्य" वरणीयं "वज्रम्" आयुधञ्च शिशाति तीक्ष्णीकरोति ॥ १ ॥

अथ द्वितीया।

२ २ १ २ २ १ २ १ १ २ १ २
तवद्यौरिन्द्रपौंस्यम्पृथिवीवर्ह्यतिश्रवः।

२उ २ १ १
त्वामापःपर्व्वतासश्चिन्विरे ॥ २ * ॥

हे "इन्द्र!" "द्यौः" द्युलोकः "तव" "पौंस्य" बलं "वर्हति" वर्धयति "श्रवः" त्वदीयं यशः "पृथिवी" वर्धयति [हृधेर्ण्यन्ता-ल्लेटि अपि "छन्दस्युभयथा (३, ४, ११७)"—इति आर्द्धधातुक-त्वात् "णेरनिटि (६, ४, ५१)"—इति टि-लोपः] तं "त्वाम्" "आपः" उदकान्यान्तरिक्षाणि "पर्वतासः च" पर्ववन्तो मेघाश्च गिरयश्च वा "चिन्विरे" प्रीणयन्ति स्वामित्वेन प्राप्नुवन्तीति वा ॥ २ ॥

अथ तृतीया।

१२ २२ ३१२ २२ २ १ २ २ १ २
त्वांविष्णुर्बृहन्क्षयोमित्रोगृणातिवरुणः।

१२ २२ ३ २ २ १ २
त्वांशर्द्धोमदत्यनुमारुतम् ॥ २ † ॥ ११

हे इन्द्र! "बृहन्" महान् "क्षयः" निवास-हेतुः "विष्णुः" "मित्रः" "वरुणः" च "त्वां" "गृणाति"-स्तौति। तथा "मारुतं"

* ऋ० वे० ६, १, १८, २। † ऋ० वे० ६, १, १८, ४।

मरुत्सम्बन्धि "गर्दः" बलं "त्वाम्" "अनु मदति" तव मदमनुलक्ष्य पश्चात् माद्यति त्वामनुमादयति वा ॥ ३ ॥ ११

॥ सौभरम् ॥ तवाऽत्याऽदिन्द्रियम्बृहोवा। तवद्
क्षमुतक्रा२तूंवज्रा२३म्। होयि। शा२३४यिशा। ति
धिषणा। वराऽहाऽयि। णा२याऽ३४औहोवा ॥(१)
तवाऽद्यौऽरिन्द्रपौ९सियोवा। पृथिवीवर्ङ्गतिश्रा२वास्तु
वा२३म्। होयि। आ२३४पाः। पर्वतासः। वहाऽ
यिहाऽयिहाऽयि। न्ना२यिरा२३४औहोवा ॥(२) नुवा
ऽवाऽयिष्णुवृ९हन्त्सयोवा। मित्रोगृणातिवरू२णास्तुवा२
३म्। होयि। शा२३४र्ङ्गाः। मदत्य। नुमाऽहाऽ।
रू२ताऽ३४औहोवा। ऊ२३४५(३) ॥ ५ * ॥ [१] ११

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य सप्तदशस्याध्यायस्य तृतीयः खण्डः ॥ ३ ॥

---

* ऊ० मा० १७प्र० २ख० ५सा०।

अथ चतुर्थे खण्डे—

नमस्तेअग्नइति हृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१२ २१२ २१२ २१२
नमस्तेअग्नओजसेगृणन्तिदेवकृष्टयः।

१२१२१२
अमैरमित्रमर्दय॥ १ *॥

"देव" द्योतमान! हे "अग्ने!" "ते" तुभ्यं "नमः गृणन्ति" नमस्कार-शब्दमुच्चारयन्ति। किमर्थम्? "ओजसे" बलाय "कृष्टयः" मनुष्याः यजमानाः अतोऽहमपि गृणामीत्यर्थः। त्वञ्च "अमैः" बलैः "अमित्रं" शत्रुम् "अर्दय" नाशय॥ १॥

अथ द्वितीया।

२१उ २ १२१२१२ २१२ २१
कुवित्सुनोगविष्टयेग्नेसंवेषिषोरयिम्।

१२ २१२
उरुकृदुरुणस्कृधि॥ २ †॥

हे "अग्ने!" त्वं "नः" अस्माकं "गविष्टये" गवामिच्छाय "कुवित्सु" बहु "रयिं" धनं "संवेषिषः" सम्प्रापय "उरुकृत्" त्वं "नः" अस्मान् "उरु कृधि"॥ २॥

---

* ऋ० आ० १, १, २, १ (१भा० १११ ४०) = ऋ० वे० ६, ५, २५, ५ = य० वे० ४, २८।

† ऋ० वे० ६, ५, २६, १ = य० वे० ४, ४१।

चथ तृतीया।

१ २ २१२ २२ ३१२
मानोअग्नेमहाधनेपरावर्ग्भारभृद्यथा।

३ १३ २ ३१ २
संवर्गꣳसꣳरयिञ्जय ॥ ३ * ॥ १२

हे "अग्ने!" "नः" अस्मान्, अस्मिन् "महाधने" सङ्ग्रामे "मा परावर्क्" मा परित्याक्षीः "भारभृद् यथा" भारवाही यथा भारमन्ते परित्यजति तद्वत् "संवर्गं" शत्रुभ्यः सहच्छाद्यमानं† "रयिं" धनं "सं जय" अस्मदर्थम् ॥ ३ ॥ १२

॥ जरावोधीयम् ॥ २ १ १२ १ २ २१ नमस्त्रओवा। ग्राओजसायि।
२ १ २ १ २
गृणान्त्रा२३यिदे। वक्रष्टायाः। अमायिरा१मा२३यि
४ ५ ३ २ २ १२ १
चाम्। अ। दयो३४५ई। डा॥(१) कुवित्सनोवा। गा
२१ २१ ०२ २ १
विष्टयायि। अग्नायिसा२३वे। षिषोरायायिम्। उरू
२ ४८ ५ ३ १ २२ २ १
कृ१दू२३रु। णः। क्रधो३४५ई। डा॥(२) मानोअग्नो.
२ १ २ १ २१ २ १
वा। माहाधनायि। परावा २ ३ र्ग्भा। रभृद्याथा।

---

* ऋ० वे० ६, ५, २६, २।

† 'संवर्गं'—सम्यग् गवां वर्गम्'—इति वि०।

२ ४ ५ ३ ३
संवार्गाए १ साए २ ३ रा। यिम्। जयो ३ ४ ५ ई।
डा(३) ॥ १६ * ॥ [१] १२

अथ समस्यमन्यवइति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१ १ ३ १ ३ २ ३ १ २ ३ १ २
समस्यमन्यवे विशो विश्वानमन्तकृत्यः।
३ १ २ ३ १ २
समुद्रायेव सिन्धवः ॥ १ † ॥

"विशः" विशन्त्यः "विश्वाः" सर्वाः "कृत्यः" प्रजाः "अस्य" इन्द्रस्य "मन्यवे" क्रोधाय [यद्वा, मन्युर्मनन-साधनं स्तोत्रं तदर्थं "सं नमन्त" सम्यक् स्वतएव प्रह्वीभवन्ति उच्चारयन्ति वा। तत्र दृष्टान्तः— "समुद्राय इव" यथा समुद्रमुदधिं प्रति "सिन्धवः" स्यन्दन-शीला नद्यः स्वयमेव नमन्ते, तद्वत् ॥ १ ॥

अथ द्वितीया।

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २
विचिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना।
१ २ ३ १ २
वज्रेण शतपर्वणा ॥ २ ‡ ॥

---

* ऋ० मा० १६प्र० १अ० १६सा०।
† ऋ० मा० २, १, ५, १ (१भा० ३१६पृ०) = ऋ० वे० ५, २, ८, ४।
‡ ऋ० वे० ५, ८, १०, १।

"चित्" [—शब्दोऽप्यर्थः सच भिन्नक्रमः] "दृळ्हस्य" आवरक-स्यापि "दोधतः" अत्यर्थं भृशं वा जगत् कम्पयतः सुरस्य "शिरः" मूर्द्धानं "शतपर्वणा" शत-सङ्ख्या-पर्वाणि धारा यस्य तादृशेन "दृंहणेन" सेचन-समर्थेन वीर्यवता वज्रेण इन्द्रः "वि बिभेद" विचिच्छेद ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३२उ ३ १ २
ओजस्तदस्यतित्विषउभेयत्समवर्त्तयत्।

२ ३ १ २ ३ १ २
इन्द्रश्चर्म्मेवरोदसी ॥ ३ * ॥ १३

"अस्य" इन्द्रस्य "तत्" "ओजः" बलं "तित्विषे" दीदिपे [त्विष दीप्तौ (भ्वा० उ०)] "यत्" येन ओजसा अयम् "इन्द्रः" "उभे" "रोदसी" द्यावापृथिव्यौ "चर्म्म इव" "समवर्त्तयत्" सम्यग् वर्त्तयति [यथा कश्चित् किञ्चित् चर्म कदाचिद् विस्तारयति कदाचित् सङ्कोचयति एवं तदधीने अभूतामित्यर्थः॥ ३॥ १३

अथ सुमन्मावस्वोति ऋचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

२२ ३ २३ १ २ ३१२
सुमन्मावस्वीरन्तीषनरो ॥ १ † ॥

---

* ऋ० वे० ५, ८, ९, ५।

† नान्यत्र क्वापेषा ऋग् दृश्यते।

हे इन्द्र! तव अश्वौ "सुमन्मा" शोभन-ज्ञानौ* "वस्वौ" धनवन्तौ "रन्तौ" रमणीयौ "सूनरी" सुष्ठु नेत्री [यद्वा, सुमन्मा शोभन-मननीया मम स्तुतिः प्रवृत्तेति शेषः। अन्यत् समानम्] ॥ १ ॥

अथ द्वितीया।

१२ ३१ २३ २३१२ २२३१
सरूपवृषन्नागह्योमौभद्रौधुर्यावभि।

२ ३१२ २२
ताविमाउपसर्पतः ॥ २ † ॥

हे "सरूप!" हे "वृषन्" कामानां वर्षकेन्द्र! "भद्रौ कल्याणौ "द्यमौ" रथे युज्यमानौ "धुर्यौ" वहन-योग्यावश्वौ "अभि आ गहि" आगच्छ अस्मद् यज्ञं प्रति शीघ्रं गच्छ "तौ" "द्यमौ" अश्वौ "उप सर्पतः" त्वां सम्यक् सेवेते ॥ २ ॥

अथ तृतीया।

१२३ १ २ ३२३ १ २
नोवशीर्षाणिमृढ्वमध्वआपस्यतिष्ठति।

१ १ ३१२ ३१
पृङ्क्षेभिर्हृग्भिर्हृग्न् ॥ ३ ‡ ॥ १४

---

* 'सुमन्मा—सुवस्वा'—इति वि०।

† नाप्येषा क्वचिदन्यत्र दृश्यते।

‡ नैषाऽन्यत्र दृश्यते क्वचित्।

हे ऋत्विग्जनाः ! "मध्ये" "आपस्य" रसस्य इन्द्रः "तिष्ठति"। किं कुर्वन् ? "दशभिः" दश-सङ्ख्याकैः "शृङ्गेभिः" अङ्गुलिभिः हस्ताग्रैः उभाभ्यां "दिशन्" अस्मदभीष्टमर्थं प्रयच्छन् यज्ञे तिष्ठति। हे ऋत्विग्यजमानाः ! तं पश्यत "शीर्षाणि नि मृढ्व"* यूयमिन्द्रगमन-विषय-श्रेयांसि शिरसा धारयध्वमित्यर्थः ॥ ३ ॥ १४

॥ वारवन्तीयोत्तरम् ॥ साओहोहायि। मा२३४ न्मा। वा२३४हायि। खायिरा३४। ओहोवा। इहा २३४हायि। उऊवा२३४न्तो। खना३४। ओहोवा। इहा२३४हायि। ओहो३१२३४। रायि। एहियाई हा ॥(१) सखपवाओहोहायि। षानागा२३४ हो। इमीभा२३४हा। द्रौधुर्य्यावा३४। ओहोवा। इहा२ ३४हायि। उऊवा२३४भो। ताविमो। ऊपसर्य्या३४। ओहोवा। इहा२३४हायि। ओहो३१२३४। ताः। एहियाइहा ॥(२) नोवशीर्षाओहोहायि। णायिमाई

* 'निमृढ्व'—निर्मार्जनं कुरु'—इति वि०।

५ २१ ५ १ २ ३र ४र
२३४वाम्। मध्याआ२३४ह्वा। पस्त्यतिष्ठा३४। औहो
५ १३ ५ २ ३ ५ २ १र २
वा। दूह्वा२३४ह्वायि। उङ्वा२३४तायि। घृङ्गैभिः।
१० २ ३र ४र ५ १३ ५ ३र २
दाग्नभिर्हा३४। औहोवा। दूह्वा२३४ह्वायि। औहोइ
५र ५ ४
१२३४। शान्। एहियाईहा। हो५ई। उ(३)॥१४*॥[१]१४

इति सामवेदार्थप्रकाशे उत्तरायत्यस्य सप्तदशस्याध्यायस्य
चतुर्थः खण्डः॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः॥ १७ ॥

॥ इति अष्टमप्रपाठकस्य प्रथमार्द्धः† ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे
उत्तरायत्ये सप्तदशोऽध्यायः
समाप्तः॥ १७ ॥

———ooo@ooo———

---

* ऊ० गा० १३प्र० २ष० १४सा०।

† 'अष्टमस्य प्रथमोऽध्यायः, 'समाप्ताश्चैकाद्याः'—इत्यादि वि०।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १८ ॥

॥ अथाष्टादशोऽध्यायआरभ्यते* ॥

तत्र,

प्रथमे खण्डे —

पन्यम्पन्यमिति ऋचात्मकं प्रथमं सूक्तं,

तत्र प्रथमा ।

१ २ १ २ ३ १ २ ३ १ २
पन्यम्पन्यमित्सोतारआधावतमद्याय ।

१ २ ३ १ २ १ १
सोमंवीरायशूराय ॥ १ † ॥

हे "सोतारः" अभिषोतारोऽध्वर्यवः ! "मद्याय" मादयितव्याय "वीराय" विक्रान्ताय "शूराय" शौर्यवते इन्द्राय "पन्यम् पन्यम् इत्" सर्वत्र स्तुत्यमेव "सोमम्" "आ धावत" अभिगमयत प्रयच्छतेत्यर्थः ॥ १ ॥

---

* 'इदानीमहीना उच्यन्ते । द्विरात्र-प्रभृतयश्चतुर्विंशाः एकादशरात्र-पौष्करीक-पर्यन्ताः'—इति वि० ।

† ऋ० सा० २, १, १, ९ (१सा० ३०४पृ०)=ऋ० वे० ५, १, २१, ५ ।

अथ द्वितीया।

१ १२ ३१२ २ ३ १ २ ३ १ २
एवहरीब्रह्मयुजाशुभमावक्षतःसखायम्।

१ २ ३ १२ २२
इन्द्रङ्गीर्भिर्गिर्वणसम् ॥ २ * ॥

"ब्रह्मयुजा" ब्रह्मणा मन्त्रेण स्तोत्रेण हविषा वा युज्यमानौ "शुभ्रा" शुभ्रौ सुखकरौ शक्तौ वा "हरी" अश्वौ "इह" अस्मिन् यज्ञे "सखायं" समान-ख्यानं मित्रभूतम् "इन्द्रम्" "आ वक्षत" आवहताम्। कीदृशमिन्द्रम्? "गीर्भिः" स्तुतिभिः प्रख्यापित-माहात्म्यं "गिर्वणसं" गिरा सम्भक्तारं स्तुतिभिः सम्भजनीयं वा ॥ २ ॥

अथ तृतीया।

१ १ ३ १ ३१२ २२ ३ २२ ३ २
पातावृत्रहासुतमाघागमन्नारेअस्मत्।

१ २ ३ १ २
नियमतेशतमूतिः ॥ ३ † ॥ १

"सुतम्" अभिषुतं "पाता" पानशीलः [ताच्छिलिकस्तृन् (३, २, १३५), "न लोकाव्यय (२, ३, ६९)"—इति कर्मणि षष्ठ्याः प्रतिषेधः] "वृत्रहा" वृत्रस्यासुरस्य हन्ता इन्द्रः "आगमत्" "घ"‡ [—इत्यवधारणे] आगच्छतैव, "अस्मत्" अस्मत्तः

* ऋ० वे० ५, ७, २२, १।
† ऋ० वे० ५, ७, २२ १।
‡ 'आ घ एतावुपसर्गौ'—इति वि०।

"आरे" दूरे देशे मा भवतु। आगत्य च "गतमूतिः" बहुविधरक्षणः इन्द्रः "नि यमते" अस्मदीयान् गवान् नियच्छतु तिरस्करोतु [यद्वा, धनान्यस्मभ्यं नियच्छतु ददातु] ॥ ३ ॥ १

॥ औतकक्षम् ॥ पन्यम्पन्यमित्सोतारः। पन्यम्पन्यो
वा। आ३यित्सोता३राः। आधाव। ता२३। हा३
हा३। मादी२या२३४या। सोमंवीरा३। हा३हा।
यम्पूरा२३या३४३ ॥(१) एहहरीब्रह्मयुजै। हहरोवा।
ब्रा३ह्मायू३जा। शग्माव। ता२३। हा३हा३। ताः
मा२खा२३४याम्। आगिन्द्रङ्गीर्भा३यिः। हा३हायि।
गिर्वणा२३सा३४३म ॥(२) पातावृत्रहात्तम्। पातावो
वा। त्रा३हास्तू३ताम्। आघाग। मा२३त्। हा३
हा३यि। नारे२आ२३४स्मात्। नायियमृता३यि। हा

३ २ १ २ १
३ त्वायि। शतमू २ ३ ती ३ ४ ३:। ओ २ ३ ४ ५ ई।

डा(३) ॥ १ * ॥ [१] १

अथ आत्माविशन्त्विति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १ २ ३ १ १ ३ १ २
आत्माविशन्त्विन्दवःसमुद्रमिवसिन्धवः।

२३ ३ १ २
नत्वामिन्द्रातिरिच्यते ॥ १ † ॥

हे "इन्द्र!" "इन्दवः" स्रवन्तः सोमाः "त्वा" त्वाम् "आ विशन्तु" सर्वतः प्रविशन्तु। तत्र दृष्टान्तः—"समुद्रमिव सिन्धवः" स्यन्दन-शीला नद्यः यथा समुद्रं जलाशयं सर्वतः प्रविशन्ति तद्वत्। यतएवं तस्मात् हे "इन्द्र!" "त्वां" कश्चिदपि देवो बलेन धनेन वा "नातिरिच्यते" नातिरिक्तो भवति सामर्थ्यवान् त्वत्तोऽधिको नास्तीत्यर्थः ॥ १ ॥

अथ द्वितीया।

३ १ २ ३ १ २ ३ १ ३ २ ३
विव्यक्थमहिनावृषन्भक्षंसोमस्यजाग्रवे।

१ २ ३ १ २
यदिन्द्रजठरेषुते ॥ २ ‡ ॥

---

* ऋ० गा० १४म० १अ० १सा०।

† ऋ० आ० ३, १, ४ (१भा० ४२६ प०)=ऋ० वे० ६, ६, १९, १।

‡ ऋ० वे० ६, ६, १९, १।

"भक्त" पानं प्रति "महिना" महिम्ना "विव्यक्थ" सर्वतो व्याप्तवानसि [व्यचतेर्लिटि थलि "लिटाभ्यासस्योभयेषाम् (६,१,१७)"—इति सम्प्रसारणम्]हे "इन्द्र!" "यः" सोमः "ते" तव "जठरेषु" उदरेषु प्रविशति, तस्य पानं व्याप्तवानसीति शेषः ॥ २ ॥

अथ तृतीया।

१ २ ३ २ १ १ २ २ १ २
अरन्तइन्द्रकुक्षयेसोमोभवतुवृत्रहन्।
२३ १ २ ३ १ २
अरन्धामभ्यइन्दवः ॥ ३ * ॥ २

हे "वृत्रहन्" वृत्रस्यापामावरकस्यासुरस्य मेघस्य पापस्य वा हन्तः! "इन्द्र!" सोऽस्माभिर्दीयमानः "ते" तव "कुक्षये" "अरम्" अलं पर्य्याप्तो भवतु! किञ्च, "इन्दवः" सर्वतः क्षरणशीलाः सोमाः भवन्तु। "धामभ्यः" नानाविधेभ्यः शरीरेभ्यः तव तेजोभ्यो वा अरमलं पर्य्याप्ता भवन्तु [अनेन तेजसा हविर्भाक् त्वमस्मीति सूचितम्। अस्मदीयाः सोमा एव तव शरीरभूतेभ्यो देवेभ्य इति पर्य्याप्ता भवन्तु नान्यदीया इति भावः ॥ ३ ॥ २

॥ आष्टादशं द्वयम् ॥ आत्माविशन्त्विन्दवः। ऐयाहा

---

* ऋ० वे० ६, ६, १९, ४।

यि। समुद्रा१मा२यि। वसायिन्वा१वा२३:। ऐया२३
हायि। नत्वामा१यिन्द्रा२। तिरायिव्या१ता२३यि।
ऐया२३हायि। नत्वामा१यिन्द्रा२। तिरायिच्या१ता
२३यि। ऐया२३हा३४३यि॥(१) विव्यक्थमद्भिनावृषन्।
ऐयाहायि। भत्ताꣳसो१मा२। सृजाग१वा२३यि।
ऐया२३हायि। यत्रायिन्द्रा१जा२। ठरायिषू१ता२३
यि। ऐया२३हायि। यत्रायिन्द्रा१जा२। ठरायिषू१
ता२३यि। ऐया२३हा३४३यि॥(२) अरन्तइन्द्रकुक्षये।
ऐयाहायि। सोमोभा१वा२। तुवार्चा१हा२३न्।
ऐया२३हायि। अरान्भा१मा२। भ्यायिन्दा१वा२३:।
ऐया२३हायि। अरान्भा१मा२। भ्यायिन्दा१वा२३:।
ऐया२३हा३४३यि। ओ२३४५ई। डा(३)॥२*॥[१]

* ऋ० गा० १४प्र० १अ० २मा०।

॥ उद्वꣳशीयम् ॥ आत्वाविशन्त्विन्दवआ । समुद्राः ।
मिवसिन्धा२३वाः । नत्वा२ꣳहो१यि । आ२३यिन्द्रा ।
तिरा१यिच्या३तायि । नत्वामा२३४यिन्द्रा । तायिरा३
उवा३ । उप् । च्या३२तो३५हायि ॥(१) विव्यच्युमद्दि
नावृषन्ना । भत्तꣳसोमस्यजाग२३वायि । यआ२हो१यि ।
द्रा२३जा । ठरा१यिषू३तायि । यइन्द्रा२३४जा । ठारा
३उवा३ । उप् । षू३२तो३५हायि ॥(२) अरन्तइन्द्रकु
त्तयआ । सोमोभवतुवृचा२३हान् । अरा२ꣳहो१यि ।
धा२३मा । भ्यआ१यिन्दा३वाः । अरन्धा२३४मा । भ्य
आ३उवा३ । उप् । दा३२वो३५हायि(३) ॥१*॥[२]२

---

* ऋ० मा० १८प्र० १अ० १षा० ।

अथ जराबोधेति तृचात्मकं तृतीयं सूक्तम्

तत्र प्रथमा।

१२ ३१२ ३१ २१२ १२
जराबोधतद्विविड्ढिविशेविशेयज्ञियाय।
१ २ ३१२ ३ २
स्तोमꣳरुद्रायदृशीकम्॥ १ *॥

हे "जराबोध" जरया स्तुत्या बोध्यमान! हे अग्ने! "विशे विशे" तत्तद्यजमान-रूप-प्रजानुग्रहार्थं "यज्ञियाय" यज्ञ-सम्बन्ध्यनुष्ठान-सिध्यर्थं "तद्" देवयजनं "विविड्ढि" प्रविश। यजमानोऽपि "रुद्राय" क्रूरायाग्नये तुभ्यम्। कीदृशम्? "दृशीकम्" दर्शनीयं समीचीनं स्तोत्रं करोतीति शेषः [अत्र यास्क एवं व्याख्यातवान्—"जरा स्तुतिः जरतेः स्तुति-कर्मणस्तां बोध, तया बोधयितरिति वा; तद्विविड्ढि तत् कुरु, मनुष्यस्य मनुष्यस्य यजनाय। स्तोमं रुद्राय दर्शनीयम् (निरु०दै०४८)"—इति॥१॥

अथ द्वितीया।

१२ ३१ २ ३ २३१२ ३ १
सनोमहाꣳअनिमानोधूमकेतुःपुरुश्चन्द्रः।
३१२ २२
धियेवाजायहिन्वतु॥ २ †॥

---

* ऋ० भा० १, १, १, ५ (१भा० ११६ पृ०=ऋ० वे० १, २, १३, ५।

† ऋ० वे० १, २, २४, १।

"सः" अग्निः "नः" अस्मान् "धिये" कर्मणे "वाजाय" अन्नाय च "हिन्वतु" प्रीणयतु । कीदृशः ? "महान्"[संहितायां नकारस्य रुत्वानुनासिकावुक्तौ] गुणाधिकः "अनिमानः" [न-विद्यते निमानोऽस्येति बहुव्रीहौ "नञ्सुभ्याम् (६,२, १७२)"—इत्युत्तर-पदान्तोदात्तत्वम्] निमान-वर्जितः अपरिच्छिन्नइत्यर्थः, "धूमकेतुः"[बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् (८, २, १) धूमेन ज्ञाप्यमानः* "पुरुश्चन्द्रः" [चदि आह्लादने दीप्तौ च (भ्वा० प०) अस्मात् "स्फायि-तञ्चि (उ० २, १३)"—इत्यादिना कर्त्तरि रक्, पुरुश्चासौ चन्द्रश्च समासान्तोदात्तत्वम् "ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे (६, १, १५१)"—इति सुट्, तस्य शुक्लेन शकारः] बहु-दीप्तिरित्यर्थः [धिये—"भावेकाचः (६, १, १६८)"—इति चतुर्थ्या उदात्तत्वम् । हिन्वतु—हविः-प्रीणनार्थम् "इदितो नुम् धातोः (७, १, ५८)"—इति नुम्] ॥ २ ॥

अथ तृतीया ।

२ ३ १ २ ३ १ ३ १ २ ३ १ २
सरेवाऽइवविश्पतिर्दैव्यःकेतुःशृणोतुनः ।

३ २ ३ २ ३ १ २
उक्थैरग्निर्बृहद्भानुः ॥ ३ † ॥ ३

---

* 'धूमकेतुः—धूमध्वजः'—इति वि० ।

† ऋ० वे० १, २, २४, २ ।

"सः" "अग्निः" "उक्थेभिः" स्तोत्रैर्युक्तान् "नः" अस्मदीयान् "शृणोतु"। तत्र दृष्टान्तः—"रेवान् इव" यथा धनवान् वन्दिनां स्तोत्रं शृणोति, तद्वत् [एतत्तदोः (६, १, १३२)"—इति सोर्लोपः) "रयेर्मतौ बहुलम् (६, १, ३४ वा०)"—इति सम्प्रसारणं परपूर्वत्वम्, "आदृगुणः (६, १, ८७)", "छन्दसोरः (८, २, १५)"—इति मतुपो वत्वम् "रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् (६, १, १७६ वा०)"—इति मतुप उदात्तत्वम्]। कीदृशः? "विशपतिः" ["परादिश्छन्दसि बहुलम् (६,२, १८६)"—इत्युत्तरपदाद्युदात्तत्वम्] प्रजा-पालकः "दैव्यः" देवानां सम्बन्धी ["अग्निर्वै देवानां होता"—इति श्रुत्यन्तरात्] "केतुः" दूतवत् ज्ञापकः। "अग्निर्वै देवानां दूत आसीत्"—इति श्रुतेः] "बृहद्भानुः" [बहुव्रीहौ प्रकृतिस्वरत्वम् (८, २, १)] प्रौढ़रश्मिः॥ ३॥ ३

॥ जरावोधीयम्॥ २ २ २ १ २ १ २ १
जरावोधीवा। तादिविड्ढायि।
२ १ २ १ २ ४
विशायिवा२३यिशे। यज्ञियाया। स्तोमाश्रुद्रा२३या।
५ ३ २ २ २ १ २ १ २ १
दृशीकी३४३ई। डा॥(१) सनोमन्द्रोवा। आनिमानाः।
२ १ २ १ २ ४
धूमाक्षा२३यितूः। पुरुश्चान्द्राः। धियेवा१जा२३या।

५ १ १ १ १ १ १ १ १
द्धि। न्वतो३४५इं ॥(२) सरेवाए३ओवा। वाविश्यता

१ १ १ १ १ १ २
यिः। दैव्याःका२३यितूः। भृणोतूनाः। उक्थायिरा१

४ ५ १ १ २
ग्रा२३यिवृं। धत्। भानो३४५इं। डा(३) ॥ ५ * ॥[१] ३

अथ तद्गोगायेति द्वचाल्कं चतुर्थं सूक्तम्,†

तत्र प्रथमा।

१ १ १ १ १ १ १ १ १ १ १ १
तद्गोगायसुतेसचापुरुहूतायसत्वने।

१ १ १ १ १ १ १
शंयद्वेनशाकिने ॥ १ ‡ ॥

हे स्तोतारः! "वः" यूयं "सुते" अभिषुते सोमे सति "पुरुहूताय" बहुभिर्यजमानैराहुताय "सत्वने" शत्रूणां सादयित्रे [यद्वा, धनानां सनित्रे दात्रे इन्द्राय "तत्" स्तोत्रं "सचा" सह संहता भूत्वा "गाय" गायत "यत्" स्तोत्रं "शाकिने" शक्तिमते इन्द्राय "शं" सुखकरं तदित्यर्थः ॥ १ ॥

---

* ऋ० गा० १४५० १अ० ५सा०।

† 'द्वितीयमतिरिक्तोवं सवासाद्यीयम्, द्वतीयं मार्गीयवम्'—इति वि०।

‡ ऋ० पा० २, १, ३, १ (३भा० २८८ पृ०) = ऋ० वे० ४, ७, २५, २।

अथ द्वितीया।

२ ३ २ ३ १२ ३ १२ १२ ३ १ ३
नघावसुर्नियमतेदानंवाजस्यगोमतः।

२ १ २ १ २ ३ १ १
यत्सीमुपश्रवद्गिरः॥ २ *॥

"वसुः" वासयिता † स इन्द्रः "गोमतः" बहुभिर्गोभिर्युक्तस्य "वाजस्य" अन्नस्य बलस्य वा "दानं" प्रदानं "न घ" न खलु ‡ "नियमते" नियच्छति उपरतं करोति. "यदु" यदि "सीं" ¶ "गिरः" अस्मदीयाः स्तुतीः "उपश्रवत्" उपशृणुयात् स्तोत्रश्रवणे सति सर्वदा ददातीत्यर्थः॥ २॥

अथ तृतीया।

३ १ २ ३ २उ ३ १२ १२ ३ १२ २२
कुवित्सस्यप्रहिव्रजङ्गोमन्तन्दस्युहागमत्।

१ २ ३ १२
शचीभिरपनोवरत्॥ ३ §॥ ४

"कुवित्सस्य" [कुवित् बहु शस्यति हिनस्तीति] कुवित्सो नाम कश्चित् तस्य स्वभूतं "गोमन्तं" बहुभिर्गोभिर्युक्तं "व्रजः" गोष्ठं "दस्युहा" दस्यूनामुपक्षपयितॄणां हन्ता इन्द्रः "प्रागमत्" प्रकर्षेण गच्छति "हि" यस्मात् "शचीभिः" आत्मीयैः कर्मभिः प्रजा-

* ऋ० वे० ४, ७, २५, १।

† 'वसुः—प्रशस्त-धनः'—इति वि०।

‡ 'न घ—नकारः प्रतिषेधार्थः, घकारः पद पूरण' इति वि०।

¶ 'सीम्—इति पद पूरण.'—इत्यपि वि०।

§ ऋ० वे० ४, ७, २५, ४।

भिर्वा "नः" अस्माकं ता गाः "अप वरत्" निगूढास्ता अपावृणोत्॥ ३ ॥ ४

॥ मार्गीयवाद्यम् ॥ तद्वौ३ह्वोवा। गाया२। स्तुता
३ ५ १ २२ २ १ १ १
यिसा२३४चा। पुरुहूता। यसात्वा१ना२यि। शंयत्।
२ २ ० ३ ३ १ ३ ५ २ २
ह्वा। औ३ह्वोयि। गा२३४वायि। ना२ग्ना२३४औह्वो
२ १ १ १ १ १ २ २ १ २ १
वा। ए३। किने२३४५॥(१) नघौह्वोवा। वासू२:।
३ २ ३ ५ १२ २२ १ २ १
नियामा२३४तायि। दानंवाज। स्यगोमा१ना२:। य
२ २ ३ ५ १ ३
ज्ञीम्। हा। औ३ह्वोयि। ऊ२३४पा। आ२वा२३४
५ २ २ १ १ १ १ १ २ २ १ २ १
औह्वोवा। ए३गिरा२३४५:॥(२) कुवौह्वोवा। सास्या
३ २ ३ ५ १२ २ १ २
२। प्रहित्रा२३४जाम्। गोमन्नन्द। स्यह्वागा१मा२त्।
१ २ २ २ ३ ५ १ ३
ग्रची। ह्वा। औ३ह्वोयि। भा२३४यिरा। पा२ना२३
५ २ २ १ १ १ १ १
४औह्वोवा। ए३। वरा२३४५त्(३)॥ ६ *॥ [१] ४

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य अष्टादश्यस्याध्यायस्य प्रथमः खण्डः॥ १ ॥

---

* ऊ० मा० १५प्र० १अ० ६मा०।

अथ द्वितीय-खण्डे—

अथेदंविष्णारिति षड्चात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

३२७ १ १२ ३१८ १८ ३२
इदंविष्णु र्विचक्रमे त्रेधानिदधेपदम्।

१२ ३२
समूढ़मस्यपाꣳसुले॥ १ *॥

"विष्णुः" त्रिविक्रमावतारधारी "इदं" प्रतीयमानं सर्वं जगदुद्दिश्य "त्रेधा" त्रिभिः प्रकारैः "पदं नि दधे" स्वकीयं पादं प्रक्षिप्तवान्। "अस्य" विष्णोः "पांसुले" धूलि-युक्ते पाद-स्थाने" "समूढ़म्" इदं सर्वं जगत् सम्यगन्तर्भूतम् [सेयमृग्याख्यैवं व्याख्याता—"विष्णुः विश्नुतेर्वा व्यश्नोतेर्वा॥ * * *॥ यदिदं तद् विक्रमते विष्णुस्त्रिधा निधत्ते पदं त्रेधा भावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः। समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः। समूढ़मस्य पांसुलेप्यायनेऽन्तरिक्षे पदं न दृश्यते अपि वोपमार्थे स्यात् समूढ़मस्य पांसुल इव पदं न दृश्यत इति। पांसवः पादैः सूयन्त इति वा पन्नाः शेरत इति वा पंसनीया भवन्तीति वा (निरु० दै० ६, १९)"—इति॥ १॥

---

* ऋ० आ० ३, १, ३, ९ (१भा० ४६१ पृ०)=शु० वे० १, २, ७, १=य०वे०५, १९।

अथ द्वितीया।

१ २३१र २र ३ १ २ ३१र २र
त्रीणिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः।

२ ३ १ २ ३१२
अतोधर्म्माणिधारयन् ॥ २ * ॥

"अदाभ्यः" [दभेः "ऋ-हलो ण्यत् (३, १, १२४)"—इति ण्यत्, नञ्-समासः अव्यय-पूर्वपद-प्रकृतिस्वरत्वम् (८,२,२)] केनापि हिंसितुमशक्यः "गोपाः" सर्वस्य जगतः रक्षकः "विष्णुः" पृथिव्यादि-स्थानेषु अत एतेषु "त्रीणि" "पदा" पदानि "वि चक्रमे"। किमुर्वन्? "धर्म्माणि" अग्निहोत्रादीनि "धारयन्" [ग्रभः पित्त्वादनुदात्तत्वम् (३, १, ४) शतुश्च ल-सार्वधातुक-स्वरेण (६, १, १८६) स एव ग्रिष्यते] पोषयन् ॥ २ ॥

अथ तृतीया।

२ ६ १ १ ३१२ २१ १ २१
विष्णोःकर्म्माणिपश्यतयतोव्रतानिपस्पशे।

१ २ २१ ३ १ २
इन्द्रस्ययुज्यःसखा ॥ ३ † ॥

हे ऋत्विगादयः! "विष्णोः" "कर्म्माणि" वीर्याणि "पश्यत" "यतः" यैः कर्मभिः "व्रतानि" अग्निहोत्रादीनि "पस्पशे" सर्वो यजमानः स्पृष्टवान् [स्पश बाधन-स्पर्शनयोः (भ्वा० उ०),

---

* ऋ० वे० १, २, ७, ३=य० वे० २५, ४२।

† ऋ० वेद १, २, ७, ४—य० वे० ६, ४—८, २२।

लिटि द्विर्भावे, "अपूर्वाः खयः (७, ४, ६१)"—इति प्रकारः श्रिष्यते सकारो लुप्यते, यङ्लुगन्तयोगादनिघातः (८, १, ६६)] विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः। ताडग्रः विष्णुः "इन्द्रस्य" "युज्यः" योग्यः [युजेर्बाहुलकात् क्यप् (३, १, १२१), किच्चाद् गुणाभावः (१, १, ५), क्यपः पित्त्वात् अनुदात्तत्वम् (३, १, ४), धातु-स्वरः (६, १, १६२)] अनुकूलः सखा भवति विष्णोरिन्द्रानुकूल्यं च "त्वष्टाहत पुत्र इत्यनुवाके "अथवैतर्हि विष्णुरित्यादि बहुना प्रपञ्चेन तैत्तिरीया आमनन्ति]॥ ३ ॥

अथ चतुर्थी।

१२ २२ २ १ ३ १२ २२ १ १ २
तद्विष्णोःपरमम्पदꣳसदापश्यन्तिसूरयः।

३ २ ३ १ ३ १ २
दिवीवचक्षुराततम् ॥ ४ * ॥

"सूरयः" विद्वांसः ऋत्विगादयः "विष्णोः" सम्बन्धि "परमम्" उत्कृष्टं तच्छास्त्र-प्रसिद्धं "पदं" स्थानं शास्त्र-दृष्ट्या "सदा" ["सर्वैकान्य (५, ३, १५)"—इति दा-प्रत्ययः, "सर्वस्य सोऽन्यतरस्यान्दि (५, ३, ६)"—इति सर्व-शब्दस्य स-भावः व्यत्ययेनाद्युदात्तत्वम्]. सर्वदेत्यर्थः "पश्यन्ति"। तत्र दृष्टान्तः—"दिवि इव" ["ऊडिदम् (६, १, १७१)"—इत्यादिना विभक्तेरुदात्तत्वम्, इवेन विभक्त्यलोपः पूर्वपद-प्रकृतिस्वरत्वञ्च (२, ४, ७१वा०)"—इति, तदेव श्रिष्यते] आकाशे यथा "आततम्" [तनोतेः कर्मणि क्तः, "यस्य विभाषा (७, २, १५)"—इति इट्-प्रतिषेधः, "अनु-

* ऋ० वे० १, २, ७, ३ = य० वे० ६, ५।

दात्तोपदेश (६, ४, ३७)"—इत्यादिना न-लोपः, ह्रस्वादुत्तरपद-प्रकृतिस्वरत्वे (६, २, १३९) प्राप्ते "गतिरनन्तरः (६, २,४९)" —इति गतेरुदात्तत्वम्] सर्वतः प्रस्तं चक्षुर्विरोधाभावेन विशदं पश्यति तद्वत् ॥ ४ ॥

अथ पञ्चमी ।

१र २र ३१३ ३२ ३१२
तद्विप्रासोविपन्युवोजागृवाꣳसःसमिन्धते ।

२ ३ १ २३२३१
विष्णोर्यत्परमम्पदम् ॥ ५ * ॥

पूर्वोक्तं "विष्णोः" "यत्" "परमं पदम्" अस्ति, "तत्" पदं विप्रासः ["आज्जसेरसुक् (७, १, ५०)] मेधाविनः "समिन्धते" सम्यग् दीपयन्ति । कीदृशाः ? "विपन्यवः" [स्तुत्यर्थस्यपनेर्बाहुलक औणादिको यु-प्रत्ययः, तस्य प्रत्ययस्वरः (३, १, ३)] विशेषेण स्तोतारः "जागृवांसः" [जागृ निद्राक्षये (अदा० प०), लिटः क्वसुः, क्वादि-नियमात् प्राप्तस्येटो "वस्वेकाजाद् घसाम् (७, २,६७)"—इति नियमाच्चिदृत्तिः] ग्रन्थार्थयोः प्रमाद-राहित्येन जागरूका इत्यर्थः ॥ ५ ॥

अथ षष्ठी ।

१ २ ३१२ ३ २३ १ १ ३२
अतोदेवाअवन्तुनोयतोविष्णुर्विचक्रमे ।

३ २७ ३१२
पृथिव्याअधिसानवि ॥ ६ † ॥ ५

* ऋ० वे० १, ९, ७, ६=य० वे० २४, ४४ ।

† ऋ० वे० १, २, ७, १ ।

"विष्णुः" परमेश्वरः पृथिव्याः यस्मात् भूप्र-देशात् "अधि-सानवि" समुच्छ्रिते अधिके देशे स्वर्गादि-लोके "विचक्रमे" विविधं पाद-क्रमणं कृतवान् विशेषेण वर्त्तते यस्मात् पृथिवी-देशात् "नः" अस्मान् "देवाः" विष्णुमुखाः "अवन्तु" पापाच्छत्रो र्वा रक्षन्तु इत्यर्थः ॥ ६ ॥ ५

॥ मार्गीयवोत्तरम् ॥ इदंविष्णाऔहोहायि। वायि
२ ५ २ १ २ ५ १ २ २
चक्रा२३४मायि। त्रेधाना२३४यिहायि। दधेपा ३ ४।
३ २ ४ २ ५ १ २ ५ २ १ २ २
औहोवा। इहा२३४हायि। उरुवा२३४दाम्। समूढम्।
१ ७ २ २ ३ २ ४ २ ५ १ २ ५ ३ २ १
आस्यपाऽहा३४। औहोवा। इहा२३४हायि। औहो३१
५ २ ५ २ २ १ २
२३४। हायि। एहियाऽहा ॥(१) त्रीणिपदाऔहोहा
२ ५ २ १ ५ १ २ २
यि। वायिचक्रा२३४मायि। विष्णुर्गो२३४हा। पाःसदा
२ ३ २ ४ २ ५ १ २ ५ २ ३ ५
भा३४। औहोवा। इहा२३४हायि। उरुवा२३४याः।
२ १ २ २ १ ७ २ २ ३ २ ४ ५ १ २ ५
अतोध। मीणिधारा३४। औहोवा। इहा२३४हायि।
३ २ २ ५ २ २
औहो३१२३४। यान्। एहियाऽहा ॥(२) विष्णोःक
२ २ १ २ २ ५ २ ११ ५
र्माऔहोहायि। णायिपश्या२३४ता। यतोव्रा२३४हा।

१र २ ३र ४र ५ १ २ ५ २ ३
तानिपस्या३४। औहोवा। इन्द्रा२३४च्चायि। उक्षवा२
५ २ १ २ १ ७ २ ३र ४र ५ १ २
३४च्चायि। इन्द्रस्य। यजियःसा३४। औचोवा। इन्द्रा
५ ३र १ ५र ५ ४
२३४च्चायि। औचोइ१२३४। खा। एचियाएन्द्रा। चो
५ई। डा(३)॥ ७ *॥ [१] ५

अथ मोषुत्वेति प्रगाथात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१ २र ३ १ २ ३२उ ३ १र २र
मोषुत्वावाघतश्चनारेअस्मन्निरीरमन्।
३ १ २ ३१२३ १ २३ २३१र २र
आरात्ताद्वासधमादन्नआगच्चोदवासन्नुपश्रुधि॥१॥

हे इन्द्र! "त्वा" त्वां "वाघतश्च न" ऋत्विजोऽप्येते "अस्मद्" अस्मत्तः "आरे" दूरे "मा निरीरमन्" न नितरां रमयन्तु। अतस्त्वम् "आरात्ताद्वा" दूरेऽपि वर्त्तमानः "नः" अस्मदीयं "सधमादं" यज्ञम् "आ गहि" आगच्छ "इह वा" अत्रापि वा "सन्" विद्यमानः "उप श्रुधि" अस्मदीयं स्तोत्रम् उपशृणु॥ १॥

---

* ऊ० गा० १४प्र० १ष० ७सा०।

† ऋ० आ० ३, ९, ५, १ (१भा० ५८१पृ०)=ऋ० वे० ५, २, १७, १।

अथ द्वितीया।

३१२ २२ ३ १ १ ३२उ ३ १ ३२उ ३ १ १
इमेत्वेब्रह्मकृतःसुतेसचामधौनमत्त्यासते।

२३ १२ ३ १ २ ३२१२३२उ ३ १ १
इन्द्रेकामञ्जरितारोवसव्यवोरथेनपादमादधुः॥ २ * ॥ ६

हे इन्द्र! "ते" त्वदर्थं "सुते" अभिषुते सोमे "ब्रह्मकृतः" स्तोत्रकृतः† ऋत्विजः "मधौ न" मधुनीव "मत्त्यः" मत्तिकाः "सचा" सह "आसते" उपविशन्ति। अथ परोक्षस्तुतिः— "वसव्यवः" धनकामाः "जरितारः" स्तोतारः "कामम्" इष्टम् "इन्द्रे" "रथे न पादं" रथे पादमिव "आ दधुः" समर्पयन्तीत्यर्थः॥ २॥ ६

अथास्तावीति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३१ २३१२ २२
अस्तावि मन्मपूर्व्यम्ब्रह्मेन्द्रायवोचत।

३२ ३१२ ३१ १ ३२ ३१ २
पूर्वीर्ऋतस्यबृहतीरनूषतस्तोतुर्मेधाअसृक्षत॥ १ ‡ ॥

---

* ऋ० वे० ५, ७, १७, २।

† 'ब्रह्मकृतः—अन्नस्य कर्त्तारः। अथवा ब्रह्मवैविध्यलक्षणं, तस्य कर्त्तारः'—इति वि०।

‡ 'यथा रथवाहिनः पुरुषाः रथस्य पादं चक्रमक्षे आदधुः, अथवा सुकृते रथे आत्मीयं पादं कुर्वन् रथमारोहन्ति'—इति वि०।

¶ ऋ० ०६, ४, २१, ४।

स "इन्द्रः" "अस्तावि" अस्मदीयैः स्तोतृभिः ऋत्विग्भिर्वा स्तूयते "इन्द्राय" "पूर्व्यम्" अनादित्वात् पूर्वस्मिन् भवं "मन्म" मननीयं "ब्रह्म" स्तोत्रं वेदं वा "वोचत"। हे ऋत्विजः! यूयं पठत* किञ्च "पूर्वीः" पूर्वकालीनाः "ऋतस्य" यज्ञस्य सम्बन्धिन्यः "बृहतीः" बृहतीच्छन्दका बृहत्सामानि वा "अनूषत" स्तुवत पठतेत्यर्थः। "स्तोतुः" मम "मेधाः" एवंविधाः प्रज्ञाविशेषाः "असृक्षत" ऋत्विग्भिः विसृज्यताम् [यद्वा, ईश्वरेण]॥१॥

अथ द्वितीया।

२७ ३१ २ ३१२ ३ २३ २७ ३१ २
समिन्द्रोरायोबृहतीरधूनुत†सङ्क्षोणीसमुषर्व्यम्।
२ ३ २ ३ १२३ १२२र ३ १ ३ १२
सःपृक्षासःपृचयःसञ्जवाशिरःसोमाइन्द्रममन्दिषुः॥२॥७

स "इन्द्रः" "बृहतीः" महान्ति "रायः" धनानि अन्नानि वा "समधूनुत" मां प्रापयत्वित्यर्थः [धूञ् कम्पने (क्रया० उ०) धातूनामनेकार्थत्वात्]। किञ्च "क्षोणीः" भूमीः "सम्" अधूनुत मां सम्यक् प्रापयन्तु। अपिच "सूर्यम्" सूर्य-सदृशीं दीप्तिं "सम्" अधूनुत। "शुचयः" निर्मलाः "शुक्रासः" शुक्रग्रहाः इन्द्रं "सम् अमन्दिषुः" हर्षयन्ति। किञ्च "गवाशिरः" गोश्रयणाः सहिताः‡ इन्द्रं सममन्दिषु हृष्टवन्त इत्यर्थः॥ २॥ ७

---

* 'पूर्व्यम्—अग्रे भवम्, मन्म—मननम्, इन्द्राय वोचत। अथवा'—इत्यादि वि०।

† "अधूनुतः"—इति ऋ० पाठः।

‡ ऋ० वे० ६, ४, २१, ५।

¶ 'गवाशिरः—गो-क्षीरेण मधुक्राः'—इति वि०।

१ २ १ २ १
॥ सन्नि ॥ अस्माद्दाउ। वायिमन्मपू३आउवा२३।
५ १ २ २ २ २ २ १ २ २१ २ १ २ २ ३
वी२३४याम्। ब्रह्मेन्द्रायवोचतपूर्व्वीर्ऋतस्यवृहतीरनूषता
१ १ १ १ १ २ १ १ २ २
२३४५। म्तोतूर्द्दाउ। मायिधाअसा३१उवा२३। त्रा
५ २ १ २ १ २ १ २ १ २ २ १ २ २
२३४ता। स्तोतुर्म्मेधाअदृक्षतसमिन्द्रोरायोबृहतीरधूनुः
३ १ १ १ १ १ २ १ २ १
ता२३४५। सङ्गोदाउ। णायिसमुद्र३आउवा २ ३।
५ १ २ १ २ २ १ २ १ २ १ २
रो२३४याम्॥(२) सङ्गोणीसमुद्रव्यंसःपृक्षासःपृचयः
१ २ २ १ १ १ १ १ २ १ २
सङ्गवाणिरा२३४५:। सोमाद्दाउ। आयिन्द्रममा३१उ
५
वा२३। दो२३४५:(३) ॥ १० * ॥ [१] ७

अथेन्द्रायसोमपातवेइति तृचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

१ १ ३ १ २ १ ३ १ २ २
इन्द्रायसोमपातवेवृत्रघेपरिषिच्यसे।
१ २ ३ १ २ ३ १ २ ३ १ २
नरेचदक्षिणावतेवीरायसदनामदे ॥ १ † ॥

---

* ऊ० गा० १४प्र० २अ० १०खा०।

† ऋग्वेद ४, २, १८, ३ (४मा० २५१४०) = सा० वे० ७, ४, २५, ४।

हे "सोम !" "हवन्ते" हवस्य हन्ते इन्द्राय [षष्ठ्यर्थे चतुर्थी (२, ३, ६२वा०)] इन्द्रस्य "पातवे" पानार्थं* "परि षिच्यसे" परितः पात्रेषु सिच्यसे वसतीवरीभिर्वा। किञ्च "दक्षिणावते" ऋत्विग्भ्यो दक्षिणा-दानेन तृप्तते, "वीराय" वीर्य्य-युक्तायेन्द्रार्थं हवींषि दातुं "सदनासदे" यज्ञ-गृहे सीदते, "नरे" मनुष्यायं† यजमानाय तस्मै फल-प्रदानार्थं परिषिच्यसे ॥ १ ॥

अथ द्वितीया ।

१ २ ३१२०२१२ ३१२
तꣳसखायःपुरूरुचंवयंयूयञ्चꣳसूरयः।

३ २ ३१२ ३०३१२
अश्यामवाजगन्ध्यꣳसनेमवाजपस्त्यम् ॥ २ ¶ ॥

हे "सखायः" स्तोतारः "सूरयः" प्रज्ञावन्तः "यूयं वयञ्च" यजमानाः "पुरूरुचं" बहु-दीप्तिं 'वाजगन्ध्यं" बल-कर-साधु-गन्धोपेतं तत्र भवं सोमम् "अश्याम" अश्नीम पिबेम। किञ्च "वाजपस्त्यम्"§ अन्न-युक्त-गृह-सहितम्' [यद्वा, बलकरं सोमं "सनेम" सम्भजेमहि सोमेन बलान्न-गृहादीनि भवन्तीत्यर्थः ॥२॥

---

* विवरण-मते तु 'सोमपातवे'—इति समास-निष्पन्नमेकं पदं मत एवोक्तम् 'सोमपातवे—सोम-पानार्थम्' - इति।

† विवरण-मते नरे इत्यपि इन्द्रायेत्यस्य विशेषणम् तत एवाह—'नरे—नरोत्तमाय'—इति।

‡ "पुरोरुचं यूयं वयञ्च"—इति ऋ० पाठः।

¶ ऋ० वे० ७, ४, १५, ५।

§ 'वाजपस्त्यम्—पान-संयुक्तं गृहम्' —इति वि०।

अथ तृतीया ।

१२ १ १३१२ २२
परित्यꣳहर्यतꣳहरिम्० ॥ ३ * ॥ ८

—इतीयमृक् पूर्वमेव [ऋ० आ० ६, २, १, ८ (२ भा० १६७ पृ०) = उ० आ० ५, २, १८, १ (२भा० २५० पृ०)] व्याख्याता ॥ ३ ॥ ८

४ २ ४ १ ४२ ५
॥ यज्ञायज्ञीये दे ॥ इन्द्राऽ५य। सोऽमाऽपातावा
१ २ २ १ २ २ १ १
यि। वार्च्ध्रेपा। रीऽषायिच्याऽसायि। नरेऽच।
२ १ २ २ १ २
दक्षा२ऽयिणा। ऊम्मायि। वाऽताय। वायिरायसद
१२ २ १ २ १२ २ २
नाऽसदाउ ॥(१) दायिताम्। सखायःपुरूरुचंवयंयू
२ १२ १ १ १ २ १
याम्। चाऽह्वराऽयाः। अश्याऽम। वाजाऽगा।
१ २ २ १ २ २ ३ २
ऊम्मायि। धाऽयाम्। सानेमवाजपाऽस्तियाउ ॥ (२)
१ २ १ २ १ २ २
याम्पा। रित्यꣳहर्यतꣳहरिम्बभ्रुम्पुना। तीऽवारेऽणा।
१२ १२ २ १ २ २
योदेऽवान्। विश्वाꣳऽआ। ऊम्मायि। पाऽराय।
१ २ २ २
मादेनसचगाऽरूताउ(३) ॥ २१ † ॥ [१] ८

---

* ऋ० आ० ६, २, १, ८ (१भा० १६७पृ०) = ऊ० आ० ५, २, १८, १ (२ भा० २५० पृ०) = ऋ० वे० ७, ४, २४, १।

† ऊ० गा० १४प्र० २अ० २१मा०।

अथ कस्तमिन्द्रेति प्रगाथात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा ।

१२ २२
कस्तमिन्द्रत्वावसो० ॥ १ * ॥

—इत्यृचः प्रतीकम्, तस्यादितो व्याख्यानमन्यत्र द्रष्टव्यम् ॥१॥

अथ द्वितीया ।

२१ २ २१२ २१२२ २१२ २२
मघोनस्मावृक्तबर्हत्थेषुचोदयययेददतिप्रियावसु ।

२२१२ २१ २ १ १ १२
तवप्रणीतीहर्यश्वसूरिभिर्विश्वातरेमदुरिता ॥ २† ॥ ९

हे इन्द्र ! "मघोनः" धनवतः "तव" त्वदर्थं "प्रिया" प्रियाणि "वसु" वसूनि हविर्लक्षणानि धनानि "ये" जनाः "ददति" प्रयच्छन्ति तान् जनान् "वृक्तबर्हत्थेषु" यज्ञेषु सङ्ग्रामेषु वा‡ "चोदय" प्रेरय । हे "हर्यश्व" हरि-नामकाश्ववन्निन्द्र ! तव "प्रणीती" प्रणीत्या प्रणयनेन¶ "सूरिभिः" स्तोतृभिः पुत्रादिभिः सार्द्धम् "विश्वा" विश्वानि "दुरिता" दुरितानि "तरेम" तीर्णा भवेम ॥ २ ॥ ९

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्य अष्टादशस्याध्यायस्य

द्वितीयः खण्डः ॥ २ ॥

---

* ऋ० आ० १, २, ४, ८ (१भा० ५७४ पृ०) = ऋ० वे० ५, ३, १९, २ ।

† ऋ० वे० ५, ३, १९, ४ ।

‡ 'वृक्तबर्हत्थेषु—अवृक्तबर्हिषु'—इति वि० ।

¶ 'प्रणीती—प्रकर्षेण कर्मणां नेत्रा'—इति वि० ।

अथ तृतीय-खण्डे—

एदुमधोरिति तृत्तात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ १
एदुमधोर्मदिन्तरꣳसिञ्चाध्वर्योअन्धसः।

१ २ ३ ३ १ २ २ ३ १ २
एवाहिवीरस्तवतेसदावृधः॥ १ *॥

हे "अध्वर्यो" अध्वरस्य नेतः! ऋत्विक्! "मधोः" मदकरस्य "अन्धसः" सोम-लक्षणस्यान्नस्य "मदिन्तरम्" अत्यर्थं मादयितृतमं सोमरसमेव "आ सिञ्च" इन्द्रार्थमाभिमुख्येन क्षर। "इत्" "उ" [—इत्यवधारणे]। "वीरः" "समर्थः सदाहवः" सर्वदा हविर्भिर्वर्द्धनीयः [यद्वा, सर्वदा स्व-बलस्य वर्द्धकः] अयम् "एव" इन्द्रः "स्तवते हि" स्तोत्र-शस्त्रादिभिः स्तूयते खलु। अतः कारणात् स्तुतायेन्द्राय सोमो दातव्य इति शेषः। तस्मादासिञ्चेति पूर्वेण सम्बन्धः॥ १॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ २
इन्द्रस्यातर्हरीणान्नकिष्टेपूर्व्यस्तुतिम्।

१ २ ३ १ १ २ २ ३ १ २
उदानꣳशमवसानभन्दना॥ २†॥

---

* ऋ० सा० ४, २, ५, ५ (१भा० ७९२पृ०)=ऋ० वे० ९, २, १८, १।

† ऋ० वे० ९, २, १८, २।

हे "हरीणां स्यातः" हरि-नामकानामश्वानामधिष्ठातः! [यद्वा, हरि-नामकैरश्वैः प्रापयितः!] "इन्द्र!" "ते" त्वदीयां "पूर्व्यस्तुतिं" पूर्व्यैश्चिरन्तनैर्ऋषिभिः कृतां स्तुतिम् [उपलक्षणम्] इदानीन्तनैः क्रियमाणमपि स्तुतिं "न किः" न कश्चित् "ओवसा" बलेन "उदानंश" सम्यग् व्याप्नोति [अशू व्याप्तौ (स्वा० आ०) अस्माल्लिटि "अशोतय (७, ४, ७२)"—इति सुट्, छान्दसो द्वितीयो नुड़ागमः] कश्चिन्नातिक्रामतीत्यर्थः। किञ्च "मन्दना" सवः प्रार्थनीयत्वात् पूजनीयेन धनेन स्तुत्या वा* त्वदीयां स्तुतिं न कश्चिदतिक्रामति, त्वत्तो बलवान् धनी स्तुत्यो वा अन्यो नास्तीत्यर्थः॥ २॥

अथ तृतीया।

२ ३ १ २ २ १ ३ १ २ ३ १ २
तंवोवाजानामयतिमहूमहिश्रवस्यवः।

१ २ २ १ २ ३ १ २
अप्रायुभिर्यज्ञेभिर्वावृधेन्यम्॥ ३†॥ १०

"अप्रायुभिः" कर्म्मसु अप्रमाद्यन्मनुष्ययुक्तैः अथवा अप्रमत्ता एकत्र स्थित्वैव कर्म्म कुर्वन्ति कर्म प्रारभ्य नान्यं देशं गच्छतीत्यर्थः‡। एवंविध-मनुष्य-युक्तैः "यज्ञेभिः" यज्ञैः एतादृश-मनुष्यैर्यज्ञैश्च "वावृधेन्यम्" वर्द्धनीयं "वाजानाम्" अन्नानां "पतिं" स्वामिनं "वः" यष्टृ-यष्टव्य-सम्बन्धेन युष्मदीयं "तं" तादृशम्

---

* 'मन्दना—वोऽर्हेण'—इति वि०।

† ऋ० वे० ६, २, १८, १।

‡ 'अप्रायुभिः—अप्रयत्न-पूर्वैभिः'—इति वि०।

इन्द्रम् "अवस्यवः" वयमन्नकामाः सन्तः "अङ्गमहि" आङ्गयामः [ङ्गयतेर्लुङि बहुलञ्छन्दसि (६, १, ३४)—इति सम्प्रसारणम्॥ ३॥ १०

॥ वामदेव्यम्॥ ए॒षु॒दु॑। मधो॑३ र्मा॑ ३ दि॑न्तराम्। म। सा॒यि॑। चाध्व॒र्यो॑ अन्धसऽएवाहि। वा। औ३॒हो॒ हा॒यि॑ र॒स्ता॒२३॒व॒ता॒यि॑। सदी॑चो३। ऊ॒म्मा॑ २। वा॒ऽ२ ङ्गौ३॒ऽऽहा॒यि॥(१) आ॒ऽ५॒यि॒न्द्र॑। स्था॒ता३॒र्हा३॒रीणाम्। ना। किष्टे॑ पू॒र्व्यस्तु॒तिमु॒दा॑। ना। औ३॒हो॒हा॒यि॑। ग्म॒ग्मा॒र२३॒व॒सा॑। न॒भो॑चो३। ऊ॒म्मा॑ २। दा॒ऽ२॒नो३ ५ हा॒यि॑॥(२) ता॒ऽ५॒वः॑। वा॒जा३॒ना३॒मय॑तायिम्। आ। ऊ॒म॒द्वि॒श्रव॑स्यवो॒प्रायु॑। भा॒यि॑ः। औ३॒हो॒हा॒यि॑। य॒ज्ञा२३॒यि॒भि॒र्वा॑। वृ॒धो॑हो३। ऊ॒म्मा॑ २। न्या॒ऽ२॒मो ५ हा॒यि॑(३)॥ ६ *॥ [१] १०

---

* ऊ० गा० १३प्र० २ख० ६सा०।

अथ तङ्गूर्ध्येति प्रगाथात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१२ १क २८ ३१ २३१२०१२
तङ्गूर्ध्यास्वर्णरन्देवासोदेवमरतिन्दधन्विरे।

३ २३१२
देवत्रांहव्यमूहिषे ॥ १ * ॥

हे स्तोतः! "तं" प्रसिद्धमग्निं "गूर्धय" स्तुहि [गूर्धयतिः स्तुतिकर्मा (निघ०३,१४,५) कीटगम्? "स्वर्णरं" सर्वस्य नेतारं [सर्वैर्यजमानैः नेतव्यं वा, अथवा स्वर्गं प्रति हविषां नेतारं] "देवासः" दीव्यन्ति स्तुवन्तीति देवा ऋत्विजः "देवं" दानादि-गुण-युक्तम् "अरतिम्" अर्यं स्वामिनं [यद्वा, अभि प्राप्तव्यं द्रव्यं] "दधन्विरे" [धन्वन्ति गच्छन्ति स्तुत्यादिभिः प्राप्नुवन्ति, धवि गत्यर्थः (भ्वा० प०)] अथ प्रत्यक्षस्तुतिः—"देवत्रा" देवेषु मध्ये [यद्वा, "देव-मनुष्य (५,३,१०वा०)"—इत्यादिना द्वितीयार्थे त्रा-प्रत्ययः देवानित्यर्थः] "हव्यं" पुरोडाशादि-लक्षणं हविः "आ" आभिमुख्येन "जहिषे" हे अग्ने! अभितो वा प्रापयसि [वहेर्लिटि यजादित्वात् सम्प्रसारणम्]।

"जहिषे"—"जहिरे"—इति पाठौ ॥ १ ॥

---

* ऋ० ऋा० २,१,२,१ (१भा० १७ऋषृ०) = ऋ० वे० ६,१,२४,१।

अथ द्वितीया ।

१ २ ३ १ २ ३ १ २ ३ १ २
विभूतरातिंविप्रचित्रशोचषमग्निमीडिष्वयन्तुरम् ।
३ १ २ २ ३ २ ३ १ २ ३ १ २ ३ १
अस्यमेधस्यसोम्यस्यसोभरेप्रेमध्वरायपूर्व्यम् ॥२*॥११

ऋषिरात्मानं सम्बोध्य प्रेरयति— हे "विप्र" मेधाविन्! "सोभरे" एतत्सञ्ज्ञक! ऋषे! "अध्वराय" यागार्थम् "इमम्" अग्निं "प्रेडिष्व" प्रकर्षेण स्तुहि। कीदृशम्? "विभूतरातिं" व्याप्तधनं प्रभूतदानं वा, "चित्रशोचिषं" चायनीय-तेजस्कं विचित्र-दीप्तिकं वा "सोमस्य" सोम-साध्यस्य "अस्य मेधस्य" "यन्तुरं" नियन्तारं† "पूर्व्यं" चिरन्तनमिति ॥ २ ॥ ११

५ ४ ७ ४ ५ ४ ५ २ १ २ ३
॥ सौभरम् ॥ तङ्गू३र्द्वा३याऽसुवर्णरोवा। देवासो
२ १ ७ १ ३ ५ २ ३
देवमरा२तायिन्दधा२३। द्यो। न्वा२३४यिरायि। दे
१ २ ६ २ १ ३ ५ २ ३
वत्राच्च। व्यमू३द्वा३। ह्वा२यिषा२३४ औद्योवा ॥(१)
५ २ ४ २ ४ ५ २ १ २ ३ १ ७
देवा३त्रा३हव्यमूर्ध्वयोवा। विभूतरतिविप्रा२चायित्र
१ ७ ३ ५ १ २ ६
शो२३। द्यो। चा२३४यिषाम्। अग्निमीडि। ष्वया३

---

* ऋ० वे० ६, १, २८, २।

† 'यन्तुर—गमन-शीलम —इति वि०।

२ १ ३ ५ ४ ५ ४ २ ४
ह्वाऽयि। तू२रा२३४ओहोवा॥(२) अग्नाऽयिमाऽयिडि
५ ४ ५ १ २ २ १ ७ १ ३
घ्वयन्तुरोवा। अस्मेधस्थसोमा२यास्थमो२३। ह्वो। भा
५ १२ २ ६ २ १ ३ ५ २
२३४रायि। प्रेमध्वरा। यपू३ह्वाऽ। वा२या२३४ओ
२ ३ १ १ १ १
होषा। ऊ२३४५(३)॥ १८*॥ [१] ११

अथासोमस्वानइति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १२ २२ ३ १२ २२ ३ १ २
आसोमस्वानोअद्रिभिस्तिरोवाराण्यव्यया।
२३ १ ३ २ ३क २२ ३ २ ३ २ ३ १ २
जनोनपुरिचम्वोर्विशद्धरिःसदोवनेषुदधिषे॥१९॥

हे "सोम!" "अद्रिभिः" यावभिः "स्वानः" अभिषूयमाणः त्वम् "अव्यया" अविमयानि "वाराणि" वालानि दशापवित्राणि "तिरः" कुर्वन् व्यवधायकानि कुर्वाणः सन् "आ" पवस इति शेषः। "हरिः" हरित-वर्णः स सोमः "चम्वोः" अधिषवण-फलकयोः "विशत्" प्रविशति। तत्र दृष्टान्तः—"जनो न" यथा जनः

---

* ऊ० गा० १६प्र० १च० १८सा०।

† 'ईम्—इति पदपूरकः'—इति वि०।

‡ ह० आ० ६, १, ३, ३ (१भा० ८४पृ०)=ह० वे० ७, ५, १३, ५।

"पुरि" पुरे प्रविशति स त्वञ्च तेषु काष्ठ-निर्मितेषु पात्रेषु वसतीवरीषु वा "सदः" स्थानं "दधिषे" करोषि।

"दधिषे"—"दधिषः"—इति पाठो ॥ १ ॥

अथ द्वितीया।

१२ ३१२ १२ २क२२ ३ २७ ३१ २ ३२
समाम्रजेतिरोअण्वानिमेष्योमीढ्वांसम्पिर्नवाजयुः।

२ २ ३ ११ ३ २ ३ २ ३ १२ ३१ २
अनुमाद्यःपवमानोमनीषिभिःसोमोविप्रेभिर्ऋक्वभिः*॥२†॥१२

"वाजयुः" अन्न-कामः "अण्वानि" अणूनि सूक्ष्मानि "मेष्यः" मेष्याणि अवेः रोमाणि चित्राणि "तिरः" कुर्वन् "सः" सोमः "समाम्रजे" परिशोध्यते अलङ्क्रियते वा। तत्र दृष्टान्तः—"मीढ्वान् सेचन-समर्थः "सप्तिः न" अश्वइव, अश्वो यथा सङ्ग्रामेऽलङ्क्रियते तद्वत्। कीदृशः? "अनुमाद्यः" अनुमोदनीयः सर्वैः "पवमानः" मनीषिभिर्मेधाविभिः पूयमानः, तथा "ऋक्वभि" ["छन्दसि वनिपौ (५, २, १२२ वा०)"—इति वनिप्] स्तुतिमद्भिर्विप्रैर्मेधाविभिः अभिष्टुतः मृज्यते ॥ २ ॥ १२

अथ वयमेनमिदाह्यइति प्रगाथात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

१ १२ ३१२ २२ ३ २ ३ १ २
वयमेनमिदाह्योपीपेमेन्द्रवज्रिणम्।

१२ ३१२ २२ ३ २ ३ १ २ ३ ४
तस्माउअद्यसवनेसुतम्भरानून्नम्भूषतश्रुते ॥ १ ॥

---

* "ऋक्वभिः"—इति मु० पाठः। † ऋ० वे० ७, ५, १४, १।

‡ ऋ० वा० १, २, २, १० (१भा० ५६०पृ०) = ऋ० वे० ६, ४, ४८ (२१), २।

"इदं" यजमानाः "एनम्" इन्द्रं "वज्रिणं" "इदा" इदानीं "ह्वः" अतीतेऽह्नि "इह" अस्य अहर्गणे "अपीपेम" आप्याययाम सोमेन "तस्माउ" तस्मै एव "अस्य" अस्य सवने सङ्ग्रामार्थं [सुपां सुलुगित्यादिना ग्रे-आदेशः] "सुतम्" अभिषुतं सोमं "भर" आहर "नूनम्" इदानीं "श्रुते" स्तोत्रे श्रुते सति "आ भूषत" आभवन्नध्वर्यादीनागच्छतु ॥ १ ॥

अथ द्वितीया।

१ १ २१ २ १ २ २२ ३१२
वृकश्चिदस्यवारणउरामथिरावयुनेषुभूषति।
२३ २ १ १ ३ १३ ३ १ ३ २ ३ ११ ३२
सेमन्नस्तोमञ्जुजुषाणआगद्दीन्द्रप्रचित्रयाधिया॥२*॥१३

"वृकश्चित्" स्तेनोऽपि† "वारणः" वारयिता सर्वस्याः‡ सत्रपि "उरामथिः" ग्रावणां मार्गे गच्छतां मथिता¶ सत्रपि "अस्य" इन्द्रस्य "वयुनेषु" मार्गेषु प्रज्ञानेषु वा§ "आ भूषति" आनुकूल्यमेव भजते [अतीव हिंस्रोऽपीन्द्रस्यानुकूलो भवतीत्यर्थः। यद्वा, अस्येति कर्मणि षष्ठी (२, १, ८५) अमुमिन्द्रम् लक्षरूपः क्रूरेषु वयुनेषु स्तोत्रेष्वाभूषति]। हे इन्द्र! स त्वमिमं "नः" अस्मदीयं सोमं स्तोत्रं च "जुजुषाणः" प्रीयमाणः सेवमानः

---

* ऋ० वे० ६, ४, ४८ (१२), ३।

† 'चित्—इति पदपूरणः। वृकः—मांसादो वरण-नियामी'—इति वि०।

‡ 'वारणो हन्ता'—इति वि०।

¶ 'उरसाध्वरं करोति—उरामथिः'—इति वि०।

§ 'वयुनेषु—अध्वसु'—इति वि०।

सन् "चित्रया" चायनीयया नानाविध-फलरूपया "धिया" युक्तः सन् "प्रागहि" आगच्छ ॥ २ ॥ १३

॥ वासिष्ठम् ॥ वयमेनमिदा । ह्वियाओ२३वा । इ
५ २१ १ र र र ० १
याद्दायि । ऊवेह्वो२यि । अपोपेमेशुहावज्रिणा२म् । त
र ७ ६ २ र १र
स्माउषद्यसवनायि । क्षतभ्मारा२ । ईइया । आनूना
५ २१ ३र४र३४र५
२३४म्म । षताअ्रू२३४५ता६५६यि ॥(१) आनूनभूषत ।
१२, १ ५ ४ ५ २ १ १र र
अ्रताओ२३४वा । इयाद्दायि । ऊवेह्वो२यि । आनून
र २ १ र २
म्भूषताअ्रू१ता२यि । वृकश्चिदस्यवारणः । उरामा१थो
६ २ र १ ५ २१र
२: । ईइया । आवयू२३४ना । षुभूषा२३४५ता६५६
यि ॥(२) आवयुनेषुभू । षताओ२३४वा । इयाद्दायि ।
११ १र र २ १र र
ऊवेह्वो२यि । आवयुनेषुभूषा१ता२यि । सेमन्नस्तोमञ्जु
र १ ६ २ १ ५
जुषा । णआगा१ह्वो२ । ईइया । इन्द्रप्रा२३४चायि ।
११र २ १११११
चयाधा२३४५याद६५६ । अवाइसा२३४५यि.१) ॥ ५ ॥[१३

---

* ऋ० मा० ११प्र० २अ० १वा० ।

अथेन्द्राग्नीरोचनेति ऋचात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २ ३।उ ३ १ २
इन्द्राग्नीरोचनादिवःपरिवाजेषुभूषथः।

१ २ ३ २ ३।क २र
तद्वाञ्चेतिप्रवीर्य्यम्॥ १ *॥

हे "इन्द्राग्नी!" "दिवः रोचना" स्वर्गस्य रोचकौ युवां "वाजेषु" सङ्ग्रामेषु "परि भूषथः" परितः सर्वतः अलङ्कृतौ भवथः। शत्रून् पराजित्य सर्वतो विजयमानौ वर्त्तेथे। "वां" युवयोः "वीर्यं" सामर्थ्यमेव "तत्" तादृशं सङ्ग्राम-विजयं "प्रचेति" प्रकर्षेण ज्ञापयति [यद्वा, युवां "वाजेषु" सङ्ग्रामेषु भूषथः शत्रून् परिभवथः। शेषं पूर्ववत्॥ १॥

अथ

१ २ ३ १ २।१ २
इन्द्राग्नोअपसस्परि०॥ २ †॥

—इति द्वितीया,

अथ

१ २ ३ १ २
इन्द्राग्नीतविषाणिवां०॥ ३ ‡॥ १४

—इति तृतीया। तयोर्ऋचोः प्रतीके। तयोर्व्याख्यानमन्यत्र द्रष्टव्यम्॥ २, ३॥ १४५

---

* ऋ० वे० ३, १, १२, ५।

† अत्रैव ७, ३, २, ३ (५भा० ९४पृ०) = ऋ० वे० ३, १, १२, ४।

‡ अत्रैव ७, ३, २, ४ (५भा० ९४पृ०) = ऋ० वे० ३, १, १२, ३।

अथ कईवेदेति ऽचात्वकं षष्ठं सूक्तम्,

तत्र प्रथमायाः—

१ २ ३१२ १२
कईं वेदसुतेसचा० ॥ १ * ॥

—इति ऋचः प्रतीकम्। तस्यादितो व्याख्यानं मन्यत्र द्रष्टव्यम् ॥ १ ॥

अथ द्वितीया।

३ २ ३१२ २२११ २३२ ३१२
दानामृगोनवारणःपुरुत्राचरथन्दधे।

१२३ १२३१ ३१२ ३१ २३१२
नकिष्ट्वानियमदासुतेगमोमहाँ†अरस्योजसा ॥ २ ‡ ॥

"मृगः" मृगणामन्वेषकः "वारणः" गजः "दाना" मद-जालानीवः "पुरुत्रा" बहुषु यज्ञेषु च "रथं" चरण-शीलं "मदं" "दधे" इन्द्रो धारयति। अथ प्रत्यक्षस्तुतिः—हे इन्द्र! "त्वा" त्वां "न किः" नियमत" न कश्चिन्नियच्छति "सुते" अभिषुते सोमे "आ गम" आगच्छ। "महान्" पूज्यः "नः" त्वम् "ओजसा" बलेन सर्वतश्चरसि गच्छसि ॥ २ ॥

---

* ऋ० आ० ४, १, १, ५ (१भा० ६०१पृ०)=ऋ० वे० ६, ३, ८, ३।

† ऋ० वे० ६, ३, ८, ३।

‡ 'दानामृगोनवारणः—* * * मदजालो वारणः * * * यथा वारणः अनियाम्य एवं त्वम्'—इति वि०।

अथ तृतीया।

२ ३ १ र र ३ १ र २ र ३ १ २
यउग्रःसन्ननिष्टृतःस्थिरोरणायसंस्कृतः।

१ २ ३ २ ३ १ २ ३ २ ३ २ ३ १ २ ३ १ २
यदिस्तोतुर्मघवाशृणवद्धवंनेन्द्रोयोषत्यागमत्॥३*॥१५

"यः" "उग्रः" उद्दीर्णबलः ओजस्वी वा "सन्" भवन् "अनिष्टृतः" शत्रुभिरविस्तीर्णः "स्थिरः" दृढः "रणाय" युद्धाय "संस्कृतः"† शस्त्रैरलङ्कृतः सोमैर्वा संस्कृतः सः "इन्द्रः" "मघवान्" धनवान् "यदि" "स्तोतुः"‡ "हवम्" आह्वानं "शृणवत्" शृणोति तर्ह्यन्यत्र "न योषति" न गच्छति किन्तु "आ गमत्" तत्रैवागच्छति॥ ३॥ १५

२ र र १ २ १
॥वार्चम्॥ कईंवेदा। सुनायिसा१चा२। पिब

२ १ र २
न्तंवदायो१दाधा२यि। अयंयःपुरोविभिनत्त्साओ१जा

१र १ १ ३ ५र र २
सा२। मन्दाना२३:शी३। प्रा२या२३४औच्चोवा। धा

५ २र र १ २ १
धा२४सा:॥(१) दानास्त्गः। नवारा१णा२:। पुरु

र २ १ र र २
चाचरथान्दा१धा२यि। नकिष्टानियमदासुनायिगा१मा

---

* ऋ० वे० ६, ३, ८, ५।

† 'संस्कृतः—संरब्धः'—इति वि०।

‡ 'स्तोतुः—उद्गातुः'—इति वि०।

१२ २ १ ३ ५ २ २ ३
ऽः। मह्ाऽश्वा२रा३ । सा२ओ२३४औहोवा । जा२
५ २ १ १ १ २
३४सा ॥(२) यउग्रःसान् । अनायिष्टा१र्त्ता२ः। स्थिरो
२ २ १ २ २ २
रणायसाऽस्का१र्त्ता२ः। यदिस्तोतुर्म्मघवाऽऽणवाद्वा१वा
२ १ २ १ ३ ५ २ ३
२म्। नेन्द्रोयो२३षा३ । त्या२आ२३४औहोवा । गा
५
२३४मात्(३) ॥ २० * ॥ [१]

॥ आघ्कारणिधनम् ॥ ५ २ २ ४ ५ २ ४ ५ १
कई वे३दसुऽतेसचा । पायि
२ १ २ १ २ १
बन्तङ्कत् । वयो२३दधाउ । वा३२ । अययःपू । रो
३ २ १ २ १२ ५ १ २ १ २
विभिना । तियोजा२ ३ ४ सा । मा२३न्दा । नःशिप्रि ।
१ ५ २ ४ ५ २ ४ ५ १
यन्धा२३४५त्सा६५६ः ॥(१) दानामा३र्गोनवारणा । पूरु
१२ १ २ १ २ १ २
चाच । रथा२३न्दधाउ । वा३२ । नकिष्टुवा । निय
२ १ २ १२ ५ १ २ १ २ १२
मदा । सुतेगा२३४माः । मा२३न्दान् । चरसि । ओ
५ २ ४ ५ ४ ५ १
जा२३४५सा६५६ ॥(२) यउग्राः३सन्ननिष्टृताः । स्थायि

---

* ज० गा० १६प्र० २अ० २०सा०।

२२२ १ १ १२१
रोरणा। यसा२३५क्षुताउ। वा३२। यदिस्तोतूः।

२,१२२१ २१ ५ १०२ १२ १
मघवाशा। णवद्वा२३४वाम्। ने२३द्रो। योषति।

१२ १ १११
आगा२३४५मा६५६त्। आ२३४५ष्(३)॥ ८*॥ [२] १५

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्य अष्टादशस्याध्यायस्य तृतीयः खण्डः॥ ३॥

अथ चतुर्थ-खण्डे—

पवमानाअसृक्षतेति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१२ ३१२ ३१३१२
पवमानाअसृक्षतसोमाःशुक्रासइन्दवः।

३१२ २२ ३१२
अभिविश्वानिकाव्या॥ १†॥

"शुक्रासः" उज्वलाः‡ "इन्दवः" सोमाः "पवमानाः" पूयमानाः सोमाः "विश्वा" विश्वानि "काव्या" काव्यानि स्तोत्राणि "असृक्षत" ऋत्विग्भिरभितः सृज्यन्ते॥ १॥

---

* ऋ० मा० १८प्र० २ष० ८सा०।

† ऋ० वे० ७, १, ३४, ५।

‡ 'शुक्रासः'—तृतीय-भवने सोमाः शुक्रा भवन्ति'—इति वि०।

अथ द्वितीया।

१२ ३२उ ३ १ २
पवमानादिवस्पर्य्यन्तरिक्षादसृक्षत।
३ २उ ३ १ २
पृथिव्याअधिसानवि ॥ २ * ॥

"पवमानाः" पूयमानाः सोमाः "दिवः" द्युलोकादन्तरिक्षाच्च "पृथिव्याः" भूम्याः "अधि सानवि" समुच्छ्रिते देशे देवयजने "पर्यसृक्षत" सृज्यन्ते† ॥ २ ॥

अथ तृतीया।

१९ ३ १ १ २ १ २ ३ १ २
पवमानासआशवःशुभ्राअसृग्रमिन्दवः।
२ ३ २ ३ १ ३ १ २
घ्नन्तोविश्वाअपद्विषः ॥ ३ ‡ ॥ १९

"आशवः" शीघ्राः "शुभ्राः" शोभनाः "पवमानासः" पवमानाः "इन्दवः" दीप्ताः सोमाः "विश्वाः" सर्वान् "द्विषः" द्वेष्टॄन् शत्रून् "अप घ्नन्तः" मारयन्तः "असृग्रम्" सृज्यन्ते ॥ ३ ॥ १९

---

* ऋ० वे० ७, १, ३५, १।

† 'दिवस्परि—'दिवः' द्युलोकस्य उपरि अन्तरिक्षात् 'असृक्षत'। 'पृथिव्या अधि' अधुपरिभावेन चरत 'सानवि' पर्वत-सानवि गिरि-मस्तके'—इति वि०।

‡ ऋ० वे० ७, १, ३५, २।

अथ तोशाहवहणेति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा ।

३ १ २ ३ १ २ ३ २ ३ १ २

तोशावृत्रहणाहुवेसजित्वानापराजिता ।

३ १ २ ३ १ २

इन्द्राग्नीवाजसातमा ॥ १ * ॥

"तोशा"† शत्रूणां बाधकौ "वृत्रहणा" वृत्रस्य पापस्य हन्तारौ "सजित्वाना" जेतारौ परस्परापेक्षया जयशीलौ "अपराजिता" केनाप्यतिरस्कृतौ "वाजसातमा" अन्नस्य अतिशयेन दातारौ "इन्द्राग्नी" युवां "हुवे" इह कर्मणि सोमपानार्थमहमाह्वयामि ॥ १ ॥

अथ

१ २ ३ १ २

प्रवामर्चन्त्युक्थिनः० ॥ २ ‡ ॥

—इति द्वितीया,

अथ

१ २ ३ १२ २२

इन्द्राग्नीनवतिम्पुरः० ॥ ३ ¶ ॥ १७

—इति ऋतीया, इत्येताहवीः प्रतीके । तयोरादितो व्याख्यानमन्यत्रापि द्रष्टव्यम् ॥ २ । ३ ॥ १७

---

* ऋ० वे० ३, १, ११, ४ ।

† 'तोशा—तुभ्यौ दीप्तौ'—इति वि० ।

‡ अथर्व ७, ३, २, १ (५भा० ९३पृ०)=ऋ० वे० ३, १, ११, ५ ।

¶ अथर्व ७, ३, २, २ (५भा० ९३पृ०)=ऋ० वे० ३, १, ११, ६ ।

अथोपत्वारण्यसन्दृशमिति द्व्यात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१२ ३ १२ ३१ १
उपत्वारण्यसन्दृशम्प्रयस्वन्तःसहस्कृत।

१२ ३ २ ३ १२
अग्नेसहस्वमर्चिगिरः ॥ १ * ॥

हे "सहस्कृत" सहसा बलेनोत्पन्न! "प्रयस्वन्तः"† हविर्लक्षणान्नवन्तो वयं "रण्व-सन्दृशं" रमणीयं सन्दर्शनम् स्तोतव्यं सन्दर्शनं वा "त्वा" त्वाम् "उप" प्रति "गिरः" स्तुतीः "सस्वज्महे" विसृजाम उच्चारयामइत्यर्थः ॥ १ ॥

अथ द्वितीया।

१२३ १२३२३१२३ १२ ३२
उपच्छायामिवघृणेरगन्मशर्मतेवयम्।

१३ १२
अग्नेहिरण्यसन्दृशः ॥ २ ‡ ॥

हे "अग्ने!" "हिरण्यसन्दृशः" हिरण्यवद्रमणीय-तेजसः हिरण्यवद्दीप्यमान-तेजसो वा "घृणेः" दीप्तस्य "ते" तव "शर्म" शरणम् आश्रयणं सुखं वा "उप अगन्म" उपगच्छामः। तत्र दृष्टान्तः—"छायामिव" यथा सुसन्तप्तश्छायामुपागच्छन्ति तद्वत् ॥ २ ॥

---

* ऋ० वे० ४, ५, २८, २।

† 'प्रयस्वतः—प्रकर्षेण स्वन; संस्कृत बलस्य कर्तुः'—इति वि०।

‡ ऋ० वे० ४, ५, २८, १।

अथ तृतीया।

२ १ १ २ ३ २ ३ १ २ ३-१ २
यउग्रइवशर्ध्यहातिग्मशृङ्गोनवꣳसगः।

२ १ १ २ २ १ २
अग्नेपुरोरुरोजिथ॥ ३ * ॥ १८

"यः" अग्निः "उग्रइव" उर्ण-बलः "धन्वीव" "शर्ध्यहा" शर्ध्यैर्बलैः शत्रूणां हन्ता† "तिग्मशृङ्गो न वंसगः" तीक्ष्णशृङ्गो नवनीय-गतिर्वृषभइवः‡। हे अग्ने! स त्वं "पुरः" आसुरीस्तिस्रः पुरीः "ररोजिथ" भग्नवानसि ["रुद्रो वा एषः यदग्निः" —इति श्रुतेः, रुद्र-कृतमपि त्रिपुर-दहनमग्नि-कृतमेवेत्यग्निः स्मूयते। यद्वा, त्रिपुर-दहन-साधन-भूते बाणे अग्नेरनीकत्वेनावस्थानादग्निः पुराणि भग्नवानित्युच्यते। "देवासुरा वा एषु लोकेषु समयजन्त"—इत्यादिकं ब्राह्मणमत्रानुसन्धेयम्॥ ३ ॥ १८

अथ ऋतावानंवैश्वानरमिति ऋचात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा।

३ १ २ ३२१२३ १ २३१ २
ऋतावानंवैश्वानरमृतस्यज्योतिषस्पतिम्।

११ २१ १
अजस्रन्धर्ममीमहे॥ १ ¶॥

---

* ऋ० वे० ४, ५, २८, ४।

† 'शर्ध्यहा—सदृशः'—इति वि०।

‡ 'तिग्मशृङ्गः—तीक्ष्णशृङ्गः, न वंसगः—न सङ्गतगामी'—इति वि०।

¶ मान्त्रवर्णिकमुपलभ्यते।

हे अग्ने ! "ऋतावानं" यज्ञवन्तं सत्यवन्तम् ऋतस्य सत्यस्य यज्ञस्य सत्यस्य वा सम्बन्धिनं* "वैश्वानरं" विश्वेषां नराणां हितकारिणं "ज्योतिषस्पतिं" ज्योतिषः तेजसः पतिं पालकम् "अजस्रम्" अनादित्वादविच्छिन्नं "घर्मं" दीप्तं वैश्वानराख्यं त्वाम् "ईमहे" अभीष्टं याचामहे ॥ १ ॥

अथ द्वितीया।

२ १ १ २ २ २ १ २ ३ क २ र ३ २
यद्दम्प्रतिपप्रथेयज्ञस्यस्रुक्तिरन्।
३ २ १ १ २ र ३ १
ऋतूनुत्सृजतेवशी॥ २ †॥

"यः" अग्निः "इदं" जगत् "यज्ञस्य" अनुष्ठीयमानस्य यागस्य "स्रुः" सर्वं विघ्नम् "उक्तिरन्" उत्तारयन् [यद्वा, "स्रुः" स्वर्ग-फल-सम्बन्धि महाफलम् "उक्तिरन्" प्रयच्छन्] "प्रति पप्रथे" सर्वत्र प्रख्यातो भवति "वशी" परमात्मतया जगद् वशीकर्त्ता सोऽग्निः "ऋतून्" वसन्तादीन् "उत्सृजते" अनुष्ठानार्थं सम्यक् सृजति [तेषु स्वयमाधीयमानः सन् तदङ्गतया वसन्तान् उत्तमान् करोतीत्यभिप्रायः] ॥ २ ॥

---

* 'ऋतावानं—ऋतं नैघण्टुकलक्षणं अन्नं तेन स्तुत्यं अथवा ऋतमन्नं तस्य दातारं' —इति वि०।

† नेयमृगन्यत्र क्वचिद् दृश्यते।

अथ तृतीया।

१ २ ३ १२३ १ २३ १ २ ३ २३ १ २
अग्निःप्रियेषुधामसुकामोभूतस्यभव्यस्य।
३१७ ३ १ २
सम्राडेकोविराजति ॥ ३ * ॥ १९

"भूतस्य" अतीत-कालीनस्य भूत-जातस्य "भव्यस्य" आगामिनः भविष्यत्कालीनस्य जगतः "कामः" काम्यमानस्तत् तैः पुरुषैः "सम्राट्" "एकः" अद्वितीयत्वेन "प्रियेषु" आहवनीयादिषु "धामसु" स्थानेषु [यद्वा, त्रिषु पृथिव्यादि-लोकेषु "विराजति" विशेषेण दीप्यते†] ॥ ३ ॥ १९

इति सामवेदार्थप्रकाशे उत्तरग्रन्थस्य अष्टादशस्याध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ १८ ॥

॥ इति द्वितीयोऽर्द्धप्रपाठकः‡ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तरग्रन्थे अष्टादशोऽध्यायः समाप्तः ॥ १८ ॥

---

* य० वे० १२, ११६।

† 'एकः सर्वदेवानां प्रधानभूतः विराजति विविधं राजति दीप्यते'—इति वि०।

‡ 'अष्टमस्य द्वितीयोऽध्यायः समाप्तः'—इति वि० पदादि-मूल-ग्रन्थानां सम्मतम्।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १८ ॥

॥ अथैकोनविंशोऽध्यायआरभ्यते* ॥

तत्र,

प्रथमे खण्डे —

अग्निःप्रत्नेनेनि ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

३ २ ३२३१२३ १ २ ३ २ १
अग्निःप्रत्नेनजन्मना†शुम्भानस्तन्वा३ऽ३क्षाम्।
३१र २र
कविर्विप्रेणवावृधे ॥ १ ॥

"कविः" क्रान्त-कर्मा "अग्निः" "प्रत्नेन" पुराणेन "जन्मना" जननीयेन स्तोत्रेण "स्वां" स्वकीयां "तन्वं" तनुमङ्गं "शुम्भानः" शुम्भयन् "विप्रेण" मेधाविना स्तोत्रा "वावृधे" प्रवृद्धो भवति ॥१॥

---

* 'इदानीं सवाणि'—इति वि० ।

† "मन्मना"—इति ऋ०-पाठः ।

‡ "मन्म२"—इति ऋ०-पाठः ।

¶ ऋ० वे० १, ३, ३८, २ ।

अथ द्वितीया।

३ १२ १२३१ २३१ २.३१ ३
ऊर्ज्जोनपातमाहुवेश्मिन्पावकशोचिषम्।

३ २ ३ १ १ ३ २
अस्मिन्यज्ञेस्वध्वरे ॥ २ * ॥

"ऊर्जः" अन्नस्य "नपातं" पुत्रं † "पावक-शोचिषं" शोधक-दीप्तिमग्निं "स्वध्वरे" असुरैरत्यन्तमहिंस्येऽस्मिन् यज्ञे "आ हुवे" आह्वयामि ॥ २ ॥

अथ तृतीया।

१ २ ३ १२ २१२ ३ १ ३ १ २
सनोमित्रमहस्त्वमग्नेशुक्रेणशोचिषा।

३ १२ २१ ३ १ २
देवैरासत्सिबर्हिषि ॥ ३ ‡ ॥ १

हे "मित्रमहः" मित्राणां पूजनीयाग्ने ¶! "सः" त्वं "शुक्रेण" ज्वालावता "शोचिषा" तेजसा "देवैः" सह "बर्हिषि" "आसत्सि" आसीद ॥ ३ ॥ १

---

* ऋ० वे० ६, ३, १८, ३।

† 'ऊर्जोनपातम्—अन्नानां पालकं रक्षयितारम्'—इति वि०।

‡ ऋ० वे० ६, ३, १८, ४।

¶ 'मित्रमहः—मित्राणां महिमानकर'—इति वि०।

अथोत्तिष्ठशुष्मासइति चतुर्ऋचं द्वितीयं सूक्तम्,

तत्र प्रथमा।

२ १ १ २ ३ १ २ ३ १ १
उत्तेशुष्मासोअस्थूरत्तोभिन्दन्तोअद्रिवः।
३ २ ३ १ २ ३ १ १
नुदस्वयाःपरिस्पृधः॥ १ *॥

हे "अद्रिवः" गाववन् सोम! "ते" तव "शुष्मासः" शुष्मा वेगाः "रत्तः" राक्षसान् "भन्दन्तः" विदारयन्तः "उदस्थुः" उत्तिष्ठन्ति। "याः" "स्पृधः" स्पर्धमानाः शत्रुसेना अस्मान् प्रतिबाधन्ते तास्त्वं "नुदस्व" प्रेरय बाधस्वेत्यर्थः॥ १॥

अथ द्वितीया।

३ १ २ ३ १ २ २ ३ १ २ ३ १ २
अयानिजघ्निरोजसारथसङ्गेधनेहिते।
२ १ १ २ ३ २
स्तवाअबिभ्युषाहृदा॥ २ †॥

हे सोम! त्वम् "अया" अनेन क्रतेन "ओजसा" बलेन "निजघ्निः" शत्रून् हन्तुं शीलवान्। तं त्वाम् "अबिभ्युषा" "अभीतेन" "हृदा" मनसा युक्तोऽहं "रथ-सङ्गे" अस्माकं रथानां सङ्गे "हिते" शत्रुषु निहिते धने च निमित्ते "स्तवै" स्तौमि॥ २॥

---

* ऋ० वे० ७, १, १०, १।

† ऋ० वे० ७, १, १०, ९।

अथ तृतीया।

१ १ ३ २ ३ २उ ३ १ २ १क २र
अस्यव्रतानिनाधृषेपवमानस्यदूढ्या।

३ १र २र ३ १ २
रुजयस्त्वापृतन्यति ॥ ३ * ॥

हे सोम! "पवमानस्य" क्षरतः यस्य "अस्य" तव "व्रतानि" कर्माणि "दूढ्या" दुर्बुद्धिना राक्षसेन "नाधृषे" आधर्षयितुमशक्यानि स "त्वा" त्वां "यः" दुर्बुद्धिः शत्रुः "पृतन्यति" योद्धुमिच्छति तं "रुज" बाधस्व ॥ ३ ॥

अथ चतुर्थी।

१ २ १ २ ३ १ २ ३ १ २ ३ १ २
तꣳहिन्वन्तिमदच्युतꣳहरिन्नदीषुवाजिनम्।

२ ३ १ २ ३ १
इन्दुमिन्द्रायमत्सरम् ॥ ४ † ॥ २

"मदच्युतं" मदस्य च्यावयितारं "हरिं" हरितवर्णं "वाजिनं" बलिनं "मत्सरं" मदकरं "तम्" "इन्दुं" सोमं "नदीषु" "इन्द्राय" इन्द्रार्थं "हिन्वन्ति" ऋत्विजः प्रेरयन्ति ॥ ४ ॥ २

---

* ऋ० वे० ७, १, १० ३।

† ऋ० वे० ७, १, १०, ४।

अथामन्द्रैरिति तृचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

२ ३ १ २ ३ १२ ३ २ ३ १२
आमन्द्रैरिन्द्रहरिभिर्याह्यमयूररोमभिः।

२ ३ २ ३ १२ ३ २उ ३ २उ ३ १ २ १ १ २
मात्वाकेचिन्नियेमुरिन्नपाशिनोतिधन्वेवताँइहि॥ १ *॥

विश्वामित्रो यज्ञार्थमिन्द्रमाह्वयति— हे "इन्द्र!" "मन्द्रैः" मादयितृभिः मयूर-रोमभिः मयूर-रोम-सदृश रोम-युक्तैः "हरिभिः" एतल्लक्षणैरश्वैरुपेतस्त्वम् "आ याहि" यज्ञं प्रत्यागच्छ। "केचित्" अपि जनाः "त्वा" त्वाम् "मा नियेमुः" मा नियन्तु गमन-प्रतिबन्धं मा कुर्वन्त्वित्यभिप्रायः। प्रतिबन्धे दृष्टान्तः— "पाशिनो न" पाश-हस्ता व्याधा यथा पक्षिणं नियच्छन्ति तद्वत् त्वां मा नियच्छन्त्वेव। किञ्च "धन्वेव" यथा पान्थाः धन्व मरुदेशं शीघ्रमतिगच्छन्ति, तद्वदागमन-प्रतिकारिणः "तान्" अतीत्य शीघ्रमागच्छ॥ १॥

अथ द्वितीया।

३ १ २ ३ २ २ १ ३ २ ३ २ ३ २
वृत्रखादोबलँरुजःपुरान्दर्मोचपामजः।

१ १ १ २ ३ १ २ ३ १ २ २ १ १ २ ३ २
स्थातारथस्यहर्य्योरभिस्वरइन्द्रोढाचिदारुजः॥ २†॥

---

* ऋ० सा० ३, २, १, ४ (१भा० ५०८पृ०) = ऋ० वे० ३, ३, ९, १।

† ऋ० वे० ३, ३, ९, २।

सोऽयमिन्द्रः "वृत्रखादः" [खाद भक्षणे (भ्वा० प०),—इत्यस्मात् "कर्मण्यण् (३, २, १), ऋदुत्तरपदप्रकृतिस्वरः (३, २, १३९), वृत्रं खादति हिनस्तीति वृत्रखादः] "बलंरुजः" [रुजो भङ्गे (तु० प०), कर्मण्युपपदे मूलविभुजादित्वात् क-प्रत्ययः "तत्पुरुषे कृति बहुलम् (६, ३, १४)"—इति द्वितीयाया अलुक्, याथादिस्वरः (६, २, १४४) आद्युदात्तमिति] बली मेघः तस्य भञ्जकः* ततः "अपामजः" अज गतिक्षेपणयोः (भ्वा० प०)—इत्यस्मात् पचाद्यच् (३, १, १३४), चित्स्वरः (६, १, १६३)] मेघ-भेदन-द्वारा अपां प्रेरकः "पुरां" शत्रु-सम्बन्धिनां "दर्मः" दारकः, [तथा विष्णुः त्रिविक्रमावतारधारी इदं प्रतीयमानं सर्वं जगत् क्रान्त्वा तिष्ठतीति मन्त्रवर्णः] तथा "हर्योः" अश्वयोः "अभिस्वरे" अस्मदाभिमुख्येन प्रेरणे निमित्तभूते सति "रथस्य खाता" रथमधिष्ठाता, तथा "दृढ़ाचित्" दृढ़ानामतिबलवतां शत्रूणामपि "आ रुजः" [रुजो भङ्गे (तु० प०)—इत्यस्मादिगुपध-लक्षणः कः (३, १, १३५)] आ समन्तात् भञ्जको भवति ॥ २ ॥

अथ द्वितीया।

३ १ २३ १ ३११२ ३ १२
गम्भीराञ्उदधीञ्रिवक्रतुम्पृष्यमिगाइव।
१२३ १८ २८ ३ १२ ३२३ १ २
प्रसुगोपायवसन्धेनवोयथाह्रदङ्कन्याइवाशत ॥ ३† ॥ ३

* 'बलरुजः—बलोनाम दानवः तस्य भञ्जकर्ता'—इति वि०।

† ऋ० वे० १, ३, ८, १।

हे इन्द्र! त्वं "गभीरान्" महाबलाढ्यान् "उदधीन्" समुद्रान् उदकैः यथा पोषयसि तद्वत् "क्रतुं" यज्ञस्य कर्त्तारम् अमुं यजमानमभिमत-फल-प्रदानेन "पुष्यसि" पोषयसि। तत्र दृष्टान्तः यथा—"सुगोपाः" समीचीनो गोपालः "यवसेन" "गाः" पोषयति तद्वत्, यथा "धेनवः" "यवसं" तृणादिकम् प्राप्नुवन्ति तद्वत् सोमान् प्राप्नोति, ते च सोमाः "कुल्याः" कृत्रिम-सरितः "ऋदं" महाजलाशयं यथा प्राप्नुवन्ति तद्वत् "आशत" व्याप्नुवन्ति ॥३॥ ३

॥ अभिनिधनङ्काण्वम् ॥ औहोवोहायि। आयिवी।
आमा। द्रै२३३रायि। द्राहारा२३४यिभायिः। या
वीमा२३४यू। रारोमभायिः। ऐवोयि। आ२३४यि
वी। मात्वाकार२३४यिवीत्। नायियेमू२३४रीत्।
नापाग्निनाः। ऐवोयि। आ२३४यिवी। आतीधा२३
४न्वे। वताइ॒आपूयिवाइ५ ६यि ॥(१) औहोवोहा
यि। आयिवी। वार्त्रा। खा२३४दो। बालं॒ऋ
२३४जाः। पूरान्दा२३४र्माः। आपामजाः। ऐ
वोयि। आ२३४यिवी। स्थातारा२३४था। स्था

२ ५ १र १ २र १ २
हारी २ ३ ४ योः। आभिस्त्रायि। ऐहोयि। आ२३
५ २ २ ५ ३ २ ४
४यिहो। आयिन्द्रोदा२३४र्ढा। चिदा३रु५जा६५६ः ॥(२)
२र १ १ १ २ १ २ ३ ५
औहोहोहायि। आयिहो। गाभो। रा२३४ऊ।
२ ३ ५ २ ३ ५ २र१र
दाधी२रा२३४यिवा। क्रातुम्पू२३४ष्या। सोगाइवा।
२र१र ३ ५ २ ३ ५ २ ३
ऐहोयि। आ२३४यिहो। प्रासूगो२३४पाः। यावासा
५ १र१र २र१र ३ ५ २
२३४न्धे। नावोयथा। ऐहोयि। आ२३४यिहो। हा
३ ५ ३१ ४ ३
दक्ष २ ३ ४ ल्याः। इवा ३ शा ५ ता ६ ५ ६। आ २ ३
५
४ भी(३) ॥ १७ * ॥ [१] ३

अथ यथागौरोअपाक्षतमिति प्रगाथात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

१ १ ३ २ ३ २ ३उ ३ १र २र
यथागौरोअपाक्षतन्तृष्यन्नेत्यवेरिणम्।
३ ११ ३२उ ३१ २ ३१ १ ३२उ ३ १२
आपित्वनःप्रपित्वितूयमागहिकण्वेषुसुसंचापिब ॥ १ † ॥

---

* ऊ० गा० १८म० २ख० १७सा०।

† ऋ० सा० ३, १, १, १० (१ भा० ५२१पृ०) = ऋ० वे० ५, ७, ३० १।

"गौरः" गौरमृगः "तृष्यन्" पिपासन् "अपा" अङ्गिरदकैः [व्यत्ययेनैकवचनम् (३, १, ८५) "उडिदम् (६, १, १७१)"—इत्यादिना विभक्तेरुदात्तत्वं कृतम्] "इरिणं" निस्तृणं तटाक-देशं "यथा" येन प्रकारेण "अर्वति" अवगच्छति [अव-शब्दोऽभि-शब्दस्यार्थे] अभिमुखः सन् शीघ्रं गच्छति। तथा "आपित्वे" बन्धुत्वे "प्रपित्वे" प्राप्ते सति हे इन्द्र! त्वं "नः" अस्मान् "तूयं" [क्षिप्रनामैतत् (निघ० २, १५, ११)] शीघ्रम् "आ गहि" आगच्छ। आगत्य च "कण्वेषु" कण्व-पुत्रेषु अस्मासु "सचा" सह एकत्रैवैव विद्यमानं सर्वं सोमं सुष्ठु "पिब" ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ १ ३ १ २ ३ १
मन्दन्तुत्वामघवन्निन्द्रेन्दवोराधोदेयायसुन्वते।

३ २ ३ १ २ २ २ ३ २ ३ १ २ ३ १ २
आमुष्यासोममपिबश्चमूसुतञ्जेष्टन्तद्धिषेसचः॥ २ * ॥४

हे "मघवन्" धनवन्निन्द्र! "इन्दवः" क्लेदनाः सोमाः त्वां "मन्दन्तु" हर्षयन्तु [मन्देर्व्यत्ययेन परस्मैपदम् (३, १, ८५)] किमर्थम्? "सुन्वते" सोमाभिषवं कुर्वते यजमानाय "राधः देयाय" राधसः धनस्य दानार्थं† [ददातेः "अचो यत् (३, १, ९७)"—इति भावे यत्, "ईद्यति (६, ४, ६५)"—इतीकारः, "यतोऽनावः (६, १, २१३)"—इत्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वर-

---

* ऋ० वे० १, ३, ९, १।

† 'राधः—धनाय अन्नाय वा, देयाय दानयोग्य च'—इति वि०।

त्वम् (६,२,१३८)। शतुरनुमः (६,१,१७३)"—इति सुब्व्यत्ययात् परा विभक्तिरुदात्ता]। अपिच त्वं "सोमम्" "आमुष्य" मोषणं कृत्वा* अदत्तमपि बलादाहृत्य "अपिबः" पीतवानसि ["स यज्ञवेशसं कृत्वा प्रातरहा सोममपिबत्"—इति श्रुतेः]। कीदृशं सोमं ? "चमू" चम्वोरधिषवणफलकयोः "सुतम्" अभिषुतम् [यद्वा, चमूभ्यां(चमसाभ्यां होतुर्मैत्रावरुणस्य च सम्बन्धिभ्यां संस्कृताभिर्वसतीवरीभिः सुतमभिषुतम्] यस्मादेवं तस्मात् कारणात् "ज्येष्ठं" प्रशस्यतमं बलवत्तमं वा† "सहः" बलं "दधिषे" हे इन्द्र ! त्वं धारयसि अतो मदीया अपि सोमास्त्वां मादयन्तिति प्रार्थते ॥ २ ॥ ४

॥ मनाद्यम् ॥ यथागौ२३रोअपाकृताम्। तृष्यन्नेति
यवेरा२३यिणाम्। आपित्वेनःप्रपित्वेतूयमागा२३हि।
कण्वे२षुसु२३। सा२चा२३४औहोवा। पी२३४बा ॥(१)
कण्वेषू२३सुमचापिबा। कण्वेषुसुमचापा२३यिबा। मन्द
न्तुत्वामघवन्निन्द्रेन्दा२३वाः। राधोदे२३या३। या२
सू२३४औहोवा। न्वा२३४ते ॥(२) राधोदे२३यायसुन्व

* 'आमुष्येति छान्दसं दीर्घत्वम् अमुष्य यजमानस्य'—इति वि०।

† मूलपुस्तके तु सर्वत्रैव "अहम्"—इति पाठः।

१२ २ २ २ २ १ २ १२ २ २
तायि। राधोदेयायसुन्वा२३तायि। आमुष्यासोममपि
२ १२ २ १ २ १ ३
बश्वमूह२३ताम्। ज्येष्ठन्ताता२३ह्वा३। धा२यिषा२३४
५ २ २ ३ ५
औच्छोवा। सा२३४हाः(३)॥ १८ *॥ [१] ४

अथ त्वमङ्गप्रशंसिषदिति प्रगाथात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा।

१ ३ १२ २२ ३ १ २ १ १ २
त्वमङ्गप्रशंसिषोदेवःशविष्ठमर्त्यम्।
२उ ३ १ २ ३ २ ३ १ २ ३ १ २
नत्वदन्योमघवन्नस्तिमर्डितेन्द्रब्रवीमितेवचः॥ १ †॥

[अङ्ग—इत्यभिमुखीकरणे] "अङ्ग" "शविष्ठ" बलवत्तमेन्द्र! "देवः" द्योतमानस्त्वं "मर्त्यं" नर-धर्माणं त्वां स्तुवन्तं पुरुषं "प्रशंसिषः" सम्यक् तेन स्तुतमिति प्रशंसा। हे "मघवन्" धनवन्! "इन्द्र!" "त्वदन्यः" कश्चित् "मर्डिता" सुखयिता नास्ति, अतः कारणात् "ते" तुभ्यम् "इदं" स्तुतिलक्षणं "वचः" "ब्रवीमि उच्चारयामि [शंसिषः—शंस स्तुतौ (भ्वा० प०), लेटि, सिप्यड़ागमः (३, ४, ९४) "सिब्बहुलं लेटि (३, १, ३४)"—इति विकरणे सिप्, तस्यार्धधातुकत्वादिड़ागमः (७, २, ३५)]॥ १॥

---

* ऋ० गा० १८प्र० २अ० १८सा०।

† ऋ० आ० १, १, १, ५ (१भा० ५१०पृ०) = ऋ० वे० १, ९, ८, ४।

अथ द्वितीया।

२ ३ १ २ ३१ २ ३ १ २ ३
मातिराधाꣳसिमातऊतयोवसो
१२ २३ ३१ २
स्मान्कदाचनादभन्।
१ २ ३ १ २ ३
विश्वाचनंउपमिमीहिमानुष
१ २ ७ २ ३ २
वसूनिचर्षणिभ्यआ ॥ २ * ॥ ५

हे "वसो" वासयितरिन्द्र! "ते" तव सम्बन्धीनि राधांस्येभि रिति "राधांसि" भूतानि† यस्मात् "कदाचन" कदाचिदपि "मा दभन्" मा विनाशयन्तु। तथा "ऊतयः" गन्तारः‡ [यद्वा, ऊतयइत्यत्र वर्ण-लोपः, धूतयः कम्पयितारः "ते" त्वदीया मारुतश्च हे "मानुष" मनुष्य-हितेन्द्र! "चर्षणिभ्यः" मन्त्र-दृष्टेभ्यः¶ "नः" अस्मभ्यं "विश्वा" विश्वानि "वसूनि" धनानि च "आ उप मिमीहि" सर्वत आहृत्य अस्मत्समीपे कुरु, सर्वत्र वर्त्तमानं धनम् अस्मभ्यं प्रयच्छेत्यर्थः [कदा—किं शब्दात् "सर्वकाल्यकिंयत्तदः काले दा (५, ३, १५)"—इति दा-प्रत्ययः, "किमः कः (७, २, १०३)"—इति कादेशः, व्यत्ययेनाद्युदात्तत्वम् (३, १, ८५)।

---

* ऋ० वे० १, ६, ८, ५।

† 'राधांसि अन्नानि'—इति वि०।

‡ 'ऊतयः पालनानि'—इति वि०।

¶ 'चर्षणिभ्यः—ऋत्विग्यजमानेभ्यः'—इति वि०।

दभन्—दभ्, दम्भे, लोडर्थे छान्दसे लङि "बहुलञ्छन्दसि (२, ४, ७३)"—इति विकरणस्य लुक्, "न माङ्योगे (६, ४, ७४)"—इत्यडभावः। मिमीहि—माङ् माने शब्दे च (अदा० प०) व्यत्ययेन परस्मैपदम् (३, १, ८५),"जुहोत्यादिभ्यः श्लुः (२, ४, ७५)", "भृञामित् (७, ४, ७६)"—इत्यभ्यासस्येत्वम्, ङेर्ङित्वात् "घु-मा-स्था (६, ४, ६६)"—इतीत्वम् ॥ २ ॥ ५

॥ पौरुमीढम् ॥ तुवम। गप्रा३४ओहोवा। ग्राए
सिषः। देवःशवि। षमर्त्ता२३याम्। नत्वदन्यो। मघ
वा२३ना। स्तिमर्डिता। इन्द्रव्रा२३वो। भितायिवा२
३४५चा६५६ः ॥(१) इन्द्रव्र। वोमा३४ओहोवा। तायि
वचः। इन्द्रव्रवो। मितेवा२३चाः। मातेराधा। सि
माना२३ऊ। तयोवसाउ। अस्मान्का२३दा। चनादा
२३४५भा६५६न्। अस्मान्क। दाचा३४ओहोवा। नाद
भन्। अस्मान्कदा। चनादा२३भान्। विश्वाचनाः।
उपमा२३यिमायि। धिम। नुषा। वहना२३यिचा।

१ १२ १ १ १ १ १
षणायिभ्या २ ३ ४ ५ आ ६ ५ ६। दत्ता ३ या २ ३ ४ ५

(३) ॥ १८ * ॥ [१]

॥ त्रैककुभम्। २ १ २१
त्वमङ्गप्रशंसमाऽयिषाः। देवःश्रवा

१ २ १ ३ ५ २१२१२ २
यिष्ठाऽमा। ऊम्। ता२३४याम्। नत्वदन्योमघवन्।

१ १ ३२२१ ३ १ १ २२ १
स्तायिम। डितेन्द्रा। ब्रा२३४वी। मायितेव। चा

२ ३ ५२२ २ २ २ २
२। या २ ३ ४ औहोवा ॥(१) इन्द्रवतोमितेवाऽचाः।

१ १ २ १ ३ ५ १२ २१२ २
इन्द्रब्रवीमोऽतायि। ऊम्। वा२३४चाः। मातेराधाꣳ

२१२ २ २ १ २ ३२२१ ३ ५ १ २२
सिमातऊ। तायः। वसोस्मान्। का२३४दा। चाना

१ ३ ५२२ २ २ २
द। भा२। या२३४औहोवा ॥(२) अस्मान्कदाचनादा

२ १ २ १ १ १ ३ ५
ऽभान्। अस्मान्कदाचाऽना। ऊम्। दा२३४भान्।

१ २ २ २ १ २२ ३ २ १ ३ ५
विश्वाचनउपमिमी। हाइमानुपवस्व। ना२३४यिचो।

---

* ऋ० मा० १८५० २अ० १८वा०।.

१-२ १ ३ ५ ४ ३ ५
षाणिभ्यः। आ२। या२३४ओहोवा। ई२३४दाः(३)

॥ ५ * ॥ [२] ५

इति सामवेदार्थप्रकाशे उत्तरायण्यस्यैकोनविंशस्याध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीय-खण्डे—

प्रतिष्यासूनरीति ऌचात्मकं प्रथमं सूक्तम्,

तच्च प्रथमा।

२ १ २ ३ २ ३ १ २ ३ २ १ २ ३ १ २
प्रतिष्यासूनरीजनीव्युच्छन्तीपरिस्वसुः।

३ १ २ ३ १
दिवोअदर्शिदुहिता ॥ १ † ॥

"स्या" सा प्रसूयमाना, "सूनरी" सुष्ठु प्राणिनां नेत्री, "जनी" जनयित्री फलानां, "स्वसुः" स्वसृ-स्थानीयाया रात्रेः "परि" उपरि भागे रात्रि-पर्यवसान-काले "व्युच्छन्ती" तमो विवासयन्ती‡ [स्वसा—स्वसे ङ्यायस्वाङित्यत्वम्], "दिवः" द्योतमानस्यादित्यस्य "दुहिता", उषाः "प्रत्यदर्शि" सर्वैः प्रतिदृश्यते ॥ १ ॥

---

* ऋ० गा० १८प्र० १अ० ५सा०।

† ऋ० वे० १, ८, ३, १।

‡ 'व्युच्छन्ती—दीप्तिं कुर्वन्ती'—इति वि०।

अथ द्वितीया।

१ २ २१ २ ३१२ १२३१ २
अश्वेवचित्रारुषीमातागवामृतावरी।

१२ ३ १ २३२
सखाभूद्*श्विनोरुषा ॥ २ †॥

"अश्वेव" "चित्रा" चायनीया "अरुषी" आरोचमाना "गवां" रश्मीनां "माता" निर्मात्री "ऋतावरी" यज्ञवपुः‡ "अश्विनोः" "सखा" समान-ख्याना सह स्तूयमाना "भूत्" भवति [अश्विनोरुषसा सह स्तूयमानत्वात् सख्यं परस्परम्] ॥ २ ॥

अथ तृतीया।

३१२ २२ ३ १ २ ३२३ १२ २२
उतसखास्याश्विनोरुतमातागवामसि।

३ २ ३१ २
उतोषोवस्वईशिषे ॥ ३ ¶ ॥ ६

"उत" अपिच "अश्विनोः" "सखा", "उत" अपिच "गवां" रश्मीनां "माता" निर्माता "असि", "उत" अपिच हे "उषः!" "वस्वः" धनस्य "ईशिषे" ईश्वरी भवसि ॥ ३ ॥ ६

---

* "अभूत्"—इति ऋ०-पाठः।

† ऋ० वे० ३, ८, २, २।

‡ 'ऋतावरी—चितकरी'—इति वि०।

¶ ऋ० वे० ३, ८, २, ३।

॥ जरावोधीयम् ॥ प्रतिष्यासोवा। नारीजनायि। वि
यूच्छा२३न्ती। परिस्वाहः। दिवोआ१दा२३शो। द।
हितो३४५ई। डा ॥(१) अश्वेवचोवा। चाअरुषायि।
मातागा२३वाम्। कृतावाराये। सखाभू१दा२३श्वा
यि। नोः। उषो३४५ई। डा ॥(२) उतसखोवा।
साअश्विनोः। उतामा२३ता। गवामासायि। उतो
षो१वा२३स्वाः। ई। शिषो३४५ई। डा(३) ॥ ३ * ॥ [१] ६

अथैषोऽषेति त्रृचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

एषोउषाअपूर्व्याव्युच्छतिप्रियादिवः।
स्तुषेवामश्विनावृहत्॥ १ †॥

"एषः" एषा अस्माभिः परिदृश्यमाना "प्रिया" सर्वेषां प्रीतेर्हेतुः "अपूर्व्या" पूर्वेषु मध्यरात्रिकालेषु विद्यमाना न भवति

---

* ज० मा० १८५० १अ० ३खा०।

† ऋ० आ० १, २, ४, ४ (१भाँ० ३९८५½)—सा० वे० १, ३, २३, १।

किञ्चिदानीन्तनी "उषाः" उषोदेवता "दिवः" द्यु-लोकस्य सकाशादागत्य "व्युच्छति" तमो वर्जयति। हे "अश्विना" अश्विनौ! "वां" युवां "महत्" प्रभूतं यथा भवति तथा "स्तुषे" स्तौमि ॥ १ ॥

अथ द्वितीया।

२ ३ १ २ २ २ ३ १ २ ३ २
यादस्रासिन्धुमातरामनोतरारयीणाम्।

३ २ ३ १ २ ३ १ २
धियादेवावसुविदा ॥ २ * ॥

"या देवा" यावुभावश्विनौ वक्ष्यमाण-गुण-युक्तौ तौ स्तुष इति पूर्वत्रान्वयः। कौदृशौ? "दस्रा" दर्शनीयौ, "सिन्धुमातरा" समुद्रमातरौ† [यद्यपि सूर्याचन्द्रमसावेव समुद्रजौ तथाप्यश्विनोः केषाञ्चिन्मते तद्रूपत्वात् तथात्वम्], "रयीणां" धनानां "मनोतरा" मनसा तारयितारौ, "धिया" कर्मणा "वसुविदा" निवास-स्थानस्य लम्भयितारौ‡ [मनोतरा मनसा तरत इति मनोतरौ, तरतेरन्तर्भावित-ण्यर्थात् "ऋदोरप् (३, ३, ५७)"—इत्यप्, पूर्वपदान्तस्य सकारस्य रुत्वे सति छान्दसमुत्वम्। रयीणां—"नामन्यतरस्याम् (६, १, १७७)"—इति नाम उदात्तत्वम्।

---

* ऋ० वे० १. ३, ३३, २।

† 'सिन्धुमातरा—सिन्धुशब्देन उदकानि गृह्यन्ते, उदकानां निर्मात्रभूतौ,—इति वे०।

‡ "वसुविदौ—विदृलाभे, विदृलाभे, विद् सत्तायां, विद्यमान-धनौ; अथवा लम्भकौ,—इति वि०।

धिया—"सावेकाच (६, १, १६८)"—इति विभक्तेरुदात्तत्वम्। वसुविदा—वसूनि निवास-स्थानानि विन्देते इति वसुविदौ "क्विप् च (३, २, ७६)"—इति क्विप्॥ २॥

अथ तृतीया।

३ १ २ ३ १ २ ३ २ १ २ ३ १ २
वच्यन्तेवाङ्ककुहासोजूर्णायामधिविष्टपि।

१ ३ २ ३ २ ३ १ २
यद्वाꣳरथोविभिष्पतात् ॥ ३ * ॥ ७

हे अश्विनौ! "वां" युवयोः सम्बन्धी रथः "जूर्णायां" नानाशास्त्रैः स्तुतायाम्† "अधिविष्टपि" स्वर्ग-लोके "यद्" यदा "विभिः" अश्वैः‡ "पतात्" पतति गच्छति, तदानीं "वां" युवयोः "ककुहासः" स्तुतयः "वच्यन्ते" अस्माभिरुच्यन्ते [ब्रवीतेर्यक्, "ब्रुवो वचिः (२, ४, ५३)"—इति वच्यादेशः, "वचि-स्वपि (६, १, १५)"—इत्यादिना सम्प्रसारणम्, "सम्प्रसारणाच्च (६, १, १०८)"—इत्यत्र छन्दसीत्यनुवृत्तेः¶ परपूर्वत्वस्य पाक्षिकत्वात् यणादेशः, प्रत्ययस्वरः। ककुहासः—'ककुभं शृङ्गे विदुः प्रधाने च'—इत्यभिधानात्; प्राधान्याभिधायिना ककुप्-शब्देन तत्प्रतिपादका स्तुतयो लक्ष्यन्ते; छत्वं छान्दसम्, "आज्जसेर-

---

* ऋ० वे० १, ३, १३, ३।

† 'जूर्णायां—जौर्णायां पृथिव्याम्, अधि—उपरि, विष्टपि—स्थाने'—इति वि०।

‡ 'वि-इत्याकाश-नाम, आकाशात् पतनीत्येवं वक्तव्ये ततीय-वचनं छतं छान्दसत्वाददोषो वक्तव्यं छन्दसीति'—इति वि०।

¶ सायानुवृत्तिः "वा छन्दसि (६, १, १०६)"—इत्यस्मात् बोध्यम्।

सुक् (७, १, ५)"—इत्यसुक्। जूर्णायां—जूष् वयोहानौ (दि० प०), अत्र स्तुत्यर्थः, धातूनामनेकार्थत्वात्, निष्ठायां "स्यसिच: क्ङिति (६, २, ११)"—इति इट्-प्रतिषेधः, "बहुलञ्छन्दसि (७,१,१०३)"—इति उत्त्वम्, "रदाभ्यामिति (८,२,४२) निष्ठानत्वम्, प्रत्ययस्वरः (३, १, ३)। विभिः—वी गत्यादौ (अदा० प०) वियन्ति गच्छन्ति वयोऽस्याः, औणादिको डि-प्रत्ययः। पतात्—पत्लृ गतौ (भ्वा० प०), लेठाड़ागमः, "इतश्च लोपः (३, ४, ७)"—इतीकार-लोपः॥ ३ ॥ ७

॥ जराबोधीयम् ॥ एषोउषोवा। आपूविया। वियूच्छा
२ २ १ २ ४ ५ ४
२३ती। प्रियादायिवाः। सुषायिवा१मा२३श्वायि। ता।
५ २ २ २ १ १ १ २ १
बृहा३४५ई। डा ॥(१) यादस्मासोवा। धूमातरा।
२ १ ३ १ २ ४ ५
मनोना२३रा। रयायिणाम्। धियादा१यिवा २३ वा।
५ ३ २ २ २ १ २ १
सु। विदो३४५ई। डा ॥(२) वच्यन्तेवाऽओवा। का
२ १ २ १ २ १
कुदासाः। जूर्णाया२३मा। धिविष्टापायि। यद्वाऽ
१ ४ ५ ३ २
रा१थो२३वायि। भि। पतो३४५ई। डा(३) ॥ ४ * ॥ [१] ७

* ऋ० मा० १८म० १ख० ४सा०।

अथोषस्त्वच्चित्रमिति तृचं तृतीयं सूक्तम्,

तत्र प्रथमा।

२ ३ १ ३ १८ २८ ३ १ २

उषस्त्वच्चित्रमाभरास्मभ्यंवाजिनीवति।

१ २ ३ २ ३ १ २ ३ १ २

येनतोकञ्चतनयञ्चधामहे ॥ १ * ॥

हे "वाजिनीवति!" वाजो हविर्लक्षणमन्नं, तद्युक्ता वाजिनी, तया क्रियया युक्ते! "उषः" उषोदेवते! "अस्मभ्यं" "चित्रं" चायनीयं "तत्" धनम् "आ भर" आहर प्रयच्छ। "येन" धनेन "तोकं" पुत्रं "तनयं" तत्पुत्रं "च" धामहे दधीमहे धारयामः [अत्र निरुक्तम्—"उषस्त्वच्चित्रं चायनीयं मंहनीयं धनमाहरास्मभ्यमन्नवती येन पुत्रांश्च पौत्रांश्च दधीमहि (निरु० दै० ६, ६)"—इति। धामहे—दधातेर्लटि "बहुलञ्छन्दसि (२, ४, ७३)"—इति शपो लुक्, व्यत्ययेनाद्युदात्तत्वम्; यद्वा, लोटि "आडुत्तमस्य पिच्च (३, ४, ९२)"—इत्याडागमः प्रत्ययस्य पिदङ्गावश्च, अतः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते; अस्मिन् पक्षे "एत ऐ (३,४,९३)"—इत्यैत्वाभावो व्यत्ययेन द्रष्टव्यः, "यङ्लुक्ताम्नित्यम् (८, १, ६६)"—इति निघात-प्रतिषेधः ॥ १ ॥

अथ द्वितीया।

१ २ ३ १८ २८ ३ १ २

उषोअद्येहगोमत्यश्वावतिविभावरि।

३ १ ३ १ २

रेवदस्मेव्युच्छसूनृतावति ॥ २ † ॥

---

* ऋ० वे० १, ६, २६, ४। † ऋ० वे० १, ६, २६, ४।

हे "गोमति" अस्मभ्यं दातव्य-गोभिर्युक्ते ! तथा "अश्वावति" अश्वैर्युक्ते ! "विभावरि" विशिष्ट-प्रकाशोपेते ! "सूनृतावति" प्रियसत्यात्मिका वाक् सूनृता, तादृश्या वाचा युक्ते ! एवम्भूते हे "उषः" उषोदेवते ! "अद्य" इदानीं प्रभात-समये "इह" अस्मिन् देशे "अस्मे" अस्माकं "रेवत्" ["रयेर्मतौ बहुलम् (६, १, ३४ वा०)"—इति सम्प्रसारणम्, "छन्दसीरः (८, २, १५)" —इति मतुपो वत्वम्, "रे-शब्दाच्च मतुप उदात्तत्वं वक्तव्यम् (६,१,१७६ वा०)"—इति मतुपउदात्तत्वम्] धन-युक्तं कर्म्म यथा भवति तथा "व्युच्छ" नैशं तमो निवारय [उच्छी विवासे (भ्वा० प०) विवासो वर्जनम् ॥ २ ॥

अथ तृतीया।

३ १२ २२ ३ १ २ ३ २ ३ १ २
युङ्क्ष्वा*हिवाजिनीवत्यश्वाꣳअद्यारुणाꣳउषः।

१ २ ३ २ ३ १ २ ३ १ २
अथानोविश्वासौभगान्यावह ॥ ३ † ॥ ८

हे "वाजिनीवति" हविर्लक्षणान्नवति ! "उषः" उषो देवते ! "अरुणान्" अरुण-वर्णान् "अश्वान्" अश्व-स्थानीयान् गो-विशेषान् ["दीर्घादटि समानपदे (८, ३, ९)"—इति संहितायां नकारस्य रुत्वम्, "आतोऽटि नित्यम् (८, ३, ३)"—इति सानुनासिक आकारः] एवम्भूतान् "अद्य" अस्मिन् काले "युङ्क्ष्वा हि"

---

* "युङ्क्ष्व"—इति ऋ०-पाठः।

† ऋ० वे० १, ६, २९, ४।

योजयैव [हिरवधारणे] "अथ" अनन्तरं रथमारुह्य "विश्वा" सर्वाणि "सौभगानि" ["सुभगात्मत्वे (५, १, १२८ वा०)"—इत्युद्गात्रादिषु पाठात् भाव-कर्मणोरर्थयोः "प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् (५, १, १२९)"—इत्यञ् प्रत्ययः, "छन्दसि सिन्धुन्ते पूर्वपदस्य च"—इत्युभय-पद-वृद्धौ प्राप्तायां सर्व-विधीनां छन्दसि वैकल्पिकत्वात् अवोत्तरपदस्य वृद्धिर्न भवतीत्युक्तम्, सौभगानि] सर्वाणि सौभाग्यानि "नः" अस्मभ्यम् "आ वह" आनय ॥ ३ ॥ ८

॥ अध्यम् ॥ उषस्त्वा२यित्नम्। आभरोवा। अस्म
भ्यं२वा। जिनीवतायि। येननोकच्चतनयच्च। धा२३।
मद्दाउवा। गृधिया२ ॥(१) उषोअद्ये२ह। गोमतो
वा। अश्वावतायि। विभावरायि। रेवदस्मभ्युच्छन्तु।
ता२३। वताउवा। गृधिया२ ॥(२) युक्ष्वाहिवा२जि।
नोवतोवा। अश्वाएअद्या। रुणाएउषाः। अथानो
विश्वासौभगानि। आ२३। वहाउवा। गृधिया२(३)
॥ ५ * ॥ [१] ८

* ऊ० गा० १९प्र० १अ० ५षा०।

अथाश्विनावर्त्तिरिति हृत्वं हृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २ ३ १ २ २ ३ १ २
अश्विनावर्त्तिरस्मदागोमद्धिरण्यवत्।
३ १ उ ३ १ २ ३ १ २
अर्वाग्रथꣳसमनसानियच्छतम् ॥ १ * ॥

[उषसा साहचर्याद् बुद्धिस्थावश्विनाविदमादिकेन हृत्वेन स्तूयते] हे "अश्विना" अश्ववन्तौ व्यापनशीलौ वा देवौ! "दस्रा" शत्रूणामुपक्षपयितारौ "अस्मत्" अस्माकं "वर्त्ति" वर्त्तन-हेतुभूतं गृहम् "आ" समन्तात् "गोमत्" बहुभिर्गोभिर्युक्तं "हिरण्यमत्" हित-रमणीय-धन-युक्तं च यथा भवति तथा "समनसा" समान-मनस्कौ सन्तौ "युवां" युष्मदीयं "रथम्" "अर्वाक्" अर्वाचीनम् अस्मदभिमुखं "नियच्छतम्" आवर्त्तयतम् [अस्मत्—"सुपां सु-लुक् (७, १, २९)"—इति षष्ठ्या लुक्॥ १ ॥

अथ द्वितीया।

२ ३ १ २ ३ १ २ ३ १ २ २
एहदेवामयोभुवादस्रावरिणवर्त्तनी।
३ १ २ ३ १ २
उषर्बुधोवहन्तुसोमपीतये ॥ २ † ॥

---

* ऋ० वे० १, ६, २७, १।

† ऋ० वे० १, ६, २७, १।

"उषर्बुधः" उषसि प्रबुद्धा अश्वाः "इह" अस्मिन् यागे "सोमपीतये" सोम-पानाय "दस्रा" शत्रूणामुपक्षपयितारौ अश्विनौ "आ वहन्तु" आनयन्तु। कीदृशौ? "देवा" देवन-शीलौ दानादि-गुण-युक्तौ वा "मयोभुवा" मयसः आरोग्यस्य भावयितारौ ["अश्विनौ वै देवानां भिषजौ"—इति श्रुतेः] "हिरण्यवर्त्तनी" [वर्त्ततेऽत्रेति व्युत्पत्त्या वर्त्तनि-शब्देन रथ उच्यते] सुवर्णमयौ वर्त्तनिर्ययोस्तौ [देवा—इत्यादिषु त्रिषु "सुपां सु-लुक् (७, १, ३९)"—इत्याकारः॥ २॥

अथ तृतीया।

२ ३ २उ ३ २ ३ २ष ३ १ २ ३ १ २
यावित्थाश्लोकमादिवोज्योतिर्जनायचक्रथुः।

२ ३ १ २ ३ १
आनऊर्ज्जंवहतमश्विनायुवम्॥ ३ *॥ ९

हे अश्विनौ "यौ" युवां "दिवः" लोकात् "श्लोकम्" उपश्लोकनीयं प्रशंसनीयं "ज्योतिः" तेजः "इत्था" इत्थमस्माभिरनुभूयमानेन प्रकारेण "चक्रथुः" कृतवन्तौ [केषाञ्चिन्मतेन सूर्याचन्द्रमसावश्विनावित्युच्येते। तदुक्तं यास्केन—"तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके (निरु० दै० ६, १,)"—इति। तथाच प्रकाशकत्वं तयोरुपपन्नं तौ "युवं" युवां "नः" अस्मभ्यम् "ऊर्जं" बल-प्रदमन्नम् "आ वह-

* ऋ० वे० १, ९, १७, २।

तम्' आनयतं प्रयच्छतम् [श्रोत्र सङ्घाते (भ्वा० आ०), अयं स्तुत्यर्थोऽपि, कर्मणि घञ् ; ञित्त्वादादुदात्तत्वम् (६, १, १८७)] ॥ ३ ॥ ९

॥ शुध्यम् ॥ अश्विनावा२र्त्तिः । अस्मदोवा । गो
मद्द्वा । हिरण्यवात् । अर्वाग्रथ२ंसमनसानि । या२
३ । च्छताउवा । पृ२धिया२ ॥(१) एहदेवा२ । यो
भवोवा । दस्राहिरा । ण्यवर्त्तनायि । उषर्बुधोवहन्तु
सोम । पा२३यि । तयाउवा । पृ२धिया२ ॥(२) या
विच्छाश्वो२कम् । आदिवोवा । ज्योतिर्ज्जना । यचक्र
थूः । आनऊर्ज्जंवहतमश्वि । ना२३ । युवाउवा । पृ
धिया२ । ए२३हियाइ४३ । ओ२३४५ई । डा(३)॥६*॥[१]९

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्यैकोनविंशस्याध्यायस्य द्वितीयः खण्डः ॥ २ ॥

---

* ऊ० गा० १८प्र० १ष० ६मा०।

अथ तृतीये खण्डे *—

अग्निन्तम्मन्यइति तृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

३ १र २र ३ १उ ३२ ३१र २र ३ १ २
अग्निन्तम्मन्येयोवसुरस्तंयंयन्तिधेनवः।
३ १ २ ३२उ ३ १ २ ३ २ ३
अस्तमर्वन्तआशवोस्तन्नित्यासोवाजिन
१ २ ३ २ ३ १ २
इषꣳस्तोतृभ्यआभर॥ १ †॥

"तम्" अग्निं "मन्ये" स्तौमि, "यः" अग्निः "वसुः" वासकः, "यम्" "अस्तं" सर्वेषां गृहवदाश्रय-भूतत्वेन "धेनवः" गावः "यन्ति" गच्छन्ति प्रीणयितुम्, "अस्तम्" उक्त-लक्षणम् "अर्वन्तः" अरणवन्तः अश्वाः "आशवः" शीघ्र-गामिनः यन्ति, तथा "नित्यासः" नित्य-प्रवृत्तयो "वाजिनः" हविर्लक्षणान्नवन्तो यजमानाः यम् "अस्तं" यन्ति तम् मन्ये, "इषम्" अन्नं "स्तोतृभ्यः" अस्मभ्यम् "आ भर" हे अग्ने! आहर॥ १॥

अथ द्वितीया।

३ २उ ३ १ २ ३ १र २र ३ १ २
अग्निर्हिवाजिनंविशेददातिविश्वचर्षणिः।

---

* 'इषुमच्छिसामानि'—इति वि०।

† ऋ० आ० ५, १, ४, ७ (२ भा० ८६४ पृ०) = ऋ० वे० ३, ८, २२, १ = य० वे० १५, ४१।

३ २२ ३ २ १ २ २ २ ३ १ २ ३ २ १ २
अग्नीरायेस्वाभुवꣳसुप्रीतोयातिवार्य्यं
१ २ ३ २ ३ १ २
म्मिषꣳस्तोतृभ्यआभर ॥ २ * ॥

"अग्निः हि" अयमग्निः खलु "विशे" यजमानाय "वाजिनम्" अन्नवन्तं पुत्रम् अश्वम् अन्नं वा "ददाति" प्रयच्छति, "विश्वचर्षणिः" [विश्वे चर्षणयो मनुष्या रक्षणीया अर्चका वा यस्य स तथोक्तः। यद्वा, पश्यति-कर्मैतत्] सर्वस्य द्रष्टाग्निः "राये"† धनार्थिने [अथवा द्वितीयार्थे चतुर्थी (३, १, ८५) धनम्] "स्वाभुवं" सुष्ठु सर्वत्र व्याप्तम् "वार्यं" सर्वैर्वरणीयं प्रीतः सन् "याति" यमयति दातुं वा गच्छति। इषमित्यादिः पूर्ववत् ॥ २ ॥

अथ तृतीया।

२ १२ २२ ३ ३ उ ३ १ २ ३ १ २
सोअग्निर्य्योवसुर्गृणेसंयमायन्तिधेनवः।
१२ २२ ३ २ ३ १ २ १ १२ ३ २ ३
समर्वन्तोरघुद्रुवःसꣳसुजातासःसूरय
१ २ ३ २ ३ १ २
इषꣳस्तोतृभ्यआभर ॥ ३ ¶ ॥ १०

---

* ऋ० वे० ३, ८, २२, १।

† 'अग्नीराये—अव रेफ-लोपे दृ लोप इति (६, ३, १११) दीर्घः नतु द्विवचनमग्नी'—इति वि०।

‡ 'इषं इहिम्'—इति वि०।

¶ ऋ० वे० ३, ८, २९, ३=य० वे० १५,४३।

"सः अग्निः" स खल्वग्निः "यः" "वसुः" वासकः "गृणे" स्तूयते "यं" "धेनवः" "समायन्ति" होमार्थं प्रापयन्ति, "अर्वन्तः" अश्वाः "रघुद्रुवः" लघु-गमनाः* "सम्" आयन्ति, "सुजातासः" शोभन-प्रादुर्भूताः "सूरयः" मेधाविनः "सम्" आयन्ति। स खल्वग्निरिति शेषं पूर्ववत्॥ ३॥ १०

अथ महेनोअद्येति ऋचं द्वितीयं सूक्तम्,

तत्र प्रथमा।

३१२ ३१२३१ १३ २ ३१२
महेनोअद्यबोधयोषोरायेदिवित्मती।

१२ ३ १२ ३१२ ३१२
यथाचिन्नोअबोधयःसत्यअवसिवाय्ये

३२३ १ १
सुजातेअश्वसूनृते॥ १†॥

"अद्य" अस्मिन् यागदिने, हे "उषः" उषो देवि! "दिवित्मती" दीप्तिमती त्वं "नः" अस्मान् "महे" महते "राये" धन-प्राप्तये "बोधय" प्रज्ञापय प्रकाशयेत्यर्थः [सति हि प्रकाशे क्रतु-द्वारा द्रव्यस्यार्जयितुं शक्यत्वात्]। "यथा चित्" यथैव पूर्व "नः" अस्मान् "अबोधयः" अतीतेषु दिनेषु यथा बोधितवती, तद्वदद्यापीत्यर्थः। हे "सुजाते" शोभन-प्रादुर्भूते! "अश्वसूनृते"

---

* 'अथवा शीघ्रकर्मकारिणः'—इति वि०।

† ऋ० आ० ५, १, ४, ३ (१मा०८पृ८पृ०)—ऋ० वे० ४, ४, २१, १।

[अस्यार्था प्रिय-सत्यात्मिका वाग् यस्याः सा*] हे तादृशि देवि! "वाय्ये" वय्य-पुत्रे "सत्यश्रवसि" मय्यनुग्रहाणेत्यर्थः ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ २ २ १ २
यासुनीथेशौचद्रथेव्यौच्छोदुहितर्दिवः।

१ २ ३ १ १ ३ १ २ ३ १ २
साव्युच्छमह्नीयसिसत्यश्रवसिवाय्ये

२ १ ३ १ २
सुजातेअश्वसूनृते ॥ २ ॥

हे "दिवः दुहितः" सूर्यस्य पुत्रि उषः! ‡ "या" त्वं सुनीथे एतन्नामके "शौचद्रथे" शुचद्रथस्यापत्ये पूर्वं "व्यौच्छः" व्यवासयः तूष्णीमि, "सा" त्वं "सह्नीयसि" अतिशयेन बलवति "वाय्ये" वय्य-पुत्रे "सत्यश्रवसि" मयि "व्युच्छ" तमो विवासय [उच्छी विवासे (भ्वा० प०) विवासो वर्जनम्¶। शिष्टं समानम् ॥ २ ॥

---

* उदाहृतश्चैतत्पदद्वयमृषिणा पतञ्जलिना द्विनीथाङ्किके, तथाहि—"ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अईमेकारमईमोकारमधीयते। सुजाते अश्व सूनृते"—इत्यादिना आशङ्क्य, समाहितम्—"पारिषत्कृतिरेषा, तव भवतां नैवेह लोके न च वेदे अईएकारोऽईओकारो वास्तीति"। अत्र च नागेशः—'शाखविशेषाध्यायिनां समवायः परिषत् पर्षद्वा, तत्र भवा कृतिरित्यर्थः'—इति।

† ऋ० वे० ४, ४, २१, ९।

‡ 'दुहितर्दिवः—अको दुहितृभूता उषाः'—इति वि०।

¶ 'युच्छति दीप्तिं करोति'—इति वि०।

अथ तृतीया।

१ १ ३ २ ३ १ २ ३ १ २
सानोअद्याभरद्वसुर्व्युच्छादुहितर्दिवः।
२उ १ १ २ ३ १ २ ३ १ २
योव्यौच्छःसहीयसिसत्यश्रवसिवाय्ये
२ २ ३ १ २
सुजातेअश्वसूनृते॥ ३ * ॥ ११

हे "दुहितः! दिवः" "आभरद्वसु" आहृत-धना "सा" प्रसिद्धा त्वं "नः" अस्माकम् "अद्य" अस्मिन् दिने "व्युच्छ" तमो विवासय "सहीयसि!" "या उ" [उ-कारोऽनर्थकः] या त्वं पूर्वं "व्यौच्छः" "सा" अद्यापीति। शिष्टं समानम्॥ ३॥ ११

अथ प्रतिप्रियमिति तृचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २
प्रतिप्रियतमꣳरथंवृषणंवसुवाहनम्।
३ १ २ ३ २ ३ १ २ ३ २ ३
स्तोतावामश्विनावृषिःस्तोमेभिर्भूषतिप्रति
२ ३ १ २ ३ १ २
माध्वीममꣳशुतꣳस्तवम्॥ १ †॥

हे "अश्विनौ!" [एकः प्रति-शब्दोऽनुवादः] "वां" युवयोः "प्रियतमं" "रथं" "स्तोता" ऋषिः "स्तोमेभिः" स्तोमैः "प्रति

---

* ऋ० वे० ४, ४, ११, ३।

† ऋ० आ० ५, १, ३, १० (२भा० ८४२पृ०)=ऋ० वे० ४, ४, १५, १।

भूषति" अलङ्करोति। कीदृशं रथं? "तुग्र्यं" वर्धितारं फलानां, "वसुवाहनं" धनानां वाहकम् ईदृशं रथमागमनाय स्तौतीत्यर्थः। तथा "माध्वी" मधुविद्या-वेदितारौ "मम" "हवम्" आह्वानं "श्रुतं" शृणुतम् ॥ १ ॥

अथ द्वितीया।

३ १ २ ३ १२ २२ ३ १२ २२
अत्यायातमश्विनातिरोविश्वाअहꣳसना।

१३ १ २ ३ १२ ३ १ २ ३
दस्राहिरण्यवर्त्तनीसुषुम्णासिन्धुवाहसा

२ ३ १२ ३ १२
माध्वीममश्रुतꣳहवम् ॥ २ * ॥

हे "अश्विना" अश्विनौ! "अत्यायातं" सर्वान् यजमानानतिक्रम्य गच्छतम् "अहम्" ऋषिर्यथा "विश्वाः" सर्वा अस्मद्विरोधि-प्रजाः "सना" सदा "तिरः" करोमि [अथवा, 'अहं तिरः सना'—इति सम्बन्धः। प्राप्ताः विश्वाः सर्वाः क्रिया युष्मदीया अनुष्ठेयाइत्यर्थः, सना सनातनौ] "दस्रा" शत्रूणामुपक्षपयितारौ, "हिरण्यवर्त्तनी" हिरण्य-रथौ "सुषुम्णा" सुधनौ "सिन्धुवाहसा" नदीनां प्रवाहयितारौ वृष्टि-प्रेरणेन तादृशौ युवामत्यायातम् ॥ २ ॥

---

* ऋ० वे० ४, ४, १५, २।

अथ तृतीया।

२ ३ १ २ ३ १२३ १ २ ३१ २ ३२
आनो*रत्नानिबिभ्रताबश्विनागच्छतंयुवम्।

२३ १२ ३ १ २ २
रुद्राहिरण्यवर्त्तनीजुषाणावाजिनीवसू

२ ३ १ २ ३ १२
माध्वीममश्नुतꣳ हवम्॥ ३†॥ १२

हे "अश्विना" अश्विनौ! "युवं" युवां "नः" अस्मभ्यं "रत्नानि" रमणीयानि "बिभ्रता" बिभ्रतौ धारयन्तौ सन्तौ अस्मान् "आगच्छतम्"। हे "रुद्रा" रुद्र-पुत्रौ! स्तुत्यौ! वा "वाजिनीवसू" वाजिन-धनौ युवां "हिरण्यवर्त्तनी" हिरण्यरथौ "जुषाणा" यज्ञं सेवमानौ सन्तौ आगच्छतमिति। माध्वीत्यादि गतम्‡॥ ३॥ १२

इति सामवेदार्थप्रकाशे उत्तरार्चस्य एकोनविंशस्याध्यायस्य तृतीयः खण्डः॥ ३॥

———000———

* "आत्म"—इति ऋ०-पाठः।

† ऋ० वे० ४, ४, १५, ३।

‡ 'माध्वी—मधुनः सोमस्य पात्रौ'—इति वि०।

अथ चतुर्थे खण्डे—

अबोध्यग्निःसमिधाजनानामिति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १
अबोध्यग्निःसमिधाजनानाम्प्रतिधेनु

२ ३ २ ३ १ २
मिवायतीमुषासम् ।

३ १ २ ३ २ १ २ ३ १ २ ३ १ २ १ २
यङ्काइवप्रवयामुज्जिहानाःप्रभानवः

३ २ १ १ २
सस्रतेनाकमच्छ ॥ १ * ॥

अयम् "अग्निः" "जनानाम्" अध्वर्य्वादीनां "समिधा" समिद्भिः "अबोधि" प्रबुद्धोऽभूत्। "धेनुम् इव" अग्निहोत्रार्थं धेनुं प्रति यथा प्रातर्बुध्यते तद्वत्, "आयतीम्" आगच्छतीम् "उषसं प्रति" उषःकाल इत्यर्थः। अथ प्रबुद्धस्याग्नेः "भानवः" रश्मयः ज्वालाः "यङ्काः" महान्तः "वयां" शाखां "प्रोज्जिहानाः" प्रोद्गच्छन्तो वृक्षाइव [यद्वा, महान्तः प्रोज्जिहानाः स्वाधिष्ठानं त्यजन्तः भानवः] "नाकम्" अन्तरिक्षम् "अच्छ" आभिमुख्येन "प्र सस्रते" प्रसरन्ति ॥

"सस्रते"-"सिस्रते"—इति पाठौ ॥ १ ॥

---

* ऋ० सा० १, २, ३, १ (१भा० २१८पृ०)=ऋ० वे० ३, ८, १२, १।

अथ द्वितीया।

१ १ ३ १ २ ३१३ ३ १ ३ २ ३ १
अबोधिहोतायजथायदेवानूर्ध्वोअग्निः

३ १ १ ३ १ २
सुमनाःप्रातरस्थात्।

१ २ ३ १ १ ३ १ २ ३ २ ३ १
समिद्धस्यरुशददर्शिपाजोमहान्देव

२ २ १ १ २
स्तमसोनिरमोचि ॥ २ * ॥

अयं "होता" होम-निष्पादकः "अग्निः" "देवान्" यष्टव्यान् "यजथाय" यष्टुम् "अबोधि" बुध्यते। सोऽग्निः "प्रातः" काले "सुमनाः" शोभन-मनस्कः यजमानानुग्रह-बुद्धिः सन् "ऊर्ध्वः" "अस्थात्" उत्तिष्ठति। "समिद्धस्य" अस्य "रुशत्" रोचमानं "पाजः" बलं ज्वाला-लक्षणम् "अदर्शि" दृश्यते। अथ तथाभूतः "महान् देवः" "तमसः" अन्धकारात् "निरमोचि" सर्वं जगत् निरमोचयत् ॥ २ ॥

अथ तृतीया।

१ २ ३ १ २ ३१२ २२ ३ १ २ ३
यदोऽग्निरुस्रियानामजीगःशुचिरङ्क्ते

१ २ ३ १ २ ३ २
शुचिभिर्गोभिरग्निः।

---

* ऋ० वे० ३, ८, १२, २।

१र २र ३ १ २ ३ २
आदक्षिणायुज्यतेवाजयन्युक्तानां
१ १ २ ३ १ १
मूर्ध्नोअधयज्जुह्वभिः ॥ ३ * ॥ १३

"यद्" यदा "ईम्" अयमग्निः "गणस्य" सङ्घातात्मकस्य जगतः "रशनां" रज्जुमिव व्यापार-प्रतिबन्धकं तमः "अजीगः" गिरति गृह्णाति वा समिद्धो भवतीत्यर्थः। यदा "शुचिः" दीप्तः "अग्निः" "शुचिभिः गोभिः" व्यापाराप्रतिबन्धकैर्दीप्तैः रश्मिभिः "अङ्क्ते" व्यनक्ति विश्वं जगत् "आत्" अनन्तरमेव† "दक्षिणा" प्रवृद्धा "वाजयन्ती" हविर्लक्षणमन्नं प्रदातुमिच्छन्ती "जुह्वभिः युज्यते" युक्ता भवति [अथवा, दक्षिणा प्रवृद्धाज्यधारा युज्यते] तां धाराम् "उत्तानाम्" ऊर्ध्वस्थितामुपरि विस्तृताम् "ऊर्ध्वः" उन्नतः सन् "जुह्वभिः" "अधयत्" पिबति ॥ ३ ॥ १३

१ २ १ २ २
॥ औशनम् ॥ आवो। धियग्निसमिधा। जनाऽनाम्।
१ २र १ २ १र २र ३ ४ ५ १ र र
प्रतिधेनूम्। इवाय। तोमुषासाम्। यक्षाइवप्रवया
७ २ १र २ १ २ १ र २
मूत्। जिहा२३नाः। प्रभानवाः। सस्रते। ना३४३।
२ ४ १ २ १ र र २
काऽभाऽपुक्षाऽ५६ ॥(१) आवो। धिचोतायजथा। यदा

* ऋ० वे० ३, ८, १९, ३।

† 'आत् * * * आनुपूर्व्येण'—इति वि०।

२ र १र २ १ २ १ र २, ३ ४ ५
इयिवान्। ऊर्ध्वोअग्नायिः। सुमनाः। प्रातरस्थात्।
१ ७ २ १र २र १ २ १
समिद्वस्थरुषददा। शिपा२३जाः। महान्देवाः। तम
२ २ ४ १ २
सः। नाइ४३यिः। आ३मोपचाइ६५इयि ॥(२) यादीम्।
१ २ २ १ २ १ २ १
गणस्थरशनाम्। अजाइयिगा। प्रुचिरङ्गायि। प्रुचि
२, ३ ४ ५ १र र र ७
भिः। गोभिरग्नायिः। आद्दक्षिणायुज्यतेवा। जयाइ३
२ १र २र १र २ १ २ २ ४
न्ती। उत्तानाम्। ध्वोइअध। याइ४३त्। जूइङ्ग५
भाइ६५इयिः(३) ॥ ८ * ॥ [१] १३

अथेदं श्रेष्ठमिति ऋचात्मकं द्वितीयं सूक्तम्,
तत्र प्रथमा।

३ २ ७ ३ १ २ ३ २ ३ १ २
इदꣳश्रेष्ठञ्जयोतिषाज्योतिरागा
३ १ २ ३ १ २ ९ १ २
चित्रःप्रकेतोअजनिष्टविभ्वा।
२ ३ १ २ ३ २ ३ २ ३ ७
यथाप्रसूतासवितुःसवायैवा
३ २ ३ १ २
रात्र्युषसेयोनिमारैक् ॥ १ † ॥

---

* ऊ० गा० १९प्र० १ष्व० ८खा०।

† ऋ० वे० १, ८, १, १।

"ज्योतिषां" ग्रह नक्षत्रादीनां द्योतमानानां मध्ये "इदम्" उषआख्यं "ज्योतिः" "श्रेष्ठं" प्रशस्यतमम् [अस्य कोऽतिशयः ? इति चेत्, उच्यते—नक्षत्रादिकं ज्योतिस्त्वात्मानमेव प्रकाशयति नान्यत्, चन्द्रस्तु यद्यप्यन्यं प्रकाशयति तथापि न विस्पष्ट-प्रकाशः, ओषसन्तु ज्योतिर्युगपदेव सर्वस्य जगतोऽन्धकार-निराकरणेन विशेषेण प्रकाशकम् अतः प्रशस्यतममित्यर्थः। तादृग्यं ज्योतिः] "आगात्" पूर्वस्यां दिश्यागमत्। आगत्य चैतस्मिन् "चित्रः" चायनीयः, "प्रकेतः" अन्धकाराद्यतस्य सर्वस्य पदार्थस्य प्रज्ञापकः, तथा "विभ्वा" विभुर्व्याप्तः सन्* "अजनिष्ट" प्रादुरभूत्। किञ्च, "यथा" "राज्ञी" रात्रिः स्वयं "सवितुः" सूर्यसकाशात् "प्रसूता" उत्पन्ना [सूर्यो ह्यस्तं गच्छन् रात्रिं जनयति तस्मिन्ननस्तमिते रात्रे रुत्पत्त्यभावात् एवमेव रात्रिरपि "उषसे" "सवाय" उषसउत्पत्तये तदीयां "योनिं" स्थानं स्वकीयापर-भाग-लक्षणम् "आरैक्" आरेचितवती कल्पितवतीत्यर्थः [यद्वा, 'प्रसूता' रात्रि-सकाशादुत्पन्ना उषाः 'सवितुः' सूर्यस्य 'सवाय' प्रसवाय जन्मने यथा भवति एवं 'रात्रिः' अपि 'उषसे' उषसो यज्जन्म तदर्थं 'योनिं' स्वापर-भाग-लक्षणं स्थानं कृतवती। अत्र निरुक्तम्—"इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रं प्रकेतन प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्र्यादित्यस्यैवं रात्र्युषसे योनिमरिचत् स्थानम् (निरु० नै०

* 'विभ्वा—विभुर्व्याप्तः'—इति वि०।

२, १९)"—इति] श्रेष्ठम्—प्रशस्य-शब्दादातिशायनिक इष्टन् (५, ३, ५५), "प्रशस्यस्य श्रः (५, ३, ६०)"—इति श्रादेशः, "प्रकृत्यैकाच् (६, ४, ६२)"—इति प्रकृतिभावाट्टिलोपाभावः। अगात्—एते लुङि "इणो गा लुङि (२, ४, ४५)"—इति गादेशः, "गातिस्था (२, ४, ७७)"—इति सिचो लुक्। प्रकेतः—कित ज्ञाने (भ्वा० प०) अन्तर्भावित-ण्यर्थात् कर्मणि घञ्, "थाथादिना (६, २, १४४) उत्तरपदान्तोदात्तत्वम्। अजनिष्ट—जनी प्रादुर्भावे (दि० आ०) लुङि सिच इड़ागमः। विभ्वा—"वि-प्र-सं-भ्यो ड्वः सञ्ज्ञाम् (३, २, १८०)"—इति ड्व प्रत्ययः, "सुपां सुलुक् (७, १, ३९)"—इत्यादिना सोराकारादेशः, "ओः सुपि (६, ४, ८३)"—इति यणादेशस्य "न भूसुधियोः (६, ४, ८५)"—इति निषेधे प्राप्ते "छन्दस्युभयथा (६, ४, ८६)"—इति यणादेशः, व्यत्ययेनाद्युदात्तत्वम्; यद्वा, वि-पूर्वात् भवतेरौणादिको ड्वुन् प्रत्ययः, नित्वादाद्युदात्तत्वम् (६, १, १९७)। प्रसूता—सुनोतेः कर्मणि निष्ठा, "गतिरनन्तरः (६, २, ४९)"—इति गतेः प्रकृतिस्वरत्वम्। सवाय—"छन्दसि जवसवो वक्तव्यौ (३, ३, ५७ वा०)"—इति निपातनात् अच्, चित्स्वरः (६, १, १६६)। रात्री—"रात्रेश्चाजसौ (४, १, ३१)"—इति ङीष्, "यस्येति च (६, ४, १४८)"—इतीकार-लोपः। अरैक्—रिचिर् विरेचने (रु० उ०), लङि "बहुलञ्छन्दसि (२, ४, ७३)"—इति विकरणस्य लुक्, लघूपधगुणे (७, ३, ८६), "हल्ङ्याभ्यः (६, १, ६९)"—इति तिलोपः, वर्ण-व्यत्ययेन पैकारस्यैकारः (३, १, ८५)॥ १॥

अथ द्वितीया।

१२ ३११ ३२१
रुशद्वत्सारुशतीश्वेत्यागा
१२ ३१२ १२
दारैगुकृष्णासदनान्यस्याः।
३ ११ ३१२ ३२ब
समानबन्धूअमृतेअनूची
३११ ३२
द्यावावर्णच्चरतआमिनाने ॥ २ * ॥

[श्वेत्या इति उषसो नामधेयम् (निघ० १, ८, १२)] "रुशती" दीप्तासु "श्वेत्या"/श्वेतवर्णासु: "रुशद्वत्सा" रुशन् दीप्तः सूर्यो वत्सो यस्याः सा तथोक्ता [यथा मातुः समीपे वत्सः सञ्चरति एव मुषसः समीपे सूर्यस्य नित्यमवस्थानात् तद्वत्सत्वम् अथवा यथा वत्सो मातुः स्तन्यं रसं पिबन्/हरति एव मुषसोऽवश्यायाख्यं रसं पिबन्/वत्स इत्युच्यते] तादृशी मती "आगात्" आगतवती। आगतायां उषसः "कृष्णा" कृष्णवर्णा रात्रिः सदनानि" स्थानानि स्वकीयानि अहर्याम-लक्षणानि "आरैक्" आरेचितवती कल्पितवतीत्यर्थः [उ-इत्येतत्पूरणः] अपिचैते रात्रुषसौ "समानबन्धू" समानेन एकेन सूर्याख्येन बन्धुना सख्या युक्ते [यद्वा, सूर्येण सह सम्बद्धे, यथा उषा उदेष्यता सूर्येण सम्बद्धा एवं रात्रिरपि अस्तं गच्छता सूर्येण सम्बद्धा],† "अमृते"

---

* ऋ० वे० १, ८, १, २।

† 'समानबन्धू—अहोरात्रौ उषसः सकाशात् सञ्जायेते'—इति वि०।

मरण-रहिते [कालात्मकतया नित्यत्वात्] "अनूची" अनूची प्रथमं रात्रिः पश्चात् उषा इत्यनेन क्रमेण गच्छन्त्यौ [यद्वा, सूर्य-गत्यनुसारेण गच्छन्त्यौ एवम्भूते] "वर्ण" सर्वेषां प्राणिनां रूपम् "आ मिनाने" जनयन्त्यौ [यद्वा, स्वकीयं रूपं हिंसन्त्यौ, उषसा नैशं तमो निवर्त्यते, प्रकाशात्मकमुषसो रूपं रात्र्या एवं विधे सत्यौ] "द्यावा" द्योतमाने "चरतः" प्रतिदिवसमावर्त्तेते [यद्वा, द्यावानभसोऽन्तरिक्ष-मार्गेण चरतः प्रतिदिवसं गच्छतः। अत्र निरुक्तम्—"रुशद्वत्सा सूर्यवत्सा। रुशदिति वर्णनाम, रोचते र्ज्वलतिकर्मणः। सूर्यमस्या वत्समाह साहचर्याद्रस-हरणाद्वा। रुशती श्वेत्यागात्। श्वेत्या श्वेततेररिचित् कृष्णा सदनान्यस्याः कृष्णावर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णः। अथैने संस्तौति समान-बन्धू समान बन्धने अमृते अमरण-धर्माणावनूची अनू-च्यावितीतरेतरमभिप्रेत्य द्यावा-वर्णं चरतस्ते एव द्यावौ द्योत-नादपि वा द्यावा चरतस्तया सह चरत इति स्यादाभिमाने आमिन्वाने अन्योऽन्यस्याध्यात्मं कुर्वाणे (निरु० दै० २, २०)" —इति॥ श्वेत्या—श्विता वर्णे (स्वा० आ०), अस्माण्ण्यन्तात् "अचो यत् (३, १, ९७)"—इति भावे यत्, णि-लोपः, अर्शआदित्वान्मत्वर्थीयोऽच् (५, २, १२७)। अमृते अमृतं मरणमनयोर्नास्तीति बहुव्रीहौ "नमोऽरमरमित्रमृता (६, २, ११६)"—इत्युत्तरपदाद्युदात्तत्वम्। अनूची—अनुपूर्वा-दञ्चतेः "ऋत्विगित्यादिना क्विन् (३, २, ५९), "अनिदिताम् (६, ४, २४)"—इति न-लोपः, "अञ्चतेश्चोपसङ्ख्यानम् (४, १, ६ वा०)"—इति ङीप्,"अचः (६,४,१३९)"—इत्यकार-लोपे, "नो

(६, ३, १३८)"—इति दीर्घः, "अनुदात्तस्य च यत्रोदात्त-लोपः (६, १, १६१)"—इति ङीपउदात्तत्वम्, "सुपां सुलुक् (७, १, ३८)"—इति विभक्तेर्लुक्। मिनाते—मीनातेः क्रैयादिकस्य श्यानचि "मीनातेर्निगमे (७, ३, ८१)"—इति ह्रस्वत्वम् ॥ २ ॥

अथ तृतीया।

३ २उ ३ १ १ ३ २उ
समानोअध्वास्वस्रोरनन्त

३ १ २ ३ १ २
स्तमन्यान्याचरतोदेवशिष्टे।

१ २ ३ १ २ ३ २ ३
नमेयतेनतस्थतुःसुमेके

२ ३ २ १ २ २ ३ १ २
नक्तोषासासमनसाविरूपे ॥ ३ * ॥ १४

"स्वस्रोः" भगिन्योः द्यावापृथिव्योः† "अध्वा" सञ्चरण-साधन-भूतो मार्गः "समानः" एकएव येन आकाशमार्गेण उषा निर्गच्छति तेनैव रात्रिरपि, सच मार्गो "अनन्तः" अवसान-रहितः "तं" मार्गं "देवशिष्टे" देवेन द्योतमानेन सूर्येणानु-शिष्टे शिक्षिते सत्यौ "अन्यान्या"‡ एकैका "चरतः" क्रमेण गच्छतः। अपिच "सुमेके" शोभन-मेहनेन¶ सर्वेषामुत्पादकत्वा-

---

* ऋ० वे० १, ८, १, ३।

† 'स्वस्रोः—भगिन्योः द्यावापृथिव्योः अहोरात्रयोर्वा'—इति वि०।

‡ 'अन्या द्यौरिव चक्रः अन्या चरतः अन्या द्युलोकस्य अन्या पृथिव्याः'—इति वि०।

¶ 'सुमेके—संवत्सरे, दक्षिणायने रात्रेर्वृद्धिः, उत्तरायणे त्वक्षः, नक्तं रात्रिः उषाकाल-प्रभवत्वः—इति वि०।

क्षोभन-प्रजनने "नक्तोषासा" रात्रिरुषाश्च "विरूपे" तमः-प्रकाश-लक्षणाभ्यां विरूपाभ्यां युक्ते, अपि "समनसा" समान-मनस्केन ऐकमत्यं प्राप्ते सत्यौ* "न मेथेते" परस्परं न हिंस्तः, तथा "न तस्थतुः" क्वचिदपि न तिष्ठतः सर्वदा लोकानुग्रहार्थं गच्छत इत्यर्थः [अन्यान्या—"कर्मव्यतिहारे सर्वनाम्नो हे भवत इति वक्तव्यं समासवच्च बहुलम् (८,१,१२वा०)"—इत्यन्यच्छब्दस्य द्विर्भावः, "तस्य परमाम्रेडितम् (८, १, २)"—इत्याम्रेडित-सञ्ज्ञायाम्"अनुदात्तञ्च (८, १, ३)"—इत्याम्रेडितानुदात्त-त्वम्। देवग्मिष्टे—ग्मास् अनुग्मिष्टौ (अदा० प०), ग्मास्तेः कर्मणि निष्ठा, "यस्य विभाषा (७, २, १५)"—इतीट्-प्रतिषेधः, "ग्मास-हृदड्हलोः (६, ४, ३४)"—इति उपधाया इत्वम्, "ग्मासि-वसि-घसीनाञ्च (८, ३, ६०)"—इति षत्वम्, तृतीया-कर्मणि (६, २, ४८)"—इति पूर्वपद-प्रकृतिस्वरत्वम्। मेथेते—मेथतिर्हिंसार्थो भ्वादिकोऽनुदात्तेत्। सुमेके—मिह सेचने (भ्वा० प०), भावे घञ्, शोभनो मेहो ययोस्ते व्यत्ययेनककारः (३, १, ८५), उत्तरपदस्य ञित्स्वरेणाद्युदात्तत्वम् "आच्छन्दसि (६, २, ११९)"—इत्युत्तरपदाद्युदात्तत्वम्। नक्तोषासा—सुपांसु लुगिति (७, १, ३९) विभक्तेराकारः ॥ ३ ॥ १४

---

* समनसा—* * * प्रसन्न मनसावित्यर्थः'—इति वि०।

॥ औषसम् ॥ आयिदाम्। श्रेष्ठज्ञयोतिषाज्ञयो।

तेराइगात्। चित्रःप्रकायि। तोइअज। निष्ठविभ्वा।

यथाप्रसृतासवितूः। सवाइइया। एवारात्रायि। उष

ते। योइ४३। नाइयिमापुराइ५इयिक् ॥(१) रुशात्।

त्मारुशतीश्वे। तियाइगात्। आरैगका। ष्णाइस

दानानियस्याः। समानबधूअमृते। अनूइइची। द्या

वर्णाम्। बरतः। आइ४३। माइयिनापुना ई ५ ई

यः ॥(२) सामा। नोअध्वास्वसोः। अनाइन्नाः। त

न्यान्या। चरतः। देवशिष्टायि। ममेथेतेनतस्थतूः।

उमेइइकायि। नक्तोषासा। समन। साइ४३। वा

यिरु५पाइ५इयि(३) ॥ ८ * ॥ [१] १४

---

* ऊ० गा० १८प्र० १च० ८सा०।

अथाभात्यग्निरिति तृचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २३२३ १२ ३
आभात्यग्निरुषसामनीक

१२ १२ ११२ १२
मुदिप्राणान्देवयावाचोअस्थुः।

३ १ २ ३ १ २ ३ १ २
अर्वाञ्चाननूनꣳरथ्येहयातं

३ १ २१ ११२ २२
पीपिवाꣳसमश्विनाघर्ममच्छ ॥ १ * ॥

"उषसाम्"† "अनीकम्" अनीकभूतः [अनीकं मुखम्, उषसि प्रबुध्यमान इत्यर्थः] तादृगः "अग्निः" "आ भाति" दीप्यते [अथवा, उषसां मुखमाभात् दीपयति। उषः-काले ह्यग्नयः प्रतिबुध्यन्ते] किञ्च, "विप्राणां" मेधाविनां स्तोतॄणां "देवयाः" देवकामाः‡ "वाचः" स्तोत्राणि "उदस्थुः" उत्तिष्ठन्ति। यस्मादेवं तस्मात् हे "रथ्या" रथ-स्वामिनावश्विनौ!¶ "अर्वाञ्चा" अस्मदभिमुखावश्विनौ "ननम्" "अद्य" अस्मिन् याग-दिने "इह" यागे "यातम्" आयातम्। किं प्रति? "पिपीवांसं" स्वाङ्गैः

---

* ऋ० वे० ४, ४, १७, १।

† 'उषसां रश्मीनाम्'—इति वि०।

‡ 'देवयाः—देवानां प्रापणीया वाचः'—इति वि०।

¶ 'रथ्या—रथेन'—इति वि०।

परिहृतं* "घर्मं" प्रदीप्तं यज्ञं [यद्वा, 'पिपीवांसम्' आप्यायितं घर्म-चरण-रूपं सोमरसम् ; अथवा, घृतादिना 'पिपीवांसं' 'घर्मं' प्रवर्ग्यम्] "अच्छ" अभि लक्ष्य आयातम् [प्रवर्ग्यस्य मुक्तस्य विनियोगो बह्वृचानाम्]॥ १॥

अथ द्वितीया।

१२ ११२ २२ ३ २ ३ १
नमस्कृतम्प्रमिमीतागविष्ठा
२ ३२३१२ २२ ३ २
न्त्यिनूनमश्विनोपस्तुतेह।
१ २ ३ २३१ २ ३
दिवाभिपित्वेवसागमिष्ठा
१२ २२ ३ २ ३ १ २
प्रत्यवर्त्तिन्दाशुषेशम्भविष्ठा ॥ २ †॥

हे अश्विनौ! "संस्कृतं" घर्मं "न प्रमिमीतं" किन्तु "अन्ति" अन्तिके घर्म-समीपे "नूनम्" इदानीम् "इह" यज्ञे "गमिष्ठा" गन्तृतमौ युवाम् "अश्विना" अश्विनौ "उपस्तुता" उपस्तुतौ भवतं "दिवाभिपित्वे" दिवसस्यापतने प्रातःकाले "अवसा" रक्षण-निमित्तेनान्नेन सह "अवर्त्ति" वर्त्तिर्जीवनं तद्भावो अवर्त्तिस्तद्रहितं यथान्नम् "आगमिष्ठा" आगन्तृतमौ। आगत्य च "दाशुषे" हविर्दत्तवते यजमानाय "शम्भविष्ठा" सुखस्य भावयितारौ भवतः॥ २॥

* 'पिपीवांसं—पा पाने धातुः (भ्वा० प०) पिबन्तम्'—इति वि०।

† ऋ० वे० ४, ४, १७, २।

र ७ १ र १र २र १ २ १ २
साग्ना। तमे२३ना। नेदानौपायि। तिरश्चि। ना३४
२ ४
३। ता३ताप्ना६५६(३) ॥ १० * ॥ [१] १५

इति सामवेदार्थप्रकाशे उत्तरायण्यस्यैकोनविंशस्याध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

अथ पञ्चमे खण्डे—

एताउत्यादृति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

३ २ ३ २ ३ १ २ ३ १ २ ३
एताउत्या उषसःकेतुमक्रत
२ २ २ १ १ २ ३ १ २
पूर्वेअर्द्धेरजसोभानुमञ्जते।
३ १र २र २ २ ३
निष्कृण्वानाआयुधानीवधृष्णवः
२ ३ १र २र ३ १ २
प्रतिगावोरुषीर्यन्तिमातरः ॥ १ † ॥

"उ" [—इत्येतत् पदपूरणम्]। "त्याः" ता "एताः" उषसः "रजसः" अन्तरिक्ष-लोकस्य "पूर्वे अर्द्धे" प्राचीने [illegible] भागे

---

* ऋ० मा० १८प्र० १ऋ० १०सा०।

† ऋ० वे० १, ६, २४, १।

"भानुं" प्रकाशम् "अञ्जते" व्यक्तीकुर्वन्ति। "घृष्णवः" धर्षणशीलाः योद्धारः "आयुधानीव" यथासि प्रभृतीन्यायुधानि संस्कुर्वन्ति, एवं "निष्कृण्वानाः" निस्कुर्वाणाः स्व-भासा जगत् संस्कुर्वाणाः "गावः" गमन-स्वभावाः "अरुषीः" आरोचमानाः "मातरः" सूर्य-प्रकाशस्य निर्माचाः जगज्जनन्यो वा "उषसः" "प्रति यन्ति" प्रतिदिवसं गच्छन्ति। एवं विधा उषसः अस्मान् रक्षन्त्वित्यर्थः* [अत्र निरुक्तम्—"एतास्ता उषसः केतुमकृषत प्रज्ञातमेकस्या एव पूजनार्थं बहुवचनं स्यात्। पूर्वं अर्द्धेऽन्तरिक्षलोकस्य समञ्जते भानुना। निष्कृण्वाना आयुधानीव घृष्णवः। निरित्येष समित्येतस्य स्थाने। समीदेषां निष्कृतं जारिणीवेत्यपि निगमो भवति प्रतियन्ति गावो गमनादरुषीरारोचनान्मातरो भासो निर्माचयः (दै० ६, ७)"—इति। अञ्जत—करोतेर्लुङि "मन्त्रे घस (२, ४, ८०)"—इति च्लेर्लुक्। निष्कृण्वानाः—ञ्कृवि हिंसा-करणयोश्च (भ्वा० प०), अम्मात्ताच्छिलिकयानश् (३,२,१२९), धिन्वि-कृण्व्योर च (३,१,८०)"—इति उ-प्रत्ययः, "इदुपधस्य चाप्रत्ययस्य (८, ३, ४१)"—इति विसर्जनीयस्य सत्वम्, ञ्कृतुत्तरपद-प्रकृतिस्वरत्वम् (६, २, १३९)] ॥ १ ॥

---

* 'उषसः दीप्तयः केतुं ध्वजमकृत ज्ञातवत्यः पूर्वं अर्द्धं रजसां लोकानां भानुं दीप्तिं भजन्ते अथवा भानुमत्तमादित्यं निष्कृण्वानाः आकर्षयमाणाः आयुधानीव घोराणि घृष्णवः धारण-शीलाः पूर्वा दिशः प्रति गावः सर्वस्य जगतो रक्षार्थम् गावः आदित्यरश्मयः अरुषीः अहिंसिताः यन्ति पूर्वं परिक्रमन्ति मातरः'—इति वि०।

अथ द्वितीया।

१ २ ३१ ३ २ ३ १ २
उदपप्तन्नरुणाभानवोवृथा
२ २ ३ १ २ ३ १ २
स्वायुजोअरुषीर्गाअयुक्षत।
१ २ १ १ २ ३ १ २ ३ १ २
अक्रन्नुषासोवयुनानिपूर्वथा
१ २ ३ १ २ २ र
रुशन्तंभानुमरुषीरशिश्रयुः॥ २ *॥

"अरुणा" आरोचमानाः† "भानवः" ओषधस्य दीप्तयः‡ "वृथा" अनायासेन स्वयमेव "उदपप्तन्" उदगमन्¶। तदनन्तरम् उषसश्च "स्वायुजः" सुखेन रथेन योक्तुं शक्याः "अरुषीः" शुभ्रवर्णाः गाः पूर्वसुत्थितान् रश्मीन् ईदृश्यो स्ववाहन-भूताश्चतुष्पदो गा एव "अधुक्षत" अयोजयत् [उक्तञ्च—"अरुष्योगावउषसाम् (निघ० १, १५, ७)"—इति]। एवं गोभिर्युक्तं रथमारुह्य उषसः "पूर्वथा" पूर्वेष्वतीतेष्वहस्सु "वयुनानि" सर्वेषां प्राणिनां ज्ञानानि "अक्रन्" अकार्षुः उषः-काले जाते हि सर्वे प्राणिनो ज्ञानयुक्ता भवन्ति, तदनन्तरम् "अरुषीः" आरोचमानास्ता-उषसः "रुशन्तं" [रुशदिति वर्णनाम, रोचतेर्ज्वलति-कर्मणः

---

* ऋ० वे० १, ६, २४, २।

† 'अरुणाः रक्तवर्णाः'—इति वि०।

‡ 'भानवः—आदित्य-रश्मयः'—इति वि०।

¶ 'उदपप्तन्—उत्पतन्त्यादित्य-रश्मयः'—इति वि०।

(निरु० नै ६, १३)"—इति यास्कः] शुक्लवर्णं "भानुं" सूर्यम् "अग्निश्चयुः" "भानुम्" अमेवत्त तेन सहैकीभवन्तीत्यर्थः ॥ २ ॥

अथ तृतीया ।

१ २ ३ १२ ३२३ २३ १ २
अर्चन्तिनारीरपसोनविष्टिभिः

३ २ ३१२३१ २३ १२
समानेनयोजनेनापरावतः ।

२३१३ ३१२३१ २३
इषंवहन्तीःसुकृतेसुदानवे

२उ १ १२ ३२
विश्वेदहयजमानायसुन्वते ॥ ३ * ॥ १६

"नारीः" नेत्र्यः उषसः "विष्टिभिः" निर्वेशकैः स्वकीयैस्तेजोभिः "समानेन योजनेन" एकेनैवोद्योगेन "आ परावतः" आदूरदेशात् आपश्चिम-दिग्विभागात् "अर्चन्ति" नभः-प्रदेशं पूजयन्ति कृत्स्नं जगत् युगपदेव व्याप्नुवन्तीत्यर्थः† । तत्र दृष्टान्तः—"अपसो न" युद्ध-कर्मणीपेताः‡ पुरुषाः यथा स्वकीयैरायुधैर्धाटीमुखेन सर्वं देशं व्याप्नुवन्ति तद्वत् । किङ्कुर्वते ? "सुकृते" शोभनस्य कर्मणः कर्त्रे, "सुन्वते" सोमाभिषवं कुर्वते,

---

* ऋ० वे० १, ६, ३५, ३ ।

† 'समानेन योजनेन । एतदुक्तम्भवति—बहुयोजन-साध्ये पथि युष्मोकस्य भूम्नोकस्य चात्मरिश्मे, आपरावतः—दूरात्, इषि—दृष्टिं वहन्तीः आदित्य-रश्मयः'—इति वि० ।

‡ 'अपसः—उदकानि'—इति वि० ।

"सुदानवे" कल्याणीर्दक्षिणा ऋत्विग्भ्यो ददते, "यजमानाय" "विश्वे दहु" सर्वमेवेषमन्नं वहन्तीरावहन्त्यः प्रयच्छन्त्य इत्यर्थः [नारीः—"नृन्पे °(८, ३, १०), ऋदोरप् (३, ४,५७) "नृनर-योर्वाच्यश्च (४, १, ७३ ग०)"—इति ग्रार्ङ्गरवादिषु पाठात् ङीन्, जसि "वाच्छन्दसि (६, १, १०६)"—इति पूर्वसवर्ण-दीर्घत्वम्। अपसः—अपः शब्दात् "अर्शआदिभ्योऽच् (५, २, १२७)"—इत्यच् "सुपां सु-लुक् (७, १, ३९)"—इति जसः सः, व्यत्ययेन प्रत्ययात् पूर्वस्योदात्तत्वम्। विष्टिभिः—विश प्रवेशने (तु० प०), विशन्ति प्रविशन्तीति विष्टयः किरणाः "क्तिच्क्तौ च संज्ञायाम् (३, ३, १७४)"—इति क्तिच्। विश्वा—"सुपां सु-लुक् (७, १, ३९)"—इत्याडादेशः] ॥ ३ ॥ १६

२ २ १ २ २
॥ उषः ॥ एतोवा। उत्याउषसःकायि। तुम

१ १ २ २ २ १ १
क्रातार२। पूर्वेअर्द्धेरजसोभा। नुमज्जातार२यि। निष्कृ

२ २ २ २ २ १ . १ १ ४
एवावानाआयुधानायि। वधूष्णावार२३ः। प्राताइयिगा

५ १ १ १ २ ४
वाः। अरुषायिर्य्या२३। तायिमाइताप्रा ६ ५ ६ः ॥(१)

२ १ २ २ १ १ २ २
उदोवा। अपप्नन्नरुणाभा। नवोवार्या२। स्वायुजो

२ २ १ १ २ २
अरुषीर्गाः। अयुक्षाता२। अक्रन्नुषासोवयुना। नि

२१ १२ ४५ २१ १९
पूर्वाथा२३। कृणा३न्ताभ्मा। नुमरुषा२३यिः। आशा
४ २१ २२ २
३यिश्रा५यू६५६ः ॥(२) अर्चीवा। जिनारीरपसो। न
१ १२२२ २२१
विष्टायिभा२यिः। समानेनयोजनेना। परावाता२ः।
१ २ २१ १२४
दूषन्वहन्तीःसुक्रतायि। सुदानावा२३यि। वायिश्वेइदा
५ २१ १२४
हा। यजमाना२३। यास्व३न्वा५ताई५६यि(३) ॥१६*॥[१]१६

अथाबोध्यग्निर्जमदग्नि इति त्रयाणामकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१२ ३१२ २२३२३
अबोध्यग्निर्जमदग्निरर्च्यो
१ २ ३१ ३क१२ ३१२
व्यू३षाश्चन्द्रामघ्नावोअर्चिषा।
१२ ३२३ १२३१३
आयुञ्चातामश्विनायातवेरथ
१२ ३१ २३ २उ ३१२
म्प्रासावीद्देवःसविताजगत्पृथक् ॥ १ † ॥

---

* ऋ० गा० १८प्र० १अ० १६सा०।

† ऋ० वे० २, २१, १।

अयम् "अग्निः" निहतः सन् "उमः" उमायाः पृथिव्याः वेदि-लक्षणाया सम्बन्धी सन् "अबोधि" प्रबोधितः। किञ्च, "सूर्यः" "उदेति"। ततो "महो" महती "उषाः" "अर्चिषा" प्रकृष्टेन तेजसा "चन्द्रा" प्राणिनामाह्लादनी सती "वि आवः" व्याहृणोत् तमांसि निवारयति स्म [हृणोतेर्लुङि "मन्त्रे घस (२, ४, ८०)"—इति च्लेर्लुक्. "छन्दस्यपि दृश्यते (६,४,७३)"—इत्याडागमः] यतश्चयमुषा उदेति यतश्चायमग्निः प्रबुद्धो भवति अतः कारणात् हे अश्विनौ युवयोः सम्बन्धिनं "रथं" "यातवे" देव-यजन-गमनाय राभ्याम् "आ युञ्जताम्" युञ्जाथाम्। तथा "सविता" सर्वकर्मणोऽनुज्ञाता "देवः" "जगत्" जङ्गमं प्राणिजातं "पृथक्" स्व-स्व-कर्मानुरोधेन "प्रासावीत्" प्रसुवतु अनुजानातु ॥ १ ॥

अथ द्वितीया।

२ ३ २ ३ १ २ ३ १ २
यद्यु ञ्जाथे वृषणमश्विना रथ

३ १ २ ३ १ २ ३ १ २
घृतेननो मधुना क्षत्रमुक्षतम्।

३ २ ३ २ ३ १ २
अस्माकम ब्रह्म पृतनासु जिन्वतं

३ १ उ ३ १ २
वयन्धनाप्सुषदो वाजिनीवति ॥ २ * ॥

---

* ऋ० वे० २, १, २१, २।

हे "अश्विना" अश्विनौ! "यद्" यदा "हवणं" हव्यादि-वर्षकं "रथं" "युञ्जाथे" योजयथः, तदा "नः क्षत्रं" अस्मदीयं बलं क्षत्रिय-जातिर्वा* "घृतेन" उदकेन "मधुना" मधुरेण "उक्षतं" सेचयतं प्रवर्द्धयतमित्यर्थः [यद्वा, 'घृतेन' क्षरण-रूपेण "मधुना" अमृतेन "उक्षतम्" युष्मद्रथस्थेनामृतेनास्मदीयं बलं प्रवर्द्धयतमित्यर्थः। अश्विनोः रथस्य मधुपूर्णत्वं "मधुवाहनो रथः" —इत्यादिषु प्रसिद्धम्]। किञ्च, अस्माकं "पृतनासु" अस्मदीयासु पुत्र-भृत्यादि-मनुष्यरूपासु प्रजासु "ब्रह्म" तेजः† "जिन्वतम्" [यद्वा, 'पृतनासु' परकीयासु 'ब्रह्म' परिवृढ़मन्नमस्माकं जिन्वतं प्रीणयतम्]। वयञ्च "शूरसातौ" शूराणां प्रहारादि-दान-युक्ते सङ्ग्रामे "धना" तदीयानि धनानि बहुविधानि "भजेमहि" ॥२॥

अथ तृतीया।

२१ २११ २११ २३१२
अर्वाङ्त्रिचक्रोमधुवाहनोरथो
३१२ ३१२ ३१२
जीरास्रोअश्विनोर्यातुसुष्टुतः।
३ २३१२ ३१२ ३
त्रिवन्धुरोमघवाविश्वसौभगः
२३१२ २२३१२
ओन्नआवच्चद्द्विपदेचतुष्पदे ॥ ३ ‡ ॥ १७

---

* 'क्षत्रं—मदीयं राष्ट्रम्'—इति वि०।

† 'ब्रह्म अन्नम्'—इति वि०।

‡ ऋ० वे० १, ३, २७, ३।

"अर्वाङ्" अस्मदभिमुखः अश्विनोः "रथः" "यातु" अस्मदभिमुखो गच्छतु। कीदृशः? "त्रिचक्रः" चक्र-त्रय-युक्तः, "मधुवाहनः" मधु-वोढा, "जीराश्वः" शीघ्रगाम्यश्वोपेतः,* "सुष्टुतः" अतएवास्माभिः स्तूयमानः, "त्रिवन्धुरः" निम्नोन्नत-काष्ठ-त्रयोपेतः सारथ्याश्रय-स्थानं वन्धुरं तद्युक्तः,† "मघवा" धनवान्, "विश्वसौभगः" सर्व-सौभाग्योपेतः। ईदृशोऽश्विनोः रथः "नः" अस्माकं "द्विपदे" पुत्रादि-प्रजायै "चतुष्पदे" पशवे च "शं" सुखम् "आ वक्षत्" आहवतु वहेर्लिटि अड़ागमः॥ २॥ १७

॥ कावम्॥ अबोवा। धियग्निर्मउदायि। तिस्र
रायाः। व्युषाश्चन्द्रामह्या। वोअर्चायिषा। आ
युक्षातामश्विनाया। तवेराथाश्म्। प्रासावीद्वोवः
सवायिताश्। जागाश्त्यापूर्याईयुईक्॥(१) यद्योवा।
जाथेवृषणमा। श्विनाराथाम्। घृतेननोमधुनाक्ता।
चमुक्षाताम्। अस्माकम्ब्रह्मपृतना। सुजिग्याताश्म्।
वायाश्न्धाना। पुरुसाताश्। भाजाश्यिमापुष्टाईयुई

---

* 'जीराश्वः—यजमान-पशवोऽपि वै जीराः अथवा जीरक-वर्णाः'—इति वि०।

† 'त्रिवन्धुरः—ईषा-चयेऽक्षाश्रयेतः'—इति वि०।

यि॥(२) अर्वावा। त्रिचक्रोमधुवा। हनोरार्था२।
जीराश्वोअश्विनोर्या। तुग्रष्टूता२ः। त्रिबन्धुरोमघवा
वायिश्विसौभागा२३ः। ग्नाश्चा३श्रावा। स्वद्विपादा२३
यि। चात्व३ष्यापुदा६५६यि(३)॥ १७ *॥ [१] १७

अथ प्रतेधाराअसंश्चतदृति चतुर्ऋचं तृतीयं सूक्तम्,

तत्र प्रथमा।

प्रतेधाराअसश्चतोदिवोनयन्तिवृष्टयः।
अच्छावाजꣳसहस्रिणम्॥ १ †॥

"हे सोम! "ते" तव "असश्चन्तः" सङ्ग-रहिताः "धाराः" सहस्रिणम् अपरिमित-सङ्ख्याकं "वाजम्" अन्नं लक्षणं अस्मदर्थं "प्र यन्ति" प्रगच्छन्ति। तत्र दृष्टान्तः—"दिवो न वृष्टयः" यथा द्युलोकाद् वर्षधारा निःसङ्गाः प्रजानामपरिमितमन्नं प्रतियन्ति तद्वदित्यर्थः॥ १॥

---

* छ० मा० १८म० १अ० १७सा०।
† ऋ० वे० ७, १, १४, १।

अथ द्वितीया।

३ २ ३ १ १२ ३ २ ३ १२
अभिप्रियाणिकाव्याविश्वाचक्षाणोअर्षति।
१ २ ३ १र २र
हरिस्तुञ्जानआयुधा ॥ २ * ॥

"हरिः" हरित-वर्णः सोमः "विश्वा" विश्वानि "प्रियाणि देवानां प्रीति-कराणि "काव्या" कर्माणि† "चक्षाणः" पश्यन् "आयुधा" स्वकीयान्यायुधानि‡ "तुञ्जानः" राक्षसान् प्रति प्रेरयन् "अभ्यर्षति" यागं प्रति गच्छति ॥ २ ॥

अथ तृतीया।

१ २ ३ २ ३ २ ३ २ ३ १ २ ३१
समर्म्मृजानआयुभिरिभोराजेवसुव्रतः।
३ १र २र
श्येनोनवसुषीदति ॥ ३ ¶ ॥

"सुव्रतः" सुकर्मा "सः" सोमः "आयुभिर्मनुष्यैर्ऋत्विग्भिः "मर्म्मृज्यमानः" "इभः" गत-भयः "राजा इव" यथा राजा, "श्येनो न" यथा श्येनः, तथा "वसु" केषु वसतीवरीषु "सीदति" ॥ ३ ॥

---

* ऋ० वे० ७, १, १४, २।

† 'काव्या—कविर्वे नः'—इति वि०।

‡ 'आयुधा—आयुधानि द्रोण-कलश-प्रक्षरणानि सह-चमस-पर्यन्तानि'—इति वि०।

¶ ऋ० वे० ७, १, २४, २।

अथ चतुर्थी ।

२ ३ १ २ ३ २उ ९ १ २ ३ १र २र
सनोविश्वादिवोवसुतोपृथिव्याअधि ।
३ १ २ ३ १ २
पुनानइन्दवाभर ॥ ४ * ॥ १८

हे "इन्दो" सोम !, "पुनानः" पूयमानस्त्वं "दिवः अधि" "पृथिव्याः" अधि पृथिव्यां स्थितानि [अधीति सप्तम्यर्थानुवादी] "विश्वा" विश्वानि "वसु" वसूनि धनानि "नः" अस्मभ्यम् "आ भर" आहर ॥ ४ ॥ १८

इति सामवेदार्थप्रकाशे उत्तरार्चस्यैकोनविंशस्याध्यायस्य
चतुर्थः खण्डः ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ १८ ॥

॥ इति अष्टमः प्रपाठकः ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्येण विरचिते माधवीये सामवेदार्थप्रकाशे
उत्तरार्चस्य जनविंशोऽध्यायः†
समाप्तः ॥ १८ ॥

---

* ऋ० वे० ७, १, २४, ४ ।

† 'अष्टमः प्रपाठकः समाप्तः'—इति वि० सर्व-सम्मतम् ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ २० ॥

॥ अथ विंशोऽध्याय आरभ्यते ॥

तत्र,

प्रथमे खण्डे —

प्रास्यधारेति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा ।

२ ३ १ २ ३ १ २ ३१२ २१
प्रास्यधारा अक्षरन्वृष्णः सुतस्यौजसः* ।
३१२ १२३१२
देवाँ अनु प्रभूषतः ॥ १ † ॥

"अस्य" सोमस्य "धाराः" "ओजसः" ओजसा बलेन‡ "अक्षरन्" असिञ्चन् । कीदृशस्य ? "वृष्णः" वर्षुकस्य "सुतस्य" अभिषुतस्य "देवान्" "अनु" "प्रभूषतः" भवितुमिच्छतः¶ ॥१॥

---

* 'ओजसा'—इति ऋ० पाठः ।

† ऋ० वे० ९, ८, १९ १ ।

‡ अत्र 'दौर्य-पाठमनुसृत्यैवं हतोयान्त-विपरिणामेनेयं व्याख्या । भिवरचकारस्तु यज्ञाभ्यामेव व्याचष्टे—'दीर्य-सत्यग्रह्य'—इति ।

¶ 'देवान् प्रभूषतः—देवान् पूजयंतः'—इति वि० ।

अथ द्वितीया।

१ २ ३१२ ३१२ ३ १२ ३१
सन्निम्मृजन्तिवेधसोगृणन्तःकारवोगिरा।

१ २ ३२३क १२
ज्योतिर्ज्जज्ञानमुक्थ्यम्॥ २ *॥

"सन्निम्" अश्व-स्थानीयं सर्पण-स्वभावं वा सोमं "मृजन्ति" शोधयन्ति। के? "गृणन्तः" स्तुवन्तः "कारवः" कर्म-कर्त्तारो ऽध्वर्युादयः "गिरा" स्तुत्या साधनेन। कीदृशं सन्निम्? "ज्योतिः" दीप्यमानं सोमं "जज्ञानं" जायमानं प्रवृद्धमित्यर्थः [अथवा ज्योतिर्जायमानम् "अयं वै ज्योतिर्यत्सोमः"—इति श्रुतेः] "उक्थ्यं" स्तुत्यम्॥ २॥

अथ तृतीया।

३१२ ३१२ ३१२
सुषहासोमतानितेपुनानायप्रभूवसो।

१२ ३१२
वर्द्धासमुद्रमुक्थ्य†॥ ३ ‡॥ १

हे "सोम!" "उक्थ्य" स्तुत्य! "प्रभुवसो" प्रभूत-धन! "पुनानाय" पूयमानस्य "ते" तव "तानि" तेजांसि "सुषहा" शोभनाभिभावुकानि। यस्मादेवं तस्मात् "समुद्रं" समुद्र-सदृशं तं "वर्द्ध" वर्द्धय रसेन पूरयेत्यर्थः॥ ३॥ १

---

* ऋ० वे० ९, ८, १९, १।

† "उक्थ्यम्"—इति ऋ०-पाठः।

‡ ऋ० वे० ९, ८, १९, २।

अथैषेति द्विपदं द्वितीयं सक्तम्,*

तत्र प्रथमा।

२ २ २ २उ २ २ २२ २ १ १ २ २ २

एषब्रह्मायऋत्वियइन्द्रोनामश्रुतोगृणे ॥ १ † ॥

"यः" "इन्द्रः"—इति "नाम" "श्रुतः" देव-समूहैः प्रख्यातः "एषः" "ऋत्वियः" ऋतौ वसन्तादौ काले भवः य एषः "ब्रह्मा" सर्वतः परिवृढः, तमहं "गृणे" स्तौमि ॥ १ ॥

अथ द्वितीया।

१२ २२ २ २ २ २१ १ २ १ २

त्वामिच्छवसस्पतेयन्तिगिरोनसंयतः ॥ २ ‡ ॥

हे "श्रवसः" बलस्य "पते" पालकेन्द्र! [अतिशयेन बलवन्नित्यर्थः। तथा शाखान्तरे बलेनोत्पत्तित्वं श्रूयते—"उरसो बाहुभ्यां पञ्चदशं निरमिमीत, तमिन्द्रो देवतान्वि सृज्यते"—इत्यारभ्य "तस्मात्ते वीर्यवत्तमः"—इति श्रुतेः] "त्वामित्" त्वामेव "संयतः" न सम्यङ् नियच्छतः पुरुषस्येव वेदस्य सम्बन्धिनः "गिरः" स्तुतयः "यन्ति" प्राप्नुवन्ति ॥ २ ॥

अथ तृतीया।

२ २ २ २ २ २२

विश्रुतयोयथापथः० ॥ ३ ¶ ॥२

---

* 'आत्मात् प्रभृत्यनिप्राप्तविघ्नाजि'—इति वि०।

† ऋ० मा० ५, २, १, २ (मा० ८८५पृ०)।

‡ मेधात्यर्थ आपि इश्यते।

¶ ऋ० मा० ५, २, २, ० (२मा० ९०४पृ०।

—इत्यृचः प्रतीकम्, तस्यादितो व्याख्यानं छन्दसि द्रष्टव्यम्

॥ ३ ॥ २

॥ कालेयम् ॥ एषा३ब्राह्मा। या२३:। आ३। त्वा २३। या:। इन्द्रोनामौ। वा३४३ओ३४वा। श्रुतोपू गृणायि ॥(१) तुवा३मायिच्छा। वा२३। सा३:। पा२ ३। तायि। यन्तायिगिरौ। वा३४३ओ३४वा। न सापूयता: ॥(२) विसू३तायाः। या२३। था३। पा२ ३। था:। इन्द्रात्वद्यौ। वा३४३ओ३४वा। तुराषूत या:। होपूई। डा ३) ॥ ८ * ॥ [१] २

अथात्वारथमिति द्वयं तृतीयं सूक्तम्,

तत्र प्रथमायाः।

आत्वारथंययोतये० ॥ १ † ॥

---

* ऋ० मा० २१प्र० १ब० ८या०।

† ब० श्रा० ४, १, २, १ (१भा० ७२१पृ)=ऋ० वे० ६, ३, १, १।

[—इति प्रतीकमत्र पठ्यते। तत्रापि आख्याता।] हे इन्द्र! "त्वा" त्वां वयम् "आवर्त्तयामसि" आवर्त्तयामः। किमर्थम्? "जतये" अस्माकं रक्षणाय "सुखाय" सुखाय च। किमिव? "रथं यथा" जतये सुखाय चावर्त्तयति तद्वत्। कीदृशं त्वाम्? "तुविकूर्मिम्" बहु-कर्माणम् "ऋतीषहं" हिंसकानामभिभवितारम्। हे इन्द्र! "गविष्ठ" अतिशयेन बलवन्! हे "सत्पते" सतां पालक! त्वामिति समन्वयः॥ १॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ १ ३ १ २
तुविशुष्मतुविक्रतोशचोवोविश्वयामते।

१ २ ३ २
आपप्राथमहित्वना॥ २ *॥

हे "तुविशुष्म" प्रभूत-बल! अतएव "तुविक्रतो" बहु-विचित्र-कर्मवन्! [अथवा बहुप्रज्ञ! कर्मणः पृथगभिधानात्] हे "शचीवः" बहुकर्मोपेत! पूजनीयेन्द्र! "विश्वया" विश्वव्यापिन "महित्वना" महत्वेन "आ पप्राथ" आपूरितवानसि अविशेषाद् विश्वमित्यर्थः॥ २॥

अथ तृतीया।

१ २ ३ १ ३ १ २ ३ १ १ ३ १ २
यस्यतेमहिनामहःपरिज्मायन्तमीयतुः।

३ १ १ ३ १ २
हस्तावज्रंहिरण्ययम्॥ ३ †॥ ३

---

* ऋ० वे० ६, ५, १, २। † ऋ० वे० ६, ५, १, १।

"महः" महतः "यस्य" "ते" तव [यच्छब्दः प्रकृत-परामर्शी, प्रकृत-सूक्तमृग्द्वयं तत्रत्य-तुविकूर्मिस्तोषदमित्याद्युक्त-लक्षणस्य तव] "महिमा" महत्वेन "हस्ता" तव हस्तौ "उमायन्त" पृथिव्यां सर्वतो व्याप्नुवन्तं "हिरण्ययं "वज्रम्" हस्तौ "दीयतुः" परिगृह्णीतः, सर्वदास्माकं भय-निवारणायेति भावः ॥ २ ॥ ३

आयःपुरमिति दृचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा ।

२३ १ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २ १ २

आयःपुरन्नार्मिणीमदीदेदत्यःकविर्नभन्योऽनार्वा ।

२ ३ १ २ ३ २ ३ १ २

खरोनरुक्काञ्छतात्मा ॥ १ † ॥

"यः" अग्निः "नार्मिणीं" नर्मवतां यजमानानां सम्बन्धिनीमुत्तरवेदिं‡ [यद्वा नृणां मनसि स्थितां यजमानानां यज्ञार्थंभूमिं प्रत्यवागमन-मनीषा विद्यते ताम्] "पुरः" तत् स्थानं "अदीदेदत्" दीपयति । कीदृशोऽयम् ? "अत्यः" अपेक्षितदेशं प्रत्यतनशीलः, "कविः" क्रान्तदर्शी । तत्र दृष्टान्तः— "अर्वा" अरण-कुशलः, "नभन्यः न" नभस्याकाशे भवः नभ-

---

* विवरण-मते—"दक्षावज्रम्" समास-निष्पन्नमेकपदम्, अतएव 'दक्षावज्रं'—दक्षे यस्य वज्रं विद्यते स दक्षवज्रः, छान्दसं दीर्घत्वं वज्र-शब्दस्य'—इति सङ्गच्छते। परमेतदुपेक्ष्यं पद-पञ्च-विरोधात् स्वरशास्त्र-विरोधाच्च।

† ऋ० वे० २, २, १८, १।

‡ 'नार्मिणीं—नृणां सुखम् सुखकरोममरावतीम्'—इति वि०।

न्यो वायुरिव*। किञ्च, "अतात्मा" यजमान-गृहापेक्षया वा अपरिमित-रूपत्वम् [अथवा मित्र-वरुणादि-रूप-भेदेन। अग्नेर्मित्रादि-रूपत्वं 'त्वमग्ने वरुणोऽजायत'—इति, हे अग्ने! त्वं वरुणो जायसे वरुणो भवति; यत् यस्मात् "इन्द्रं मित्रं वरुण मग्निमाहुः"—इत्यादिषु-श्रुतिषु प्रसिद्धम्, अग्निमेव इन्द्रादयात्मक माहुरिति द्वितीयमन्त्रस्यार्थः] तादृशोऽयं "सूरो न" सूर्यइव "रुरुक्वान्" दीप्यमानः [रुच् दीप्तौ (भ्वा० आ०), छान्दसस्य लिटः क्वसुः] अतस्तादृशोऽग्निरस्मि उत्कृष्टो वर्त्तत इति पूर्ववान्वयः॥ १॥

अथ द्वितीया।

३ २ १ २ ३ १ १ २ ३
अभिद्विजन्मात्रीरोचनानि

२ ३ १ २ १ १
विश्वारजाꣳसिशुशुचानोअस्थात्।

२ ३ १ २ २ १ २ १ २
होतायजिष्ठोअपाꣳसधस्थे॥ २†॥

अयमग्निः "द्विजन्मा" द्वाभ्यामरणिभ्यां जायमानः‡ यद्वा, मथनात् प्रथमं जन्म, उत्पत्त्यनन्तरम् आधान-पवमानेष्ट्यादि-संस्कार-रूपं द्वितीयं जन्म, एवं द्विजन्मत्वम् [अथवा, द्यावा पृथिवीभ्यामुत्पन्नत्वात्, तादृशोऽग्निः] "त्रीरोचनानि" त्रीणि

---

* 'मन्यः—मन्दनीयः मन्यते केनचित्'—इति वि०।

† ऋ० वे० २, २, १८, ४।

‡ 'द्विजन्मा—कृतोपनयन-संस्कारः'—इति वि०।

रोचमानानि चित्यादि-स्थानानि गार्हपत्यादीनि वा "शुशुचानः" प्रकाशयन् न केवलं नीरेव किन्तु "विश्वा" "रजांसि" सर्वाण्यपि रञ्जनात्मकानि चित्यादि-लोकान् "शुशुचानः" दीपयन् "होता" देवानामाह्वाता "यजिष्ठः" यष्टृतमः सन् "अपां" प्रीणयित्रीणामुदकानां "सधस्थे" सह-स्थाने याग-देशे "अस्थात्" तिष्ठति ॥ २ ॥

अथ तृतीया।

३ २ १ २ १ २ ३
अयꣳसहोतायोद्विजन्मा

१ २ ३ १ २ २ ३ २
विश्वादधेवार्याणिअस्या।

२ ३ १ १ ३ १ १ ३ १ २
मर्तोयोअस्मैसुतुकोददाश ॥ ३ * ॥ ४

"द्विजन्मा" "सः" एव "होता" होम-निष्पादकः [आह्वाता वा देवानाम् अरणीभ्यामुत्पन्नस्यैव गार्हपत्य-द्वारा आहवनीयत्वात्] सोऽयं "विश्वा" विश्वानि "वार्याणि" वरणीयानि कर्माणि [ईड-ह्वन्द्-ह्व-ग्रंस-दुहाण्यतः (६, १, २१४)"—इत्याद्युद्दात्तत्वम्] "अवस्या" अवनस्यया [अवो हविर्लक्षणं यज्ञो वा तदिच्छाया अवः-शब्दात् क्यजन्तात् "अ प्रत्ययात् (३,३,१०२)" इति भावे अ-प्रत्ययः] अन्नाय यज्ञाय वा "दधे" धारयति। "अस्मै" उक्त-स्वरूपायाग्नये "यः" "मर्त्यः" "ददाश" ददाति स "सुतुकः" शोभन-पुरो भवति ॥ ३ ॥ ४

* ऋ० वे० २, २, १८, ५।

॥ साकमश्वम् ॥ आयःपू३रन्नार्म्मिणी३मा। दीदे
दत्यःकविर्न्नभन्योनार्वा३रुहू। रोना३रुरुहू। काञ्छा३२हा३
४३यि। ता३२३४त्मो३ऽहायि ॥(१) अभिदा३यिजन्मा३नी३रो।
चनानिविश्वारजाꣳसिप्रुप्रुचानोअस्थाद्दो३ता। यजा३२
यिष्ठोआ। पाꣳसा३२३चा३४३यि। धा३२४स्थो३ऽहायि ॥(२)
अयꣳसा३होतायोदा३यिजा। न्माविश्वादधेवार्य्याणिअ
वस्यामर्त्ती३याः। असा३२यिसुतू। कोदा३२३चा३४३यि।
दा३२३४स्थो३ऽहायि(३) ॥ ६ * ॥ [१] ४

अथाग्नेतमद्याश्वमिति † द्व्यात्मकं पञ्चमं सूक्तम्,

तत्र प्रथमा।

अग्नेतमद्याश्वन्नस्तोमैःक्रतुन्नभद्रꣳहृदिस्पृशम्।
ऋध्यामात्वोहैः ॥ १ ॥

---

* ऊ० गा० २१५० २अ० ६मा०।

† ऋ० मा० ५, १, ५, ८ (१ मा० ८८० पृ०)=ऋ० वे० ३, ५, १०, १=य० वे० १५, ४४।

हे "अग्ने!" "अद्य" अस्मिन्नहनि वयमत्विगादयः "ओहैः" इन्द्रादि-प्रापकैरस्माकं स्तोमैः स्तोत्र-समूहैः "तम्" प्रसिद्धं त्वाम् "ऋध्याम" समर्धयाम। कीदृशं त्वाम्? "अश्वं न वोढारम्" अश्वमिव हविषो वाहकम्, "क्रतुं न" कर्त्तारमिव उपकारिणमित्यर्थः। तथा "भद्रं" भजनीयं "हृदिस्पृशं" हृदयङ्गमम् अतिशयेन प्रियमित्यर्थः॥ १॥

अथ द्वितीया।

१ ३क १२ ३ १ २ ३ १ २ ३ १ २
अधाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसाधोः।

३ २ ३ १ २ ३ १ ३ १ २
रथीर्ऋतस्यबृहतोबभूथ॥ २*॥

"अधा हि" इदानीमेव हे "अग्ने!" "क्रतोः" अस्मदीयस्य "रथी" नेता "बभूथ" भवसि ["छन्दसि लुङ्लङ्लिटः (३, ४, ६)"—इति भवतेर्वर्त्तमानार्थे लिटि सिपस्थल्, "आर्धधातुकस्येड्वलादेः (७, २, ३५)"—इतीड़ागमे प्राप्ते "बभूथाऽततन्थ (७, २, ६४)"—इति निपातनादिड़भावः। कीदृशस्य यागस्य? "भद्रस्य" भजनीयस्य†, "दक्षस्य" प्रवृद्धस्य‡, "साधोः" अभीष्ट-फलानां साधकस्य सत्यभूतस्य, "बृहतः" महतः॥ २॥

---

* ऋ० वे० ३, १०, २=य० वे० १५, ४५।

† 'भद्रस्य—शोभनस्य'—इति वि०।

‡ 'दक्षस्य—यजमानस्य'—इति वि०।

अथ तृतीया ।

३ १ १ ३ १र १र २ २ १र १र
एभिर्नो अर्कैर्भवा नो अर्वाक् स्वा३र्ण ज्योतिः ।

२ ३ १ २ ३ १ १ १ २
अग्ने विश्वेभिः सुमना अनीकैः ॥ ३ * ॥ ५

हे "अग्ने!" "ज्योतिः" ज्योतिष्मान् "स्वः न" सूर्यइव,† तथा "विश्वेभिः" विश्वैः समस्तैः "अनीकैः" तेजोभिः "सुमनाः" शोभन-मनस्कत्वं "नः" अस्मदीयैः "एभिः" एतैः "अर्कैः" अर्चनीयैः स्तोत्रैः नानाविधैः हविर्लक्षणैः अन्नैर्वा [अथवेन्द्रादि-देवैः सह नोऽस्माकम्] "अर्वाक्" अभिमुखो भवेतिः ‡ ॥ ३ ॥ ५

५ २ १ ४ र ५ ५ १र र
॥ साकमश्वम् ॥ अग्ने ता३मद्या३श्वा३न्ना । स्तोमैः क्रतु

१ २ १ २ २
अभद्र३या२र्द्धाय । स्पृशा२मृध्या । माता२३हा३ ४ ३

१ ५ ५ ५ र १र ४ र ५ ५
यि । ओ२३४हो३ वाय ॥(१) अधा ह्या३ग्ने क्रतो३र्भा ।

१ र र १ १ १ र
द्रस्यदक्षस्य साधोरथा२यिरा । तस्या२३वृधा । तोवा२३

२र १ ५ ५ ५र १ ४र ५
वा३ ४ ३यि । भू२३४थो३ वाय ॥(२) एभिर्नो३ अर्कैर्भवा

---

* ऋ० वे० ३, ५, १०, ३=य० वे० १५, ४९ ।

† 'स्वर्ज्योतिः—न-शब्दउपमार्थीयः । यथा स्वर्ग-लोकस्य आदित्यो ज्योतिः तद्वत् मनस्य लोकस्य ज्योतिर्भव'—इति वि० ।

‡ 'अर्वाक्—मनोवे'—इति वि० ।

५ १ २ २ १ २२ १
नाः। अर्वाङ्सर्णज्योतिरग्रा२यिवायि। अ्वेभा२यिःसु

२ २२ १ ५ ५
मा। नाआ२३ङा३४३यि। ना२३४यिकोऽङायि

(३)॥ ७ *॥ [१] ५

इति सामवेदार्थप्रकाशे उत्तरग्रन्थस्य विंशस्याध्यायस्य

प्रथमः खण्डः॥ १॥

——०००——

अथ द्वितीये खण्डे—

अग्नेविवस्वदिति प्रगाथात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

२१ ११ १ १ १ १ १२ २२
अग्नेविवस्वदुषसश्चित्रंराधोअमर्त्य।

१ १ १ १ १ २ २ २ २१ १ २ १ १
आदाशुषेजातवेदोवहात्वमद्यादेवाँउषर्बुधः॥ १ †॥

हे "अग्ने!" त्वम् "उषसः" उषोदेवतायाः सकाशात् "राधः" धनं "दाशुषे" हविर्दत्तवते यजमानाय "आ वह" आहवनीयं प्रापय। सोऽग्निर्विशिष्यते—"अमर्त्य" मरण-रहित!

---

* ऋ० मा० २१अ० २ब० ७सा०।

† ब० सा० १, १, ४, ६ (१ मा० १५८पृ०)=ऋ० वे० १, १, २८, १।

"जातवेदः" जातानां वेदितः! [तमेतं शब्दं यास्को व्याचष्टे—"जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुर्जातेजाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति च (निरु० दै० १, १८)"—इति। कीदृशं राधः? "विवस्वत्" "विशिष्ट-निवासोपेतं, "चित्र" नानाविधं। किञ्च, "अद्य" अस्मिन् दिने "उषर्बुधः" उषःकाले प्रबुद्धान् देवानावह[विवस्वत्—विवासनं विवः तदुक्तम्, वस निवासे (भ्वा० प०), वि-पूर्वादन्तर्भावित-ण्यर्थात् सम्पदादि-लक्षणो भावे क्विप् (३,३,९४वा०), "तदस्यास्ति (५,२,९४)"—इति मतुप्, "मादुपधायाः (८,२,९)" इति वत्वम्, "तसौ मत्वर्थे (१, ४, १९)"—भत्वेन पदत्वाभावादुत्वाभावः, हषादित्वात् (६, १, २०३) आद्युदात्तत्वम्। जातवेदाः—जातानि वेत्तीति जातवेदाः "गति-कारकयोरपि पूर्वपदप्रकृतिस्वरत्वं (उ० ४, २२६)"—इत्यसिः; यद्वा वेद इति धननाम (निघ० २, १०, ४), जातं धनं यस्य स जातवेदाः, आमन्त्रित-निघातः (८, १, १९)। वहा—"यचोऽतस्तिङः (६, ३, १३५)"—इति संहितायां दीर्घत्वम्। उषर्बुधः—उषसि बुध्यत इत्युषर्बुधः [बुध अवगमने (भ्वा० प०) "क्विप् च (३, २, ७६)"—इति क्विप्, कृदुत्तरपद-प्रकृतिस्वरत्वम् (६, २, १३९)॥ १॥

अथ द्वितीया।

१३ २ ३१२ २२ ३१ ३१२ ३१२३१ १
जुष्टोहिदूतोअसिहव्यवाहनोग्नेरथीरध्वराणाम्।

३१३१ २ ३१ २३१ २३१२ ११ २३२
सजूरश्विभ्यामुषसासुवीर्यमस्मेधेहिश्रवोबृहत् ॥२*॥ ६

हे "अग्ने!" त्वं जुष्टत्वादि-विशेषण-युक्तोऽसि "जुष्टः" ["नित्यं मन्त्रे (६, १, २१०)"—इत्यादुदात्तत्वम्] सेवितइत्यर्थः "असि" [सिपि "तासस्योर्लोपः (७, ४, ५०)"—इति स-लोपः, "हि च (८, १, ३४)"—इति निघात-प्रतिषेधः]। "दूतः" देवानां विशेष-वार्त्ताहरः, अतएव "हव्यवाहनः" "हव्येनन्तःपादम् (३, २, ६६)"—इति ल्युट्, योरनादेशः (७, १, १), ञित्वादाद्युदात्तत्वे (६, १, १९७), क्रदुत्तरपदप्रकृतिस्वरत्वम् (६, २, १३९)] हविषो वोढा, "अध्वराणां" क्रतूनां "रथी" रथ-स्थानीयः [तथाच मन्त्रान्तरं ब्राह्मणमेवं व्याख्यातम्—"रथी-रध्वराणाम्"—इत्यादि "एष हि देवरथः"—इति, ब्राह्मणान्तरञ्च "रथी रध्वराणामित्याह रथोह वा एष भूतो देवेभ्यो हव्यं वहति"—इति] तादृशस्त्वम् "अश्विभ्यां" देवाभ्याम् "उषसा" देवतया च "सजूः" सहितो भूत्वा "सुवीर्यं" शोभन-वीर्य्योपेतं "बृहत्" प्रभूतं "श्रवः" अन्नम्† "अस्मे धेहि" अस्मासु क्षिप ॥ २ ॥ ६

---

* ऋ० वे० १, ३, २८, २।

† 'यशो वा'—इत्यधिकं वि०।

॥ वारवन्तीयम् ॥ अग्नेविवाऔहोहायि। स्वादूषा
२३४सा:। चित्रराधोअमर्त्तायो२३४हायि। आदा
ग्नेषेजातवेदोवहातू३४। औहोवा। इहा२३४हायि।
उक्थवा२३४वाम्। अद्यादे। वाग्उषर्बू३४। औहो
वा। इहा२३४हायि। औहो३१२३४। धाः। एहि
याइहा ॥(१) अद्यादेवाग्औहोहायि। उषर्बू२३४धाः।
जुष्टोहा२३४यिहायि। दूतोअसिहव्यवाहा३४। औहो
वा। इहा२३४हायि। उक्थवा२३४नाः। अग्नेर। था
यिरध्वरा३४। औहोवा। इहा२३४हायि। औहो३१
२३४। णाम्। एहियाइहा ॥(२) अग्नेरथाऔहोहा
यि। आध्वारा२३४णाम्। सजूरा२३४हा। स्विध्यामु
षसासुवीरा३४। औहोवा। इहा२३४हायि। उक्थ

१ १ ५ १२ १ ५२ ५
दूढा२३४ढायि। औहो३१२३४। ढात्। एढियाईढा।
४
ढोऽ५ई। डा(३)॥ १७*॥[१]

॥ मद्दावामदेव्यम्॥ ३ २ ४ २ ४ ५ १
आऽ५ग्ने। विवाश्वाश्दुषसाः। चा
२ २ २ २ २ २ २ २ २ १
यि। चर्षणीधृतश्रियंवादाम्नुषेजातवेदोवहातु। वाम्।
२ १ १ २ २ २ १ १०
औ२३होढायि। यद्या२३देवाए। उषौहोइ। ऊम्मा
१ ५ २ ३ २ २४ २ ४
२। वू३२धो३ऽ५ढायि॥(१) आऽ५द्या। देवा३ए ऊ३ष
५ १ २ २ २ ३१२ १
र्बुधाः। जू। ष्टोहिदूतोमसिहव्यवाड्। ना। औ३
२ १ १ १ १ २ १ १
होढायि। अग्गा२३यिरथायिः। अध्वौहोइ। ऊम्मा२।
१ २ ३ ४ २ ४२
रा३२णो३ऽ५ढायि॥(२) आऽ५ग्ने। रथाइयिरा३ध्वरा
५ १३ २ २ २ २२ ३
णाम्। सा। जूरस्विभ्यामुषसास्तुवीरि। याम्। औ
२ १ १ २ १ २ २ १ १
२३होढायि। अस्मा२३यिधेढायि। अवौहोइ। ऊम्मा
१ १
२। वू३२धो३ऽ५ढायि(३)॥ १८†॥[२]

* ज० मा० २१प्र० २ख० १७सा०।
† ज० मा० २१प्र० २ख० १८सा।

१ २ १ २ १
॥ शुध्यम् ॥ अग्नेविवा२स्वत्। उषसोवा। चित्र॒

२ २ १ २ ३ २ १ २ २ १ २ २ २ २ १ २ २ १ २ २ २
राधो। अमर्त्तिया। आदाशुषेजातवेदोवहात्वमद्याऽदे

१ २ २ १ २ १ २
वाऽउ। षा२३:। बुधाउवा। शूधिया२॥(१) अद्या

२ २ १ २ १ २ १ २ २ २ १
देवाऽ२उ। षर्बुधोवा। जुष्टोहिदू। तोअसिहा।

२ २ १ २ २ १ २ १ २ १
व्यवाहनोअग्नेरथीरध्व। रा२३। णाउवा। शूधिया२॥(२)

१ २ २ १ २ १ २ २ २ १
अग्नेरथा२यिर। ध्वराणोवा। सजूरश्वो। भ्यामुषसा।

२ २ १ २ २ १ २ १ २
सुवीरियमस्मेधेहिश्र। वो२३। बृहाउवा। शूधिया२।

१ २ १ २ ३ ४ ३ १
ए२३हियाऽ४३। ओ२३४५ई। डा(३)॥१८*॥[३] ६

अथ विधुन्दद्राणमिति ऽचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

३ १ २ ३ १ २ २ ३ १ २
विधुन्दद्राणऽसमनेबहूनां

२ २ ३ १ २ ३ १ २
युवानऽसन्तम्पलितोजगार।

---

* ऊ० मा० २१म० २च० १८सा०।

३ १ २ ३ १ २ ३ २३
देवस्यपश्यकाव्यम्महित्वाद्या
३ २ ३ १र २र
ममारसद्यःसमान ॥ १ * ॥

अनया कालात्मकइन्द्रः स्तूयते—"विधुं" विधारकं सर्वस्य युद्धादेः कर्त्तारं [वि-पूर्वो दधातिः करोत्यर्थे], तथा "समने" [अननमनः प्राणनं सम्यगननोपेते] सङ्ग्रामे "बह्वनां" शत्रूणां "दद्राणं" द्रावकम्, ईदृक्-सामर्थोपेतं "युवानं" सन्तं पुरुषं "पलितः" जरा "जगार" निगिरन्तीन्द्राण्या। एवमुक्त-लक्षणं वक्ष्यमाण-लक्षणस्य देवस्य कालात्मकस्येन्द्रस्य "महित्वा" महत्त्वेनोपेतं "काव्यं" सामर्थ्यं "पश्य"। हे जनाः! तथा जरसा प्राप्तः "अत्र" "ममार" म्रियते, "सः द्यः" परेद्युः "समान" सम्यक् चेष्टते पुनर्जन्मान्तरे प्रादुर्भवतीत्यर्थः [तदेवं चत्वारि नामानि शारीराण्युक्तानि बह्वङ्मन्त्रेषु] ॥ ६ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ ३ २ ३
प्राक्क्रमनाशाकोअरुणःसुपर्ण
३ १र २र ३ १र २र
आयोमहःशूरःसनादनीडः।
२ ३ १ २ ३ २ ३ ३
यश्चिकेतसत्यमित्तन्नमोघं
१ २ ३ २ ३ १ ३ ३ १ २र
वसुस्पार्हमुतजेतोतदाता ॥ २ † ॥

---

* ऋ० आ० ४, १, ४, ३ (१भा० ४५८ पृ०)=ऋ० वे० ८, १, १९, ५। अथ० वे० ९, १९, ९।

† ऋ० वे० ८, १, १७, १।

"शाक्मना" [शक्नोति शाक्मं, शाक्मना] बलेन* "शाकः" शक्तः [स-शक्तौ च सर्वं कर्त्तुं शक्त इत्यर्थः, नह्योन्द्रस्य सहायान्तरापेक्षास्ति इन्दत्वादेव], "अरुणः" अरुणवर्णः "सुपर्णः" कश्चित् शोभन-पर्णः पक्षी "आ" गच्छतीत्यध्याहारः [उपसर्ग-श्रुतेर्योग्य-क्रियाध्याहारात्]। "यः" "महः" महान् "शूरः" विक्रान्तः "सनात्" पुराणः† "अनीडः" नीड़स्याकर्त्ता। [नह्योन्द्रोऽग्निवत् क्वचिदपि यज्ञे निकेतनं करोति। एवं सुपर्ण-रूपेणेन्द्रमाह—] स पक्षीन्द्रो "यत्"‡ "चिकेत" कर्त्तव्यत्वेन जानाति तत् "सत्यम् इत्"¶ सत्यमेव "न" तु "मोघं" व्यर्थं भवति। स "स्तृहणीयं" स्पृहणीयं "वसु" धनं "जेता" जयति शत्रुभ्यः सकाशात्। "उत" अपिच "दाता" स्तोतृभ्यः प्रयच्छति ["न लोकाव्यय (२, ३, ६९)"—इत्यादिना षष्ठी-प्रतिषेधः॥ २॥

अथ तृतीया।

१२ ३२ ३ १ २ ३
ऐभिर्ददेवृष्ण्यापी॰स्यानि
२ ३१ २ ३१२ ३२
येभिरौक्षद्वृत्रहत्यायवज्री।

---

* 'शाक्मना—शुक्लत्वेन'—इति वि०।

† 'सनात्—सदैव'—इति वि०।

‡ 'यच्चिकेत—नपुंसक-लिङ्गमिदं पुंल्लिङ्गस्य स्थाने द्रष्टव्यम्। यः कश्चित् चतुरः'—इति वि०।

¶ 'इत्—इति पद-पूरणः'—इति वि०।

१र २र ३ १ २ ३१
येकर्मणःक्रियमाणस्यमह्न
२ ३ २ ३ १ १ ३ १
ऋतेकर्ममुदजायन्तदेवाः॥ २ *॥ ७

इन्द्रः "एभिः" मरुद्भिः सह "पौंस्यानि" बलानि "आ ददे" आदत्ते। "येभिः" यैः मरुद्भिः सहितः "वृत्रहत्याय" [प्राण्युपकारक-वृष्ट्या आवरकाद्वा वृत्रो मेघः, तस्य हत्यायै] मनुष्याणामुपद्रव-शमनायेत्यर्थः†। तथाच "वज्री" वज्रवान् इन्द्रः "औक्षत्" वर्षति। "ये" च मरुतः "देवाः" "मह्ना" महता तत्तेन क्रियमाणस्य वृष्टि-प्रदान-लक्षणस्य कर्मणः साहाय्यार्थम् "ऋतेकर्म" ऋत-कर्म वृष्टि-प्रदान-कर्म प्रति "उदजायन्त" उन्मुखा जायन्ते। स्वयमेव तैरेभिर्दत्ते इति समन्वयः॥ ३॥ ७

अथास्तिसोमइति वृचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

२ ३ १ २ ३१ ३१र २र ३१ १
अस्तिसोमोअयंसुतःपिबन्त्यस्यमरुतः।
३२३१ १ ३ १ २
उतस्वराजोअश्विना॥ १ ‡॥

"अयं" पुरोवर्त्ती सोमः "सुतः" मरुदर्थमस्माभिरभिषुतः "अस्ति" विद्यते। तस्माद् "अस्य" अन्वादेशे एनं स्तुतं सोमं

---

* ऋ० वे० ८, १, १७, २।

† 'वृत्रहत्याय—वृत्रो मेघः तस्य हननेन'—इति वि०।

‡ ऋ० आ० २, २, ३, १० (१मा० ३९२प०)=ऋ० वे० ६, ६, २४, ४।

"स्वराजः" स्वयं दीप्यमानाः स्व-तेजसा नान्यदीयेनेत्यर्थः। तादृशाः "मरुतः" "पिबन्ति"। "उत" अपिवा "अश्विना" अश्विनौ च सोमं पिबतः ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ १२ २२ ३ २० २ १२
पिबन्तिमित्रोअर्यमातनापूतस्यवरुणः।

३ २ ३ १ १
त्रिषधस्थस्यजावतः ॥ २ * ॥

न केवलं मरुतएव सोम-पातारः किन्तु एतेऽपि इत्याह— "मित्रः" सर्वेषां स्व-स्व-कर्मणि प्रवर्त्तकत्वात् सखिभूतः [यद्वा, यज्ञ-सम्बन्धिनः एतन्नामको देवः], "अर्यमा" च, "वरुणः" दुःखादीनां शत्रूणां वा चरितानि वारकः, एतन्नामकास्त्रयो देवाः "तना" तनेन उर्णा-स्तुक-निर्मितेन दशा-पवित्रेण [सुपां सु-लुक् (३, १, ३९)"—इति आकारादेशः, तेनाद्युदात्तः, तना] "पूतस्य" परिशोधितस्य "त्रिषधस्थस्य" [सह तिष्ठन्त्यत्रेति सधस्थं स्थानं, "सधमादस्थयोश्छन्दसि (६, ३, ९६)"—इति सह-शब्दस्य सधादेशः, द्रोणकलशाधवनीय-पूतभृतात्मकानि त्रीणि स्थानानि तत्तथोक्तम्†] तादृशम्, "जावतः" स्तुत्या जननवन्तम्‡ इमं सोमं पिबन्तम् [द्वितीयार्थे षष्ठीः (३, १, ८५)] ॥ २ ॥

---

* ऋ० वे० ६, ६, १४, ५।

† 'त्रिषधस्थस्य—त्रिभिः स्थानैः स्थितस्य प्रातःसवनादिभिः'—इति वि०।

‡ 'जावतः—गमनवतः'—इति वि०।

अथ तृतीया।

२१ २ २ २३१ २ २२ ३ १ २
उतोचस्यजोषमाइन्द्रःसुतस्यगोमतः।
३ १ २ १ २
प्रातर्होतेवमत्सति॥ ३ *॥ ८

"उतो" अपिच† "इन्द्रः" "सुतस्य" अभिषुतस्य "गोमतः" गव्यैर्मिश्रणवतः "अस्य" [अन्वादेशः पूर्ववत्] दशापवित्रेण पूतस्य सोमस्य "जोषम्" पानरूपां सेवां "प्रातः" सवने "नु" क्षिप्रम् "आ मत्सति" [मदि स्तुत्यादिषु (भ्वा०आ०)]आभिमुख्येन स्तौति [यद्वा सोम-सेवां कामयते]। तत्र दृष्टान्तः—"होता इव" यथा होता प्रातःसवने देवानभिष्टौति देवांस्तोतुं अभिवाञ्छति तद्वत्‡॥ ३॥ ८

अथ बण्महां असीति प्रगाथात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

२ ३ १ १ ३ १ १ ३ १ २
बण्महाँ२असिसूर्य्यबडादित्यमहाँ२असि।
३ १ २ ३१ २ ३ १ २ ३१ २
महस्तेसतोमहिमापनिष्टममह्नादेवमहाँ२असि॥ १॥¶

---

* ऋ० वे० ६, ६, २४, १।

† 'उत, उ—इति पद-पूरणौ'—इति वि०।

‡ 'यथा होता प्रथमः सर्वऋत्विजां भक्षयति'—इत्यादि वि०।

¶ ऋ० आ० ३, १, ४, ४ (१भा० ५६८पृ०)=ऋ० वे० ६, ७, ८, १।

हे "सूर्य!" त्वं "महान्" तेजसा अधिकः "असि" "वट्" सत्यम् नैतन्मिथ्येत्यर्थः। हे "आदित्य" अदितेः पुत्र! त्वं "महान्" बलेनाप्यधिकः "असि" "वट्" सत्यमेव। हे "पनिष्ठम" अतिशयेन स्तोतृभिः स्तुत्यः [यद्वा, अतिशयेन व्यवहारकुशलः] "महः" महतः "सतः" भवतः "ते" तव "महिमा" स्तोतृभिः स्तूयतइति शेषः [पनिष्ठम स्तोतृभिरस्माभिः स्तूयत इति वा]। हे "देव" द्योतनादि-गुणयुक्त! त्वं "मङ्हा" महत्त्वेन "महान्" सर्वैः पूजनीयः "असि" भवसि ॥ १ ॥

अथ द्वितीया।

१ २३१२ २१ २ ३१ १ २१ २
वट्सूर्यश्रवसामहाꣳअसिसत्रादेवमहाꣳअसि।

३ २ ३१ २ ३क१र १ २ १३२उ ३ १ १
मङ्हादेवानामसुर्यःपुरोहितोविभुज्योतिरदाभ्यम्॥२*॥ ९

हे "सूर्य!" "श्रवसा" श्रवणेन "महान्" सर्वाधिकः "असि" [यद्वा, 'श्रवसा' अन्नेन 'महान्' दाता 'असि' स्तोतृभ्यो दातासि] "वट्" सत्यम्। हे "देव" द्योतमान! सूर्य! त्वं "देवानां" मध्ये "मङ्हा" महत्त्वेन महानधिकः "असि" "सत्रा" सत्यमेव†। "असुर्यः" असुराणां हन्ता चासि। किञ्च, "देवानां" कामयमानानां स्तोतॄणां वा "पुरोहितः" असि हितोऽसि हितोपदेष्टासि बहु-हित-कार्यसि [अथवा 'पुरो-

---

* ऋ० वे० ६, ७, ८, १।

† 'सत्रा—सदा'—इति वि०।

हितः' पुरतो निहितोऽसि]। किञ्च तव "ज्योतिः" तेजः "विभुः" व्याप्तं सर्वतः "अदाभ्यं" केनाप्यहिंस्यञ्च॥ २ ॥ ९

॥ गौरीवितम् ॥ ५ ३र २ ४ ५ र
बण्म। ह्वाण्माइ। सिह्वरिया।
१ र र १ र २ ४र
बडादित्यमहाण्ऋसा२३यि। माह्वस्तेसा३१२३। तोम
१ र र २ ४ ५ ४
हिमापनाप्रयिष्टमा। माङ्गादेवा३१२३। मह्वोवा। आ
५ ५ र ३र१ ४ र ५ १
प्रसोह्वायि॥(१) मङ्गा। देवाइ। मह्वाण्ऋसायि। म
र र र १ र २ ४ र
ङ्गदेवमहाण्ऋसा२३यि। बाद्वर्य्यआ३१२३। वसाम
१ र र २ ४ ५ ४
ह्वाण्प्रऋसायि। साञ्चादेवा३१२३। मह्वोवा। आप्रसो
५ ५ र ३र२ ४ र ५ १ र
ह्वावि॥(२) सञ्चा। देवाइ। मह्वाण्ऋसायि। सञ्चा
र र १ र र २ ४र
देवमह्वाण्ऋसा२३यि। माङ्गादेवा३१२३। नामसुर्य्यपु
१ र २ ४ ५ ४
पुरोप्रह्विताः। वायिभुज्योता३१२३यिः। अदोवा। भा
५
प्रयोह्वायि(३)॥ ५ * ॥ [१] ९

इति सामवेदार्थप्रकाशे उत्तरार्चस्य विंशस्याध्यायस्य
द्वितीयः खण्डः॥ २ ॥

* ऊ० गा० २१प्र० १ष० ५सा०।

अथ तृतीये खण्डे—

उपनोहरिभिरिति तृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१२१ ११ ३२ १ १२
उपनोहरिभिःसुतंयाहिमदानाम्पते।

१२३ ११ ३२
उपनोहरिभिःसुतम्॥ १*॥

हे "मदानाम्पते" [माद्यत्यनेनेति मदाः सोमाः। "मदी-ऽनुपसर्गे (३, ३, ६७)"—इति करणे अप् प्रत्ययः] सोमानां स्वामिन्! इन्द्र! "हरिभिः" [आश्रितेन हरिरित्यादिषु बहुनाम-स्वानां श्रुतेरत्रापि] शत-सहस्र-सङ्ख्याकैः सह "नः" अस्माकं यज्ञे "सुतम्" अभिषुतं सोमम् "उप याहि" तत्पानार्थं शीघ्र मागच्छ। पुनरुपनइत्यादिरादरार्था॥ १॥

अथ द्वितीया।

३१२ २२३१ १ ३१२ २२ ३ १२
द्वितायोवृत्रहन्तमोविदइन्द्रःशतक्रतुः।

१२३ ११ ३२
उपनोहरिभिःसुतम्॥ २†॥

"वृत्रहन्तमः" अतिशयेन वृत्रस्य हन्ता "शतक्रतुः" नाना-विध-कर्मा "यः इन्द्रः" "द्विता" द्विधा‡ "विदे" [सुञ्च-बधादौ

---

* ऋ० सा० १, २, १. ६ (१भा० ३४९पृ०) ऋ० वे० ६, ३, २७, १।

† ऋ० वे० ६, ६, २७, २।

‡ 'द्विता—कर्म-द्वयस्य कर्त्ता'—इति वि०।

उग्रकर्मा, जगद्रक्षण-काले शात्रुकर्मेति द्विप्रकारेण विदे] सर्वैर्ज्ञायते [विद ज्ञाने (अदा०प०), कर्मणि विहितस्य त-प्रत्ययस्य "लोपस्त आत्मनेपदेषु (७, १, ४१)"—इति त-लोपः। स त्वं "हरिभिः" सह "सुतं" सोमम् "नः" अस्माकम् "उप" याहि॥२॥

अथ तृतीया।

१२ ३२ ३२१२ २२ ३ १ १
त्वꣳहिवृत्रहन्नेषामपातासोमानामसि।
१२३ १२ ३१
उपनोहरिभिःसुतम्॥ ३ * ॥ १०

हे "वृत्रहन्" वृत्रस्य पापस्य वा हन्तः! इन्द्र! "हि" [-शब्दो हेत्वर्थे] यस्मात् त्वम् "एषाम्" अस्मदीयानां† "पाता" पानकर्त्ता "असि" भवसि [एषामिति इदमोऽन्वादेशे अमादेशोऽनुदात्तश्च (२, ४, ३२)] अतस्त्वमस्मैः सह सोमं पातुमुपयाहि आगच्छ॥ ३॥ १०

अथ प्रवोमहइति त्रयात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

१२ ३ १ २ ३ १२ ३
प्रवोमहेमहेवृधेभरध्व
२ ३ १ २ ३ १ २
म्यृचेतसेप्रसुमतिङ्कृणुध्वम्।

---

* ऋ० वे० ६, ६, २७, १।

† 'एषां—सोमानां'—इति वि०।

१२ ३१२ २२
विशःपूर्वीःप्रचरचर्षणिप्राः ॥ १ * ॥

हे मदीया जनाः! "वः" यूयं "महे हवे" महतां धनानां वर्धयित्रे अतएव "महे" महते इन्द्राय "प्रभरध्वम्" सोमान् प्रणयत। "प्रचेतसे" प्रकृष्ट-मतये इन्द्राय सुमतिं सुष्ठु मननीयं स्तोत्रं "प्र कृणुध्वम्" प्रकुरुत। अथ प्रत्यक्ष-स्तुतिः—हे इन्द्र! "चर्षणिप्राः" [चर्षणयो मनुष्याः] कामैः प्रजानां पूरयिता त्वं "पूर्वीः" पूरयित्रीः "विशः" प्रजाः "प्रचर" अभिगच्छ ॥ १ ॥

अथ द्वितीया।

३ १ २ ३ १२ ३ १
उरुव्यचसेमहिनेसुवृक्ति
२२ २१ २ २१ २
मिन्द्रायब्रह्मजनयन्तविप्राः।
१२३२ २१ २ २१ २
तस्यव्रतानिनमिनन्तिधीराः ॥ २ † ॥

"उरुव्यचसे" पृथु-व्याप्तये‡ "महिने" महते यस्मै "इन्द्राय" "सुवृक्तिं" शोभनां स्तुतिं "ब्रह्म" अन्नं हविश्च "विप्राः" प्राज्ञाः "जनयन्त" जनयन्ति। "तस्य" इन्द्रस्य "व्रतानि" दक्षिणादीनि कर्माणि "धीराः" प्राज्ञाः देवा अपि "न" "मिनन्ति" हिंसन्ति ॥ २ ॥

---

* ऋ० आ० ४, १, ४, १ (१भा० ६१५पृ०)=ऋ० वे० ४, २, १६, ४।

† ऋ० वे० १, २, १६, ५।

‡ 'उरुव्यचसे—उर्विति बहुनाम, व्यच व्याप्तौ वाचि (तु० प०), वामीश्वरः इन्द्रः सर्वेषां वैदिकानां लौकिकानाञ्च वाचां नमीश्वरः। अथवा व्यच दर्शने। सर्वेषां द्रष्टा'—इति वि०।

अथ तृतीया।

२ २२ २११ २२
इन्द्रंवाणीरनुत्तमन्युमेव
२१२ २२ २ १ १
सचाराजानन्दधिरेसहध्यै।
१२ २२ १२
हर्यश्वायबर्हयासमापीन्॥ २ *॥ ११

"सचा राजानं" सर्वस्य जगत ईश्वरम्, "अनुत्तमन्युं" "[केनाप्यनुत्तोऽबाधितो मन्युः क्रोधो यस्य सः] तमेव, "इन्द्रं" "वाणीः" स्तुतयः "सहध्यै"† स्तोतॄणां यत्नूनभिभवितुं "दधिरे" पुरो दधिरे। अतः हे स्तोतः! त्वमपि "हर्यश्वाय" इन्द्राय [हर्यश्वमिन्द्रं स्तोतुमित्यर्थः] "आपीन्" बन्धून् "सम् बर्हय" प्रवर्धय॥ २॥ ११

अथ यदिन्द्रेति प्रगाथात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ १ २१ २११ ३१ १३१२ १२
यदिन्द्रयावतस्त्वमेतावदहमीशीय।
३ २ ३१२ ३ १२२३१ २
स्तोतारमिद्दधिषेरदावसोनपापत्वायरꣳसिषम्॥१॥

---

* ऋ० वे० ४, २, १६, ६।

† षह मर्षणे इति दिवादिः। तस्य "तुमर्थे से सेनसे (३, ४, ९)"—इत्यादिना तुमर्थे रूपम्।

‡ ऋ० आ० ४, १, २, ८ (१ भा० ६१२४०)=ऋ० वे० ४, २, २०, ३।

हे "इन्द्र! "यत्" यतः "यावतः" धनस्य ईशिषे "एतावत्" [षष्ठ्या लुक् (७, १, ३९)] एतावतो धनस्य "अहम्" "ईशीय" ईश्वरो भवेयम्। हे "रदावसो" रदति ददाति वसूनीति रदद्वसुः ततोऽम् अस्मदीयम् "स्तोतारम्" "इत् दधिषे" धन-प्रदानेन धारयेमेव। किञ्च, "पापत्वाय" क्षीणत्वाय "न रंसिषम्" न दद्याम्॥ १॥

अथ द्वितीया।

१ २ ३ ११ ९ २ ३ १ २ ३ १८ २७ ३ १ २
शिक्षेयमिन्मह्यतेदिवेदिवेरायआकुहचिद्विदे।

२७ ९ १ ३ ३ २ ९ २ ३ १ २ ३ २ ३१
नहित्वदन्यन्मघवन्नआप्यंवस्योअस्तिपिताचन॥ २ *॥१२

"कुहचिद्विदे" कुत्रचित् विद्यमानः कुहचिद्वित् तस्मै यत्र क्वापि विद्यमानायेत्यर्थः। "मह्यते" पूजयते जनाय "दिवे दिवे" प्रतिदिनं "रायः" धनानि "शिक्षेयम् इत्" दद्यामेव "आ" [-कारः पाद-पूरणः]। एवमिन्द्रस्य वाक्यं श्रुत्वा ऋषिर्वदति—हे "मघवन्" इन्द्र! "त्वदन्यत्" अस्माकम् "आप्यं" बन्धुं "न हि अस्ति" "वस्यः" प्रशस्यः "पिता च न" पालयिता च † त्वदन्यो नास्तीत्यर्थः॥ २॥ १२

---

* ऋ० वे० ५, ३, २०, ४।

† 'पिता च—च-शब्दात्माता च'—इति वि०।

अथ शुधीहवमिति हृचात्मकं चतुर्थं सूक्तम्,

तत्र प्रथमा।

३१र २र ३ ९उ ९ २ ३ २ ९ १ २ ३ २
शुधीहवंविपिपानस्याद्रेर्बोधाविप्रस्यार्चतोमनीषाम्।

३ २उ ३ १ २ ३ २ ३ २
कृष्वादुवाꣳस्यन्तमासचेमा॥ १ *॥

हे इन्द्र! "विपिपानस्य" विपीतवतो विपिबतो वा ममाद्रेर्गौण:† "हवम्" आह्वानं "शुधि" शृणु ["गावश्यो वाचं वदता वदद्भ्यः"—इति हि निगमान्तरम्]। "विप्रस्य" प्राज्ञस्य वसिष्ठस्य "अर्चत:" स्तुवत: "मनीषा" स्तुति: "बोध" बुध्यस्व च। "इमा" इमानि क्रियमाणानि "दुवांसि" परिचरणानि "अन्तमा" अन्तिकतमानि‡ बुद्धिस्थानि वा "सचा" सहायभूत: सन् "कृष्वा" कुरु च॥ १॥

अथ द्वितीया।

२ ३ २ ३ १ १ ३ २ ३ १ २ ३ १ २ ३क २र ३ २
नतेगिरोअपिमृष्येतुरस्यनसुष्टुतिमसुर्य्यस्यविद्वान्।

१ २ ३ १ २
सदातेनामस्वयशोविवक्मि॥ २ ¶॥

---

* ऋ० वे० ५, ३, ५, ४।

† 'विपिपानस्य—अद्रेरभिषवं कुर्वाणस्य सोमं पिबतः'—इति वि०।

‡ 'अन्तमा—अन्नवन्ति तुल्यायुधानि'—इति वि०।

¶ ऋ० वे० ५, ३, ५, ४।

हे इन्द्र! "तुरस्य" शत्रूणां हिंसकस्य "ते" तव "गिरः" स्तुतीः "असुर्यस्य" [द्वितीयार्थे षष्ठी (३, १, ८५)] त्वदीयं असुर्यं बलं* "विद्वान्" जानन् अहं "न अपि मृष्ये" [मृषि-मार्जन-कर्मा (स्वा० प०)] न मार्जयामि न परित्यजामीत्यर्थः। "सुष्टुतिं" शोभनां स्तुतिञ्च "न" अपि मृष्ये [मृषेर्मार्जन-कर्मत्व-मन्यत्रापि दृश्यते। तद्यथा—"मा नो अग्ने सख्या पित्रापि प्रमर्षिष्ठा"—इति] किन्तु हे "स्वयशः" असाधारण-यशः! "ते" तव "नाम" स्तोत्रं "सदा" एव "विवक्मि" ब्रवीमि ॥ २ ॥

अथ तृतीया।

२ २ २ १ १ २ १ १ २ १ १ २ ३ १ १ २ १
भूरिहितेसवनामानुषेषुभूरिमनीषीहवतेत्वामित्।

२ ३ १ १ २ १ १ २
मारेअस्मन्मघवञ्छरोकः॥ ३ †॥ १३

हे "मघवन्!" "ते" तव "सवना" सवनानि सोमाभिषव-नानि "भूरि" भूरीणि "मानुषेषु" अस्मासु वर्त्तन्त इति शेषः। "मनीषी" स्तोता "त्वामित्" त्वामेव "भूरि हवते" नितरां स्तौति ब्रूयति वा। अतः "अस्मात्" अस्मत्तः "आरे" दूरे "ज्योक्" चिरकालं "मा कः" आत्मानं मा कार्षीः क्षिप्रमात्मान-मस्मदासन्नं कुर्वित्यर्थः॥ ३ ॥ १३

---

* 'असुर्यस्य—असुर-स्वभावस्य'—इति वि०।

† ऋ० वे० ५, ३, ६, १।

॥ मद्दादैर्घतमसम् ॥ ह्वाउश्रुधायि। ह्वावंविषिपा। ना।
स्याद्राइयि। स्याद्रायिः। बोधाविप्रस्यार्चतोमा। नो
१षा२। नोषा२। क्षाषादुवाएसायि। अन्तमाइ।
अतमाइ। सचे२मा२३४औहोवा ॥(१) ह्वाउनतायि।
गायिरोअपिन्व। ष्यायि। तुरस्याइ। तुरस्या। न
सुष्टुतिमस्तुर्य्यस्यवायि। दू१वा२न्। दूवा२न्। सदातेना
मा। स्वयशाइः। स्वयशाइः। विवा२क्मी२३४औहोवा
॥(२) ह्वाउभूरायिद्विषितेसवना। मा। नुषेषू३। नुषेषू।
भूरिमनोषीह्ववतेतू। वा१मा२यित्। त्वामा२यित्।
मारेअस्मात्। मघवाइन्। मघवाइन्। ज्यो२क्का२३४
औहोवा। ई२३४५(३) ॥ २ * ॥ [१]

* ऊ० मा० २२प्र० २ष० २षा०।

॥ मरुत्वतीयम् ॥ अधायि । हवाम् । विपिपानस्य
द्रेः । द्रेः । द्रेः । बोधा । विप्रा । स्याच्चनोमनी
षा । षा । षा । काष्ठा । दुवा । सीतमासचेमा ।
मा । मा ॥(१) नातायि । गिरो । अपिम्रष्येतुरस्य
स्य । नाम् । ष्टुतायि । अम् । र्यस्यविद्वान् । द्वान् ।
द्वान् । सादा । तेना । मस्वयशोविवक्मिक्मिक्मि ॥(२)
भूरायि । चितायि । सवना । मानुषेषुषुषु । भूरायि ।
मनो । षीहवतेत्वामित् । मित् । मित् । मारे । अ
स्मात् । मघवञ्छ्रोकः । कः । को । हाउहाउ । वा
३ । ई२३४५(३) ॥ ४ * ॥ [२] १३

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य विंशस्याध्यायस्य
तृतीयः खण्डः ॥ ३ ॥

---

* ऋ० मा० १२५० १च० ४सा०।

अथ चतुर्थे खण्डे —

प्रोष्वस्मैइति त्र्यृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१ २ ३१२ २२ ३१२
प्रोष्वस्मैपुरोरथमिन्द्रायशूषमर्चत।
३१२ ३२३२ ३१२ ३२
अभीकेचिदुलोककृत्सङ्गेसमत्सुवृत्रहा।
३१ २ ३१२ २२
अस्माकम्बोधिचोदितानभन्ता
३१२३ २उ ३१२
मन्यकेषाञ्चाकाअधिधन्वसु॥ १ *॥

"अस्मै" इन्द्राय [षष्ठ्यर्थे चतुर्थी] अस्येन्द्रस्य "पुरः रथं" रथस्य पुरस्तात् ["पुरोऽव्ययम् (१, ४, ६७)"—इति गतित्वाद् गतिसमासः (२, १, १८)] रथस्य अग्रे वर्त्तमानं "शूषं" बलं "सुप्रोचत" हे स्तोतारः! सुष्ठु प्रपूजयत ["प्र"-"उ"-इति निपात-समुदायः। प्रो-इति "ओत् (१, १, १५)"—इति प्रगृह्य-सञ्ज्ञा] इन्द्रो विशिष्यते—"समत्सु" [समानं माद्यन्त्यत्रेति समदः सङ्ग्रामाः औणादिकोऽधिकरणे क्विप् (३, १, ७६), "समानस्य छन्दसि (६, ३, ८४)"—इति स-भावः, समत्सु] सङ्ग्रामेषु "सङ्गे" सङ्ग-मनीये शत्रु-बले ["ङीऽन्यतापि दृश्यते (३, २, ४८ वा०)"—गमेर्डः] "अभीके चित्" अभ्यर्णेऽपि निकटं प्राप्तेऽपि—"लोक-

* ऋ० वे० ८, ७, ११, १।

हे "इन्द्र!" "यः" "नः" अस्मान् "जिघांसति" हन्तुमिच्छति [हन्तेः सन् "अज्झनगमां सनि (६, ४, १६)"—इति वा दीर्घः "अभ्यासाच्च (७, ३, ५५)"—इति कुत्वम्], तस्मै "शत्रवे" "वधं" हनन-साधनमायुधम् "अस्ता असि" क्षेपा भवसि [असु क्षेपणे (दि० प०), ताच्छिलिकस्तृन् (६, ४, १६), "ते" तव "या" "रातिः" धन-प्रदान-हेतुर्हस्तः [रा दाने (अदा० प०), करणे क्तिन्, (३, ३, ९४), "मन्त्रे वृषेष पच-मन-विद-भू-वी-रा उदात्तः (३, ३, ९६)"—इति क्तिनउदात्तत्वम्] सा रातिः "वसु" धनं "ददिः" अस्मभ्यं दाता भवत्। "आ-इ-गम-हन (३, २, १७१)"—इति ददतेः किप्रत्ययः, "न लोकाव्ययः (२, ३, ६९)" इति वसु-शब्दात् षष्ठ्याभावः। सिद्धमन्यत्॥ ३॥ १४

अथ रेवाँइद्रेवतइति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

३ २उ ३ १ २ ३ १२ १२ ३ १ २

रेवाꣳइद्रेवतस्तोतास्यात्त्वावतोमघोनः।

१२ ३ १ २

प्रेदुहरिवःसुतस्य॥ १ *॥

हे "हरिवः" हरिवन्! ["मतुवसोः (८, ३, १) नकारस्योत्वं] हरि-नामकाश्ववन्निन्द्र! "रेवतः" रयिमतः बहु-धनोपेतस्य तव "स्तोता" "रेवान् स्यात्" रयिमान् भवेत् "इत्" [-शब्दोऽवधारणे। रयिमान् भवेदेव न तु दारिद्र्यं प्राप्नोति]।

---

* "सुतस्य"—इति ऋ०-पाठः।

† ऋ० वे० ५, ७, १९, १।

उक्तमेवार्थं कौमुतिक-न्यायेन दृढ़यति—"त्वावतः" त्वत्सदृशस्य ["युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसङ्ख्यानम् (५, १, ६१ वा०)" —इति मतुप्] "मघोनः" मघवतः धनाढ्यस्य "सुतस्य" [षु प्रसवैश्वर्ययोः (भ्वा० प०)] स्तोतव्यस्य ऐश्वर्योपेतस्य अन्यस्यापि स्तोता "प्रेदु"* ["स्यात्"—इत्यनुषज्यते] प्रस्यात् प्रभवेदेव नतु निह्नोयते किमु वक्तव्यं तव स्तोता धनवान् भवेदे-वेति ॥ १ ॥

अथ द्वितीया ।

३१ ३१३१२ ३१ २३१२ १२
उक्थञ्चनशस्यमानन्नागोरयिराचिकेत ।

१२ ३१३ १२
नगायत्रङ्गीयमानम् ॥ २† ॥

[गायतेर्गीः] "अगोः" अस्तोतुः "रयिः", "शस्यमानं" स्तोत्रा पठ्यमानम् "उक्थं च" निगदमपि "आ चिकेत" अभिजानाति [कित ज्ञाने (भ्वा० प०) छान्दसो लिट् (३,२, १०५)। नेति सम्प्रत्यर्थे] "न" सम्प्रति प्रस्तोत्रादिभिः "गीय-मानं" "गायत्रं" गातव्यं साम [यद्वा, गायत्राख्यमपि] आचि-केतेत्येव। अतः कारणाद् वयमपि तमिन्द्रं स्तुमइत्यर्थः ॥ २ ॥

---

* 'इत्', 'उ' एतावुपसर्गौ —इति वि०।

† ऋ० भा० ३, १, ४, २ (१भा० ४६६पृ०) = ऋ० वे० ५, ७, १६, ४।

अथ तृतीया।

१ २ १ २ ३ १ २ ३ १ २
मानइन्द्रपीयत्नवेमाग्रर्धतेपरादाः।

१ १ २ १ २
शिक्षाशचीवःशचीभिः ॥ ३ * ॥ १५

हे इन्द्र! त्वं "पीयत्नवे" [पीयति बंधकर्मा (निरु०४, २५)] बध-शीलाय हिंसा-कारिणे शत्रवे "नः" अस्मान् "मा परादाः" मा परित्यागीः; "मा" च "ग्रर्धते" अभिभवित्रे अस्मान् मा परादाः [ऋधु प्रहसने (श्वा० आ०)—इति धातुः]; अपितु "शचीवः" शक्तिवन्निन्द्र! "शचीभिः" रात्रीयैः कर्मभिः "शिक्ष" अस्माननुग्राधि [यद्वा, शिक्षति दानकर्मा (३, २०, ८), अभीष्टं धनमस्मभ्यं देहि; यद्वा, शत्रून् जेतुं शिक्ष शक्तान् कर्त्तुमिच्छ; शकेः सन्नन्तस्य "सनि मीमा (७, ४, ५४)"—इति इसादेशः, अभ्यास-लोपे च कृते लोटि रूपमेतत्] ॥ ३ ॥ १५

अथैन्द्र्याद्यिहरिभिरिति ऋचात्मकं तृतीयं सूक्तम्,

तत्र प्रथमा।

१ १ २ १ २ ३ २ १ २ १ २
एन्द्र्याद्यिहरिभिरुपकक्षेवस्यसुष्टुतिम्।

२ १ २ १ २ ३ १ २ १ २ ३ १ २
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ १ † ॥

---

* ऋ० वे० ५, ७, १९, ५।

† ऋ० आ० ४, १, १, ७ (१मा० ७११पृ०);=ऋ० वे० ६, ३, ११, १।

हे "इन्द्र !" "कण्वस्य" "सुष्टुतिं" शोभनां स्तुतिं "हरिभिः" अश्वैः "उप याहि" आगच्छ। "दिवः" द्युलोकं [द्वितीयार्थे षष्ठी (३, १, ८५)] "अमुष्य" अमुष्मिन्निन्द्रे "शासतः" शासति सति [विभक्ति-व्यत्ययः (३, १, ८५)] तत्र वयं सुखमास्महे। हे "दिवावसो" दीप्त-हविष्केन्द्र ! "दिवं" स्वर्गं "यय" यूयं गच्छत [बहुवचनं पूजार्थम्। यद्वा, हे 'दिवावसो !' दिवो द्यु-नामकममुं लोकं 'शासतः' शासनं कुर्वन्तः यूयं 'दिवं' स्वर्गं 'यय' गच्छत]॥ १ ॥

अथ द्वितीया।

२ ३ २३ १ २ ३ २ ३ १ २ ३ १ २
अत्राविनेमिरेषामुरान्नधूनुतेवृकः।

३ २ ३ २ ३ १ २ ३ १ २ ३ १ २
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ २ * ॥

"अत्र" अस्मिन् यज्ञे "एषाम्" अभिषव-यावणां "नेमिः" सोम-लतां "वि धूनुते" विशेषेण कम्पयति। तत्र दृष्टान्तः— "उरां" मेषीं "वृकः न" वृकइव यथा वृकः तद्वत्। सिद्ध-मन्यत्॥ २ ॥

अथ तृतीया !

२ ३ २ ३ १२ ३ २ ३ १२ २२
आत्वाग्रावावदन्निहसोमोघोषेणवक्षतु †।

१२ ३२ ३ १ २ ३ १२ ३ १ २
दिवोअमुष्यशासतोदिवंययदिवावसो ॥ ३ ‡ ॥ १९ ॥

* ऋ० वे० ६, ३, ११, ३। † "यक्षतु"—इति ऋ०-पाठः।
‡ ऋ० वे० ६, ३, ११, ४।

हे इन्द्र ! "त्वा" त्वाम् "इह" यज्ञे "ग्रावा" सोमाभिषव-पाषाणः "सोमी" सोमवान् "वदन्" शब्दं कुर्वन् "घोषेण" ध्वनिना* सह "आ वक्षतु" त्वां प्रापयतु ॥ २ ॥ १६

अथ पवस्वसोममन्दयन्निति ऋचात्मकं द्वैपदं चतुर्थं, सूक्तम्,

तत्र प्रथमा ।

१२ ३२३ १२ ३१२
पवस्वसोममन्दयन्निन्द्रायमधुमत्तमः ॥ १† ॥

हे "सोम !" "मधुमत्तमः" अतिशयेन मधुर-रसवान् त्वं मन्दयन् मादयिता भवन् "इन्द्राय" ["क्रिया-ग्रहणं कर्त्तव्यम् (१, ४, ३२ वा०)"—इतीन्द्रस्य सम्प्रदानसञ्ज्ञा] इन्द्रं मोदमानः सन् "पवस्व" इन्द्रार्थमागच्छ ॥ १ ॥

अथ द्वितीया ।

२३१ २ ३१२ ३१३ १२
तेसुतासोविपश्चितः‡ शुक्रावायुमसृक्षत ॥ २ ¶ ॥

"विपश्चितः" मेधाविनः "सुतासः" अभिषुताः "शुक्राः" शुक्लवर्णाः अभिषवेण निर्मलत्वात् दीप्यमानाइत्यर्थः । "ते" सोमाः "वायु" शब्दम् "असृक्षत" असृजन् अकार्षुः§ [अथवा

---

* 'घोषेण—सोमाभिषव-घोषेण'—इति वि० ।

† ऋ० वे० ७, २, १६, १ ।

‡ "मदिन्तमाः"—इति ऋ०-पाठः ।

¶ ऋ० वे० ७, २, १६, २ ।

§ 'वायुम् असृक्षत—सृजनं तर्पणं वायुं तर्पयत'—इति वि० ।

वायुमेव सोम-पानार्थमसृजन्] सोमेषु सुतेषु सत्सु वायुस्त्वा-नार्थमागच्छति खलु ॥ २ ॥

अथ तृतीया।

१२ ३१२ ३२३१२
असृग्रन्देववीतयेवाजयन्तोरथाइव ॥ ३ * ॥१७

एते अभिषुताः सोमाः "वाजयन्तः" यजमानानामन्न मिच्छन्तः सन्तः "देववीतये" देवानां पानाय "असृग्रन्" विसृ-ज्यन्ते ऋत्विग्भिः प्रदीयन्ते। तत्र दृष्टान्तः—"रथाइव वाजयन्तः" शत्रोर्धनानि बलानि वा स्वामिन इच्छन्तो रथा देववीतये देवानां गमनाय यथा विसृज्यन्ते तद्वत् ॥ ३ ॥ १७

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्य विंशस्याध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

—ooo—

अथ पञ्चमे खण्डे—

अग्निंहोतारमिति तृचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

११२ ९२ ३१२३१२११२
अग्निꣳहोतारमन्येदाखन्तंवसोःहनुꣳ
२२ ३११२ २३२ ३१२
सद्मसोजातवेदसंविप्रन्नजातवेदसम्।

* ऋ० वे० ७, २, १६, २।

२ १ १ २ ३ २ ३ १ २ ३ २
यज्ञैर्जुह्वा यास्वध्वरोदेवाच्याकृपा।
३ २ ३ १ २ १ १ २ १ १ २
घृतस्यविभ्राष्टिमनुशुक्रशोचिष
३ १ १ ३ १ २
आजुह्वानस्यसर्पिषः॥ १ *॥

"अग्निं" सर्वासां देव-सेनानामग्रणं यज्ञेष्वग्रं नीयमानं वा "होतारं" अस्माद्यागं प्रति देवानामाह्वातारं [यद्वा, होम-निष्पादकं होतारं ह्वातारं "जुहोतेर्हौतेर्वौर्णवाभः (निरु० दै० १,१५)"—इति यास्कः। "अग्निमद्यहोतारमवृणीत"—इति श्रुतेः, "अग्निमग्नआवह"—इति च, अग्नेराह्वातृत्वं प्रसिद्धम्। 'अग्निं होतारं मन्ये'—इत्येवं प्रतिविशेषणं मन्यदिति सम्बन्धः। यद्वा, याग-निष्पत्तेरेवोपलक्षितत्वात् एतदेव विधेय-विशेषणम्, इतराणि वक्ष्यमाण-विशेषणानि स्तुति-परााणि], "दास्वन्तम्" अतिशयेन दानवन्तञ्च, "वसोः" वसुं निवास-हेतुं, "सहसः सूनुं" बलस्य पुत्रमग्निम् [मन्थन-काले बलेन मथ्यमान उत्पद्यते इति पुत्रत्वमुपचर्यते] "जातवेदसं" जातानां वेदितारं जात-प्रज्ञं जात-धनं वा [जातवेदः-शब्दो यास्केन बहुधा निरुक्तः] अग्नेर्जातवेदस्त्वे दृष्टान्तः—"विप्रं न" जातविद्यं मेधाविनं ब्राह्मणमिव, तं यथा बहु मन्यते तथा त्वामपि स्तौमीत्यर्थः। उक्त-गुण-विशिष्टो "यो देवः" "स्वध्वरः" शोभन-यज्ञवान् यज्ञं सम्यग् निर्वहन् "जर्हृष्या" उन्नतया उत्कृष्टया "देवाच्या" देवान्

* ऋ० आ० ५, २, ३, ९ (१भा० ९२९ पृ०)=ऋ० वे० २, १, १२, १।

पूजयन्त्या देवान् प्रत्युक्तया वा "क्रपा" क्रपया सामर्थ्य-लक्षणया ["देवान् प्रत्युक्तया क्रपया"—इति (निरु० नै० ६, ८) यास्कः] तेभ्यो हविर्वहन-बुद्धया युक्तः सन् "शुक्रशोचिषः" दीप्त-तेजस्कस्य "आजुह्वानस्य" आ समन्तात् हूयमानस्य "सर्पिषः" सरण-शीलस्य "घृतस्य" विलापनेन दीप्तस्याज्यस्य "विभ्राष्टिं" विशे-षेण भ्राजनम् "अनु" स्वयमपि तत् आज्यं वष्टि कामयते स्वीकरोतीति शेषः ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ २ १ २
यजिष्ठन्त्वायजमानाऽहवेमज्येष्ठमङ्गिरसां

२ १ २ ३ १ २ ३ १ २
विप्रमन्मभिविप्रेभिःशुक्रमन्मभिः।

१ २ ३ १ २ २ ३ २
परिज्मानमिवद्याꣳहोतारञ्चर्षणीनाम्।

३ १ २ ३ १ २ ३ २ ३ ३ २ ३ १ २
शोचिष्केशंवृषणंयमिमाविशःप्रावन्तुजूतयेविशः॥*॥

हे "विप्र" मेधाविन्! "शुक्र" दीप्त-ज्वालाग्ने! "यजिष्ठम्" अतिशयेन यष्टृतमं "त्वा" त्वां "यजमानाः" वयं "हवेम" आह्वयामः [यतो वयं यजमाना अतस्त्वां यजिष्ठमाह्वयाम-/ इत्यभिप्रायः]। कीदृशं त्वाम्? "अङ्गिरसां" अङ्गिरो गोत्रोत्प-न्नानां मध्ये† "ज्येष्ठम्" अतिशयेन प्रशस्यं [यद्वा, अङ्गि-रसामङ्गाराणां मध्ये ज्येष्ठं ज्वाला-युक्तत्वात्। "अङ्गिरा अङ्गा-

* ऋ० वे० २, १, १२, २।

† 'अङ्गिरसामग्नीनाम्'—इति वि०।

रतः (निरु० न० ३, १७)"—इति यास्कः। "येऽङ्गिरा आसंस्तेऽङ्गिरसो भवन्"—इति श्रुतम्]। केन साधनेन? इत्युच्यते—"मन्मभिः" मनन-साधनैः "विप्रेभिः" विप्रैः विशेषेण प्रीणयितृभिः "मन्मभिः" मन्त्रैः [यद्वा, विप्रेभिः मेधाविभिर्ऋत्विग्भिर्मन्मभिर्मन्त्रैश्च सहिता वयमिति सम्बन्धः] अग्राह्मानानन्तरं "परिज्मानं" परितो गच्छन्तं "द्याम् इव" सूर्यमिव "होतारं"। केषामर्थे? "चर्षणीनां" मनुष्याणाम् अर्थे पश्चाद्-यागादि-साधनेन देवत्वमापन्नानां देवानामाह्वातारं तथा "शोचिष्केशं" केशवदत्यन्त-ज्वालोपेतं, "दृषणं" कामानां वर्षितारम्; एवं रूपं त्वां "विशः" त्वामेव निविशमानाः "विशः" प्रजाः "जूतये" स्वर्गाद्यभिमत-फल-प्राप्तये* "प्र नयन्तु" प्रकर्षेण नीयन्तु। तादृशं त्वां हुवेमेति सम्बन्धः॥ २॥

अथ तृतीया।

२३ २२ ३१२ २१ २३
सद्विपुरु†चिदोजसाविरुक्मता

१ २ ३ १२ २१२३१२ २२ ३ १
दीद्यानोभवतिद्रुहन्तरःपरशुर्नद्रुहन्तरः।

३ २३२ ११२ २२३१२३१ ३२
वीडुचिद्यस्यसमृतौश्रुवद्नेवयत्स्थिरम्।

---

* 'जूतये-इष्टार्थम्'—इति वि०।

† "पुरु"—इति म०-पाठः।

३ १ २ ३ १ २ ३ २ ३ १ २
निष्षहमाणोयमतेनायतेधन्वासच्चानायते ॥३*॥ १८

॥ इति नवमस्य प्रथमार्द्धप्रपाठकः ॥†

"स हि" स एव पूर्वं स्तुतएतादृशः "विरुक्मता" विशेषेण रोचनवता "ओजसा" ज्वाला-रूपेण बलेन "पुरुचित्"‡ अत्यधिकमेव "दीद्यानः" दीप्यमानः "द्रुहन्तरः" द्रोग्धॄणां तरिता निस्तारयिता भवति अस्मासु द्रोहं कुर्वतां शत्रूणां हिंसको भवतीत्यर्थः। तत्र दृष्टान्तः—"द्रुहन्तरः" द्रोग्धॄणां छेदनाय प्रयुक्तः "परशुः न" परशुरिव हिनस्ति तथायमपि¶ किंच, यस्याग्नेः "समृतौ" सङ्गतौ संयोगे§ "वीडुचित्" दृढमपि पाषाणादिकं "अवद्" गच्छेत् शीर्येत। तथा "यत् स्थिरं" यच्च पर्वतादि स्थिरमविचलितं तदपि अवत्। तत्र दृष्टान्तः—"वनेव" उदकमिव, उदकं यथाग्नि-संयोगे शुष्यति तथेत्यर्थः अत्यन्तदृढं स्थिरमपि हिनस्ति अस्मद्द्रोग्धारं शत्रुं हिनस्तीति किमु वक्तव्यमित्यभिप्रायः। किंचायमग्निः "निष्षहमाणः" शत्रून् निःशेषेणाभिभवन् "यमते" उप रमते शत्रुषु मध्ये

---

* ऋ० वे० २, १, १२, ३।

† सर्वमूलग्रन्थ-सम्मतोऽयं पाठः। तथाच यथावदीत्याद्यैव सायणीय विंशाध्यायस्य विरामः प्रतिपद्येत, स्याच्चैवमस्य द्वाविंशाध्याय-समाप्तिता, परन्त्वेदमाचार्येण तेन भाष्यकृता विवरण-कृता च नयनाञ्चलनैकवारमप्यवलोकितमिति कृतोऽयम्।

‡ 'चित्—इति पद-पूरणः'—इति वि०।

¶ 'परशुर्न—न-शब्दउपमार्थीयः, परशुरिव, यथा परशुर्द्रुहाणां छेत्ता, तद्वच्छत्रूणां छेत्ता'—इति वि०।

§ 'सम् ऋतौ—सङ्गतौ'—इति वि०।

क्रीड़ति तानेव नाशयति। तथा कुर्वन् "न अयते" न गच्छति शत्रोः सकाशान्न पलायते। तत्र दृष्टान्तः—"धन्वसहा न अयते" [धनुषा शत्रूनभिभवतीति धन्वसहाः] धानुष्कः [सहते रसुन्, छान्दसोऽन्त्य-लोपः] स यथा शत्रोरभिमुखं विध्यति न पलायते [यद्वा, दृढ़-धनुर्वहन-क्षमो धन्वसहाः, अस्मिन् पक्षे पचाद्यच् (३, १, १३४), "सुपां सु-लुक् (७, २, ३९),"—इत्याकारः दृढ़-धन्वा सन् न अयते न चलति॥ ३ ॥१८

अथाग्नेतवअवइति ऋचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

२ १ १ २ १ २ १२ १ २ ३ १ २
अग्नेतवश्रवोवयोमहिभ्राजन्तेअर्च्चयोविभावसो।

१२ १ १२ ३ १ २ ३ २ १२ ३ १ २
बृहद्भानोशवसावाजमुक्थ्यं*दधासिदाशुषेकवे॥ १॥

हे "अग्ने!" "तव" "वयः" अन्नं "अवः" अवणीयं प्रशस्यं हविरात्मकस्य तस्य मन्त्र-संस्कृतत्वेन प्रशस्तत्वात् अन्नेषु तवैवान्नं श्रेष्ठमित्यर्थः। हे "विभावसो" [विशिष्टा दीप्तिर्विभा सैव वसु धनं यस्य] तादृशाग्ने! "अर्चयः" दीप्तयः "महि" महत् बहुलं "भ्राजन्ते" दीप्यन्ते [भ्राजृ दीप्तौ, अनुदात्तो भौवादिकः]। हे "बृहद्भानो" प्रौढ-दीप्त! "कवे" क्रान्त-दर्शिन्नग्ने! एवम्महानुभावत्वं "शवसा" बलेनोपेतम् "उक्थ्यम्" प्रशस्यं [यद्वा,

* "उक्थ्यं"—इति ऋ०-पाठः।

† ऋ० वे० ८, ७, २८, १=यजु० वे० १२, १०६।

उक्थो यज्ञस्तद्योग्यं] "वाजम्" अन्नं "दाशुषे" हवींषि दत्तवते यजमानाय "दधासि" प्रयच्छसि ॥ १ ॥

अथ द्वितीया ।

३ १२ ३१२३ १२ ३१२ ३१२
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।

३२ ३१२ ३२३११ ११११ ३२
पुत्रो मातराविचरन्नुपावसि पृणक्षि रोदसी उभे ॥ २ * ॥

"पावकवर्चाः" शोधक-दीप्तिः "शुक्रवर्चाः" निर्मल-तेजस्कः, "अनूनवर्चाः" सम्पूर्ण-तेजस्कः, हे अग्ने ! ईदृशस्त्वं "भानुना" तेजसा "उदियर्षि" उद्गच्छसि [ऋ सृ गतौ, जौहोत्यादिकः (प०) "अर्त्ति-पिपर्त्योश्च (७, ४, ७७)"—इत्यभ्यासस्येत्वम् । स त्वं "पुत्रः" सन् "मातरा" मातृभूतयोर्द्यावापृथिव्योः "विचरन्" यागावसाने विशेषेण प्राप्नुवन् "उपावसि" उपगतान् यजमानान् रक्षसि । तथा "उभे" "रोदसी" द्यावापृथिव्यौ "पृणक्षि" संयोजयसि† ; हविषा द्युलोकं हृष्ट्वा इमं लोकञ्च पूरयसीत्यर्थः [पृची सम्पर्के रौधादिकः (प०)] ॥ २ ॥

अथ तृतीया ।

१२ ३२ ३१२ ३१२ ३२
ऊर्ज्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्वधीतिभिर्हितः ।

२३ ३१२ ३१२ ३१२ ३१२
त्वे इषः सन्दधुर्भूरिवर्पसश्चित्रो तयो वामजाताः ॥ ३ ‡ ॥

---

* ऋ० वे० ८, ७, २८, २=य० वे० १२, १०७।

† 'पृणक्षि—पूरयसि'—इति वि०।

‡ ऋ० वे० ८, ७, २८, ३=य० वे० १२, १०८।

हे "ऊर्जोनपात्" ऊर्जः अन्नस्य पार्थिवस्य अरण्यादेः पुत्र! हे "जातवेदः" जातानां वेदितरग्ने! "सुशस्तिभिः" सुशंसनैः अस्माभिः क्रियमाणैः "मदस्व" मोदस्व। तथा "धीतिभिः" अस्माभिः क्रियमाणैरग्निहोत्रादिभिः कर्मभिः "हितः" सुहितः तृप्तो भव। अपि च "भूरिवर्पसः" [वर्प इति रूपनाम (निघ० ३, ७, ३)] बहुविध-रूपाः,* "चित्रोतयः" चित्रा अतिस्तुत्यर्थाभिः इड्भिस्तुतीनाः,† "वामजाताः" वामं वननीयं जातं जन्म यासां ता ईदृश्यो‡ "ऊतयः" अन्नानि हविर्लक्षणानि "त्वे" त्वय्येव "सन्दधुः" सन्दधति सम्यक् जुह्वति यजमानाः [यद्वा, भूरिवर्पसइत्यादिकं कर्तृविशेषणम्, तदानीं चित्रोतय इत्यस्य विचित्र-रक्षाइति योज्यम्]। ३॥

अथ चतुर्थी।

३ १ २ ३ १ २ ३ १ २

दूरज्यन्नग्नेप्रथयस्वजन्तुभिरस्मेरायोऽमर्त्य।

१ २ ३ १ २ ३ १ २ १ २ ३ १ २ ३ १ २

सदर्शतस्यवपुषोविराजसिपृणक्षिदर्शतमङ्क्तुम्॥४§॥

हे "अग्ने! "जन्तुभिः" जातैः॥ शत्रुभिः सह "दूरज्यन्" ईर्ष्यान्न-स्पर्द्धां कुर्वन् [ईर् ईर्ष्यायां कण्ड्वादिः। यद्वा,

---

* 'भूरिवर्पसः—बहूनि रूपाणि'—इति वि०।

† 'चित्रोतयः—विचित्राणि पालनानि'—इति वि०।

‡ 'वामजाताः—वामानि शोभनानि जातानि यस्यासौ वामजाताः'—इति वि०।

¶ "सानसि"—इति ऋ-पाठः। § ऋ० वे० ७, ७, २८, ४।

॥ 'जन्तुभिः—इतीया-बहुवचनमिदं चतुर्थी-बहुवचनस्य स्थाने द्रष्टव्यम् जन्तुभ्यः'—इति वि०।

ैश्वर्यकर्मा (निघ० २, २१, १), जन्तुभिर्जायमानैरा-
ोभिरिरज्यन् ईश्वरो भवन्] हे "अमर्त्य" मरण-
! "अस्मे" अस्माकं ["सुपां सु-लुक् (७, १, ३९)"—
ा: शे-आदेश:] "राय:" धनानि "प्रथयस्व" विस्तारय
ऽच्छस: स्थाने व्यत्ययेन जस्, शस्येव वा व्यत्ययेन "ऊडि-
दम् (६, १, १७१)"—इत्यादिना विभक्त्युदात्तत्वं न क्रियते]
स त्वं "दर्शतस्य" दर्शनीयस्य च "वपुष:" तेजोमयस्य शरीरस्य
"वि राजति" [तृतीयार्थे षष्ठी (३, १, ८५)] ईदृशेन शरी-
रेण विशेषेण दीप्यसे [यद्वा, राजतिरैश्वर्य-कर्मा (निघ० २,
२१, ४), वपुरिति च रूप-नाम (निघ० ३, ७, ४), दर्शनीयेन
रूपेण विराजति विशेषेण ईशिषे]। अत एव "दर्शतं" दर्श-
नीयं "क्रतुं" कर्म "पृणक्षि" अस्माभि: सह पर्चयसि फलेन वा
संयोजयसि ॥ ४ ॥

अथ पञ्चमी ।

३ १ २ ३ २ १ २ ३ १ २ ३ १ २ ३ २
इष्कर्त्तारमध्वरस्य प्रचेतसङ्क्षयन्तꣳराधसो महः ।

१ २ ३ १ १ ३ १ २ ३ २ उ १ १ २ ३ १ ३ २
रातिं वामस्य सुभगाम्मꣳहीमिषन्धासिमानसिꣳरयिम् ॥५*॥

"इष्कर्त्तारं" निष्कर्त्तारं [छान्दसो वर्ण लोप: (३, १, ८५)]
"अध्वरस्य" यज्ञस्य निष्कर्त्तारं संस्कर्त्तारं, "प्रचेतसं" प्रकृष्ट-
ज्ञानं, "मह:" महत: "राधस:" धनस्य क्षयन्तम् ईश्वरम्
[क्षयतिरैश्वर्य-कर्मा (निघ० २, २१, ३)] "वामस्य" वननीयस्य

* ऋ० वे० ७, ७, २८, ५ ।

"रातिं" दातारं [रातेः कर्त्तरि क्तिन् (३, ३, ८६)] हे: पुत्र! स्तुम इति शेषः। स त्वं "सुभगां" सौभाग्योपेतां "म सुशंसनः तीम् "इषम्" अन्नं* "सानसिं" सम्भक्त-रूपम् "रयिं तिभिः" "दधासि" स्तोतृभ्यो ददासि ॥ ५ ॥ सहितः

अथ षष्ठी। घ०

३ १ २ ३ २ ३ १ १
ऋतावानमहिषंविश्वदर्शत

७ २ ३ १ २ ३ १ २ १ २
मग्निꣳसुम्नायदधिरेपुरोजनाः।

१ १ ३ १ २ ३ १ ७ ३ १ २ ३ २
श्रुत्कर्णꣳसप्रथस्तमन्त्वागिरादैव्यम्मानुषायुगा ॥ ६ † ॥ १

"ऋतावानं" सत्यवानं सत्यवन्तं यज्ञवन्तं वा‡ ["छन्दसि वनिपौ (५, २, १२२ वा०)"—इति मत्वर्थीयो वनिप्], "महिषं" महान्तं पूज्यं वा "विश्वदर्शनं" विश्वैः सर्वैर्दर्शनीयं [यद्वा, विश्वं दर्शनं यस्य "बहुव्रीहौ विश्वं सञ्ज्ञायाम् (६, २, ११६)" इति पूर्वपदान्तोदात्तत्वम्] इदृगम् "अग्निं" "सुम्नाय" सुखाय सुखार्थं "जनाः" ऋत्विग्यजमानरूपाः "पुरो दधिरे" पुरो दधते सर्वं कर्मभ्यः पुरस्तात् धारयन्ति [यद्वा, पुरः पुरस्तात् पूर्वस्यां दिशि आहवनीय-रूपेण धारयन्ति। पुरोऽर्चंः प्रत्यक्षकृतः]। अपिच हे अग्ने! "श्रुत्कर्णं" श्रुतः स्तुतीः सम्यक् शृण्वन् कर्णः

* 'दृषं—दृष्टिमन्नं वा'—इति वि०।

† ऋ० वे० ७, ७, २८, ६।

‡ 'ऋतावानम्—ऋतमन्नं वर्द्धनम्'—इति वि०।

यस्य तादृशं, "सप्रथस्तमम्" अतिशयेन प्रख्यातं
ितो विस्तार्यमाणं] "दैव्यं" देवानां हविर्वोढृत्वेन
न् ईदृशं "त्वा" त्वाम् "मानुषा" मानुषाणि मनोरप-
"युगा" "युगानि" युगलानि पत्नी-यजमान-रूपाणि*
गिरा" स्तुत्या स्तुवन्तीति शेषः ॥ ३ ॥ १९ (१)

इति सामवेदार्थप्रकाशे उत्तरग्रन्थस्य विंशस्याध्यायस्य
पञ्चमः खण्डः ॥ ५ ॥

अथ षष्ठे खण्डे—

प्रसोअग्नेइति प्रगाथात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१र २र३ २ १ १ १ ३ १ २ २ १ २
प्रसोअग्नेतवोतिभिःसुवीराभिस्तरतिवाजकर्मभिः।

२ ३ १ २ १र २र
यस्यत्वꣳसख्यमाविथ ॥ १ † ॥

हे "अग्ने!" "तव" "ऊतिभिः" "सः" यजमानः "प्र तरति" प्रवर्द्धते ऊतयो विशिष्यन्ते—"सुवीराभिः" शोभनाः वीराः पुत्रादयो यासु ताभिर्योक्षाभिः, "वाजकर्मभिः" वाजानामन्नानां वा कर्म कारणं यासु तादृशीभिः; हे अग्ने "त्वं" "यस्य" यजमानस्य "सख्यं" सखित्वं मित्रत्वम् "आविथः" प्राप्नोषि स तरतीत्यन्वयः ॥ १ ॥

---

* 'युगा—योजयित्वा यजमानेन'—इति वि०।

† ऋ० सा० १, १, ३, २ (१भा० २७६प०) = ऋ० वे० ६, १, २४, ५।

अथ द्वितीया।

१२१ १२ २२ ३ २ ३ २३१२ ३ १ ५
तवद्रप्सोनीलवान्वाशऋत्वियइन्धानःसिष्णवादद
१ ३ १ २ ३१२ ३१ ३१२ २२
त्वम्महीनामुषसामसिप्रियःक्षपोवस्तुषुराजसि ॥ २ * ॥ घ०

हे "सिष्णो!" [सिषिः सेचनार्थः] सोमेनासिच्यमानाग्ने "द्रप्सः" द्रवण-शीलः, "नीलवान्" प्रकट-नीलेऽवस्थानात् तद्वान्, "वाशः" कान्तः शब्दायमानो वा, "ऋत्वियः" ऋतौ वसन्तादि-काल-विशेषे भवः, "इन्धानः" सन्दीपयन्, एवम्भूत स्त्वं सोमः "आ ददे" तुभ्यं होमायायुर्णा आदीयते। अपिच त्वं "महीनां" महतीनाम् "उषसां" "प्रियः" मित्रभूतः "असि" [उषसि हि अग्नयो होमाय प्रज्वाल्यन्ते]। तथा "क्षपः" क्षपाया रात्रेः सम्बन्धिषु "वस्तुषु" आच्छादकेषु तमस्सु सत्सु त्वं "राजसि प्रकाशयसे [अहा, रात्रि-सम्बन्धीनि वस्तूनि पदार्थ-जातानि त्वं प्रकाशयसि ॥ २ ॥ २० (२)

अथ तमोषधीर्दधिरे-इति एकर्चं द्वितीयं सूक्तम्,

सा ऋगेषा।

१२ २२ ३ १२३ १३
तमोषधीर्दधिरेगर्भमृत्विय
१२ १२३१२ ३१२
न्तमापोअग्निञ्जनयन्तमातरः।

* ऋ० वे० ६, १, ३५, १।

१र २र३ २३ १२ ३ २२
तमित्समानंवनिनश्चवीरुधो
१२ ३१२ ३१२
न्तर्वतीश्चसुवतेचविश्वहा ॥ १ * ॥ ३

"ऋत्वियम्" ऋतौ प्राप्तं "गर्भं" गर्भभूतं "तं" प्रकृतम् "अग्निम्" "ओषधीः" ओषध्यः "दधिरे" धारयन्ति। "तम्" एव अग्निं "मातरः" धारकत्वेन मातृस्थानीयाः "आपः" "जनयन्त" जनयन्ति। किञ्च, "वनिनः" वनस्पतयः "च" "समानं" गर्भभावेन प्रवेशात् तत्तुल्यत्वम् "तमित्" † तमेवाग्निम् "अन्तर्वतीः" गर्भभवाः "वीरुधः" ओषधयश्च "विश्वहा" सर्वदा "सुवते" जनयन्ति ॥ १ ॥ २१ (३)

अग्निरिन्द्रायेति द्वतीयं सूक्तम्,

सा ऋगेषा।

३१र २र ३ २ ३१र २र
अग्निरिन्द्रायपवतेदिविषुक्रोविराजति।
१२ ३१२
मर्त्तिषोवविजायते ॥ १ ‡ ॥ ४

"अग्निः" यज्ञेषु प्रथमं प्रणेता अग्निः "इन्द्राय" इन्द्रार्थं "पवते" अस्माभिर्दत्तेन चर्वन्नेन पुरोडाशेन देवानामधिकः

---

* ऋ० वे० ८, १, २१, १।

† 'इत्—इति पद-पूरणः'—इति वि०।

‡ नेयमन्यत्र क्वापि दृश्यते।

चरति। अग्निः "शुक्रः" दीप्तः सन् "दिवि" स्वर्गे "वि राजति" विशेषेण प्रकाशयति [यद्वा, 'दिवि' अन्तरिक्षादि-लोकेषु स्थितेषु देवेषु मध्येषु 'शुक्रः' दीप्तः सन् 'विराजति']। तत्र दृष्टान्तः—"महिषीव" यथा महिषी तृणादिना विविधानि पयोघृतादीनि जनयति तथा "वि जायते" देवानामुपभोगार्थं विविधान्नानि जनयति॥ १ ॥ २२ (४)

अथ योजागारेति एकर्चं चतुर्थं सूक्तम्,

सा ऋगेषा।

२ १ २ ३१२ २२ ३
योजागारतमृचःकामयन्ते
२ ३ २ ३२३१ २
योजागारतमुसामानियन्ति।
२ ३ १ ३१३१२ २२
योजागारतमयꣳसोम
२ २३ १२ ३ १ १
आहतवाꣳमस्मिसख्येन्योकाः॥ १ *॥ ५

"यः" देवः "जागार" सर्वदा विनिद्रो जागरूको गृहे वर्त्तते "तम्" "ऋचः" सर्वं-यस्तात्मिकाः "कामयन्ते"। "यः" "जागार" "तम् उ" तमेव "सामानि" स्तोत्र-रूपाणि "यन्ति" प्राप्नुवन्ति। "यः" "जागार" "तम्" "अयम्" अभिषुतः "सोमः" "आह" वक्ति स्वीकुर्विति। हे अग्ने! तादृशस्य "तव" "सख्ये"

* ऋ० वे० ५, २, १५, ४।

समान-ख्याते हित-करणे "न्योकाः" नियत-स्थानः "अहम्" "अस्मि" भवामि ॥ १ ॥ २३ (५)

अथाग्निर्जागारेत्येकर्चं पञ्चमं सूक्तम्,

सा ऋगेषा।

१ १ २, २ १ २ २ ३
अग्निर्जागारतमृचःकामयन्ते
१ २ २ २ ३ १ २
ग्निर्जागारतमुसामानियन्ति।
३ १ २ ३ २ ३ १ २ २ ३
अग्निर्जागारतमयꣳसोमआह
२ ३ १ २ ३ १ २
तवाहमस्मिसख्येन्योकाः ॥ १ * ॥ ६

सा निगद-व्याख्याता (१३) ॥ १ ॥ २४ (६)

अथ नमःसखिभ्यइति ह्यचात्मकं षष्ठं सूक्तम्,

तत्र प्रथमा।

१ १ ३ १ १ ३ १ ३ १ २ ३ २ ३
नमःसखिभ्यःपूर्वसद्भ्योनमःसाकन्निषेभ्यः।
३ १ २ २ ३ १ २
युज्जेवाचꣳशतपदी ॥ १ † ॥

---

* ऋ० वै० ४, १, २५, ५।

† नेयमन्यत्र क्वापि दृश्यते।

"पूर्वसद्भ्यः" ये यज्ञे प्रारम्भात् पूर्वं सोदन्ति तिष्ठन्तीति पूर्व-सदनं तेभ्यः "सखिभ्यः समान-ख्यानेभ्यः सखिवन्मित्रभूतेभ्यो देवेभ्यो "नमः" वयं नमस्कारं कुर्म्म *। किञ्च, "साकन्निषेभ्यः" यस्मिन् यज्ञे सह निषस्तेभ्यः "नमः"। किञ्च "शतपदीम्" अस्मभ्यं फल-प्रदानाय अपरिमित-मार्गां "वाचं" स्तुति-रूपाम् ऋचं "युञ्जे" योजयामि ॥ १ ॥

अथ द्वितीया।

३ १र २र ३ १ १ ३ १ २ १ १ २
युञ्जेवाचꣳशतपदीङ्गायेसहस्रवर्त्तनि।

३ १र २र ३ १ २
गायत्रन्त्रैष्टुभञ्जगत्॥ २ †॥

"शतपदीम्" अपरिमित-सङ्ख्याक-मार्गां‡ "वाचं" स्तोत्रं "युञ्जे" तेभ्यः प्रकृतेभ्यो वक्ष्यमाणेभ्योऽहं योजये। "गायत्र" गायत्राख्यं¶ "त्रैष्टुभं" त्रैष्टुभाख्यञ्च "जगत्" जागतञ्च साम-रूपां तामृचं साम वा "सहस्रवर्त्तनि" अपरिमित-मार्गं यथा भवति तथा "गाये" अहं गानं करोमि ॥ २ ॥

---

* 'नमः सखिभ्यः ऋत्विग्यः पूर्वसद्भ्यः—पूर्व-सदसि उपरिष्टात्तेभ्यो नमः'—इति वि०।

† नैषाऽन्यत्र क्वापि श्रूयत।

‡ 'शतपदी-ऋक्'—इति वि०।

¶ 'गायत्रं प्रातःसवनम्, त्रैष्टुभं माध्यन्दिनं सवनम्, जागतं तृतीयं सवनम्'—इति वि०।

अथ तृतीया।

३ १र २र ३२ ३ १ १ ३ २ ३ १ १
गायत्रन्त्रैष्टुभञ्जगद्विश्वारूपाणिसम्भृता।

३ १र २र ३२
देवाओकाꣳसिचक्रिरे ॥ ३ * ॥ ७

"गायत्रं", "त्रैष्टुभं", "जागतम्"—"ऋक्समूहं" "विश्वा" विश्वानि "रूपाणि" उक्तानि "सम्भृता" सम्भृतानि नानारूपाणि कृतानि "देवाः" अग्न्यादयश्च "ओकांसि" आश्रितानि स्थानानि "चक्रिरे" कुर्वन्ति† ॥ ३ ॥ २५ (७)

अथाग्निर्ज्योतिरिति तृचात्मकं सप्तमं सूक्तम्,‡

तत्र प्रथमा।

३ २उ ३ १ २ ३ २उ ३ २ ३ १ २
अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रोज्योतिर्ज्योतिरिन्द्रः।

२ ३ २ ३ २ ३ १ २
सूर्य्योज्योतिर्ज्योतिःसूर्यः ॥ १ ¶ ॥

एषा स्पष्टा§ ॥ १ ॥

---

* इयमपि नान्यत्रोपलभ्यते।

† 'चक्रिरे—कृतवन्तः इति वि०। 'विश्वरूपा उक्ताः'—इति च वि०।

‡ 'इदानीं ज्योतींषि ज्योतिष्टोमे'—इत्यादि वि०।

¶ य० वे० ३, ९।

§ अत्रेयं मन्त्रोधरव्याख्या—"अथाग्निहोत्र-होम-मन्त्राः। अग्निर्ज्योतिरित्यारभ्य यत्र इत्यतः प्राक्। सप्तमन्त्राणां प्रजापतिर्ऋषिः सामान्यतः। यत्र ऋषि-विशेषो-

अथ द्वितीया।

१ १ ३ १९ २२ ३ १ १ ३ १ २
पुनरूर्जानिवर्त्तस्व पुनरग्न इषायुषा।

१ २ ३ १ २
पुनर्नः पाह्यꣳहसः ॥ २ * ॥

हे "अग्ने!" "ऊर्जा" बलेन "इषा" अन्नेन "आयुषा" जीवनेन च "पुनः" अस्मान् "निवर्त्तस्व" अस्मान् प्रत्यागच्छ।

ऽभीधीयतेऽतुक्रमणीकारैश्च द्वावृषी। यथाग्निर्चौ द्वे तच्चापश्यत् परां जीवन्यैलकिरिति (ऋतु० १, ११)। सप्त लिङ्गोक्त-देवता गायत्र्यः आद्याः पञ्चैकपदाः। अग्निर्ज्योतिः सूर्य्यो ज्योतिः एते द्वे एकपदे गायत्र्यौ तच्चा मुनिरपश्यत्। परां ज्योतिः सूर्य्य रमां चेलकस्य पुत्रो जीवन्य ऋषिरपश्यदित्यर्थः। अथ का० प्रदीप्तामभि जुहोत्यग्निर्ज्योतिरिति (४, १४, १४३)। या समित् प्रदीप्ता तामभिलक्ष्य जुहुयात्। अग्निर्ज्योतिषमिति (३, २, १) काण्वशाखोक्त-मन्त्रेण समित्प्रक्षेपः। मन्त्रार्थस्तु—योऽयमग्निर्देवः स एव ज्योतिर्दृश्यमान ज्योतिःस्वरूपम्। यश्चेदं दृश्यमानं ज्योतिः सदेवाग्निर्देवः। देवस्य ज्योतिषश्च कदाचिदप्यवियोगादेकत्वेन प्रतिपादनम्। स्वाहा ज्योतीरूपायाग्नये हविः प्रदत्तम्। अयं सायंकालीनोऽग्निहोत्र-होम-मन्त्रः॥ सूर्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहेति प्रातर्होमन्त्रः सायंहोममन्त्रवद्व्याख्येयः। सूर्य-सम्बन्धि तेजो राचावग्निं प्रविशतीति सायमग्निर्ज्योतिरिति मन्त्रो युक्तः उदय-कालेऽग्नि-सम्बन्धि ज्योतिः सूर्यं प्रविशति। तस्मात् प्रातः सूर्य्यो ज्योतिरिति मन्त्रः। अग्निमादित्यः सायं प्रविशति तस्मादग्निर्दूरात्तं दहति। उभे हि तेजसी सम्पद्येते उद्यन्तं वादित्यमग्निस्तु समारोहति। तस्मादहम एवाग्निर्दिवा दहति तिग्मिरिःश्रुतेः। का० अग्निर्वर्च इति ब्रह्मवर्चसकामस्येति (४, १४, १५)। ब्रह्मवर्चसकामस्तु अग्निर्वर्चः सूर्यो वर्च इति सायं प्रातश्च जुहुयात्। योऽग्निर्वर्चोऽनन्यभूतः। यस्य तज्ज्योतिर्वर्चोऽनन्यभूतम्। तस्मै सुश्रुतमस्तु। एवं सूर्यो वर्च इति"॥

* य० वे० १२, ९।

किञ्च त्वं "नः" अस्मान् "अंहसः" पापात् "पाहि" पालय। पुनः-शब्दस्याऽऽवृत्तिरादरार्था* ॥ २ ॥

अथ तृतीया।

३ २ ३ १ २ १ २ ३ २ २ १ २ ३ १ २
सचस्यानिवर्त्तस्वाग्नेपिन्वस्वधारया।

३ १ २ १ २ ३ १ २
विश्वप्स्नयाविश्वतस्परि ॥ ३ † ॥ ८

हे "अग्ने!" त्वं "रय्या" रमणीयेन धनेन "सह" "निवर्त्तस्व" तत् अस्मान् प्रापयेत्यर्थः। किञ्च, "विश्वतः" सर्वतः "परि" उपरि [परीति समन्ययर्थानुवादकः] "विश्वप्स्नया" [प्सा भक्षणे (अदा० प०)], विश्वस्य उपभोक्त्र्या‡ "धारया" "पिन्वस्व" अस्मान् सिञ्च¶ ॥ ३ ॥ २६ (८)

इति सामवेदार्थप्रकाशे उत्तरग्रन्थस्य विंशस्याध्यायस्य षष्ठः खण्डः ॥ ६ ॥

---

* अस्याग्रवर्त्तस्वेः-पाठो भगवन्मतुला विद्विनो ब्रह्मचारि-खम्र-रेतः-चरणे—तथाहि—"खम्रे खित्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् (२, २८१)"—इति।

† य० वे० १२, १०।

‡ 'विश्वप्स्नया विश्वव्यापिन्या धारया'—इति वि०।

¶ 'वैराजपृष्ठे चतुर्थेऽह्नि एवं श्रूयते—"स वैराजममसृजत, सदग्ने वीर्योऽस्यसृजते, तमत्यग्निमन्थः, एतदनुमन्त्रणम्"—इति'—इति वि०।

अथ सप्तमे खण्डे—

यदिन्द्राहंयथात्वमिति ऋचात्मकं प्रथमं सूक्तम्,

तत्र प्रथमा।

१ २ ३ २उ ३ १र २र ३ २ ३ १ ३ २
यदिन्द्राहंयथात्वमीशीयवस्वएकइत्।
३ १ ३ १ २
स्तोतामेगोसखास्यात्॥ १ * ॥

हे "इन्द्र!" "यथा" "त्वम्" "एकइत्" एकएव केवलं "वस्वः" वसुनः धनस्य "ईशिषे" ईश्वरो भवसि, एवमहमपि "यद्" यदि "ईशीय" ऐश्वर्य्य-युक्तः स्यामिति तदानीं "मे" मम "स्तोता" "गोसखा स्यात्" गोभिः सहितो भवेत्। ईश्वरस्य तव स्तोता कुतो हेतोर्गौ-सहितो न भवेत् अपितु भवेदेवेत्यभिप्रायः॥ १॥

अथ द्वितीया।

१ २ ३ १ २ ३ १ २ ३ १ १
शिक्षेयमस्मैदित्सेयंशचीपतेमनीषिणे।
२ ३ १र २र ३ १
यदहंगोपतिःस्याम्॥ २ †॥

---

* ऋ० आ० २, १, ३, ८ (१भा० ३०२पृ०) = ऋ० वे० ६, १, १४, १।

† ऋ० वे० ६, १, १४, १।

हे "शचीपते" शक्तिमन्निन्द्र! "अस्मै" "मनीषिणे" मनस ईशित्रे स्तोत्रे "दित्सेयं" दातुमिच्छेयम्, तदनन्तरं "शिक्षेयं" प्रार्थितं धनं दद्याश्च "यद्" यदि "अहं" "गोपतिः" गवामधिपतिः त्वत्प्रसादात् भवेयम्॥ २॥

अथ तृतीया।

३ १२ ३ १ ३ १ २ ३ २
धेनुष्टइन्द्रसूनृतायजमानायसुन्वते।

१२ २२ ३ १०
गामश्वम्पिप्युषीदुहे॥ ३ *॥ ९

हे इन्द्र! "ते" तव "सूनृता" स्तुति-रूपा वाक् "धेनुः" दोग्ध्री गौर्भूत्वा "सुन्वते" सोमाभिषवं कुर्वते "यजमानाय" "गाम्" "अश्वं" च [उपलक्षणमेतत्] गवाश्वादिकं सर्वमभिलषितं "दुहे" दुग्धे। किङ्कुर्वती? "पिप्युषी" तमेव यजमानं प्रवर्द्धयित्री॥ ३॥ २७ (९)

आपोहिष्ठेति तृचात्मकं द्वितीयं सूक्तम्,

तत्र प्रथमा।

३ १२ २२ ३ ३ ३ १ ३३ १ २
आपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातन।

३ १२ २२ ३ १ २
महेरणायचक्षसे॥ १ †॥

---

* ऋ० वे० ६, १, १४, ३।

† ऋ० वे० ७, ६, ५, १ = य० वे० ११, ३०।

"हि" यस्मात् कारणात् "आपः" या यूयं "मयोभुवः" मयसः सुखस्य भावयित्र्यः "स्थ" भवथ, "ताः" तादृश्यो यूयं "नः" अस्मान् "ऊर्जे" अन्नाय "दधातन" धत्त अन्न-प्राप्ति-योग्यान-स्मान् कुरुत अन्नमस्मभ्यं दत्तेत्यर्थः "महे" महते "रणाय" रमणीयाय "चक्षसे" दर्शनाय सम्यक् ज्ञानं प्रति योग्यान् कुरुतेत्यर्थः ॥ १ ॥

अथ द्वितीया।

१२ २ १ १ २ २ १ १ २ १ १ १
योवः शिवतमोरसस्तस्य भाजयतेहनः।

३ १ २ १ १ २
उशतीरिव मातरः ॥ २ † ॥

हे आपः "वः" युष्माकं स्वभूतः "यः" "रसः" "शिवतमः" सुखतमः "इह" अस्मिन् लोके "तस्य" तं रसं "नः" अस्मान् "भाजयत" सेवयत उपयोजयतेत्यर्थः। तत्र दृष्टान्तः—"उश-तीरिव" पुत्र-समृद्धिं कामयमानाः "मातरः" स्तन्यं रसं यथा भाजयन्ति प्रापयन्ति तद्वत् ॥ २ ॥

---

* अत्रेयं निगद-व्याख्या—'आपोहि स्थ सुखभुवस्ता नोऽन्नाय धत्त महते च नो रणाय रमणीयाय च दर्शनाय"—इति ऐ० ३, १७।

† ऋ० वे० ७, ६, ५, २ = य० वे० ११, ५१।

अथ तृतीया ।

२ २ १ २ ३ २ ३ १ २ १ १ २
तस्माअरङ्गमामवोयस्यक्षयायजिन्वथ ।

१ २ ३ १ २
आपोजनयथाचनः ॥ ३ * ॥ १०

हे "आपः !" यूयं "यस्य" पापस्य "क्षयाय" विनाशायं† "जिन्वथ" अस्मान् प्रीणयथ, "तस्मै" तादृशाय पाप-क्षयाय "अरं" क्षिप्रं "वः" युष्मान् "गमाम" गमयामास वयं गिरसि प्रक्षिपामेत्यर्थः [यद्वा, यस्मात्तस्य क्षयाय निवासार्थं यूयमोषधी-र्जिन्वथ तर्पयथ, तस्मै तदन्नमुद्दिश्य वयमलं पर्याप्तं यथा भवति तथा वो युष्मान् गमाम गच्छाम] । किञ्च, हे आपः ! "नः" अस्मान् "जनयथ" पुत्र-पौत्रादि-जनने प्रयोजयतेत्यर्थः‡ ॥ ३ ॥ २८ (१०)

अथ वातआवातिति ऽचात्मकं चतुर्थं सूक्तम्¶,

तत्र प्रथमा ।

२ ३ १ २ ३ १ ३ १ २ ३ १ २ ३
वातआवातुभेषजꣳशम्भमयोभुनोहृदे ।

२ ३ १ २
प्रनआयूꣳषितारिषत् ॥ १ ¶ ॥

---

* ऋ० वे० ७, ६. ५, २ = य० वे० ११, ५२ ।

† 'क्षयाय—क्षयो निवासः । क्षयाय चतुर्थी सप्तम्याः स्थाने द्रष्टव्या'—इति वि० ।

‡ 'षष्ठ्यर्थे चतुर्थ्यभिधेयोपाकुर्युः । * * * । आपोऽस्मिन्योभिः'—इति वि० ।

¶ ऋ० आ० २, २, ४, १० (१भा० ४०७पृ०) = ऋ० वे० ८, ८, ४५, १ ।

"वातः" वायुः "नः" अस्माकं "हृदे" हृदयाय "भेषजम्" औषधम् उदकं वा "आ वातु" आगमयतु। कीदृग्भूतम्? "गव्भु" रोग-गमनस्य भावयित्र, "मयोभु" मयः सुखस्य च भावयित्र। अपिच "नः" अस्माकम् "आयूंषि" अन्नानि वा "प्र तारिषत्" प्रवर्द्धयतु॥ १॥

अथ द्वितीया।

३ १ १ ३१ १ ३२उ ३ २ ३ १ २
उतवातपितासिनउतभ्रातोतनःसखा।

१ २ ३ १ २
सनोजीवातवेकृधि॥ २ *॥

"उत" अपिच हे "वात!" त्वं "नः" अस्माकं "पिता असि" उत्पादकोऽसि पालयिता वा। "उत" अपिच "भ्राता" असि। "उत" अपिच "नः" अस्माकं "सखा" समान-ख्यानश्च असि। "सः" त्वं "नः" अस्मान्† "जीवातवे"‡ जीवन-हेतवे यागाय "कृधि" कुरु [करोतेर्श्लुन्दसो विकरणस्य लुक् (२, ४, ७३), "श्रु-शृ-णु-पॄ-कृ-वृभ्यश्छन्दसि (६, ४, १०२) —इति हेर्धिरादेशः॥ २॥

---

* ऋ० वे० ८, ८, ४५, २।

† 'नः—अस्मभ्यम्'—इति वि०।

‡ "तुमर्थे से-सेनसेन्-कसे-कसेनध्यै-अध्यैन्-कध्यै कध्यैन्-अध्यैन्-तवै-तवेङ्-तवे (३, ४, ९)"—इति पा०।

अथ तृतीया ।

२ १ १ २ १ २ २ १ १ २ १ १ २
यदद॑ो वात ते गृ॒हेऽ३ऽमृत॑स्य नि॒हित॑ङ्गु॒हा ।

१ १ ३ १ २
तस्य॑नो धेहि जीवसे ॥ ३ * ॥ ११

हे "वात" वायो ! "ते" तव "गृहे" स्थाने "यददः" यदिदम् "अमृतस्य" [कर्मणि षष्ठी (३, १, ८५)] अविनाशि "गुहा" गुहायां गह्वरे† हितं निहितं वर्त्तते । हे "विभावसो" विशिष्ट प्रकाश-धनवन् ! वायो ! "तस्य" तद्धनं [कर्मणि षष्ठी (३, १, ८५)] "नः" अस्माकं "धेहि" देहि प्रयच्छेत्यर्थः‡ ॥ ३ ॥ २९ (११)

अथाभिवाजीति ऋचात्मकं चतुर्थं सूक्तम्,¶

तत्र प्रथमा ।

२ १ १ ३ १ १ २ ३ १ १
अ॒भिवा॑जो॒ विश्व॑रू॒पो॒ज॒नित्र॒ए

२ १ १ २ १ १ २ १ १
हि॒र॒ण्य॒य॒म्बि॒भ्र॒दत्क॒ए॒सु॒प॒र्णः ।

---

* ऋ० वे० ८, ८, ४५, १ ।

† 'गुहा—हृत्पुण्डरीके निहितम्'—इति वि० ।

‡ 'मृतीयेऽस्मि विरूप-पृष्ठे विनियोगः । वातत्वावालिति तृचेनाद्यमन्त्रयेत्'—इति वि० ।

¶ 'अनाम्नातस्य शास्त्र, तेनोद्धायेत् यदभिवाजीति ऋच इति वि० ।

१२ ३ १२३१२ १२३
सूर्य्यस्यभानुमुतुथावसानः
१२३१२ २२३ १ १
परिस्वयम्मेधमृजोजजान ॥ १ * ॥

"सुपर्णः" सुपतनः शोभन-पतनो गरुत्मान् इव, "वाजी" वेगवान् बलवानन्नवान् वा, "विश्वरूपः" नानाविध-प्रकाशः, सन्हि चित्रभानुः "ऋज्यः" [ऋजी भर्जने (स्वा० आ०), भ्रस्ज-पाके (तु० उभ०), ऋजति भृज्जति पचतीति ऋज्यः] अग्निः सः स्वकीयं "जनित्रं" जनन-स्थानम् अरणि-बिलम् "अक्रम्" स्व-तेजसा व्याप्तम् अतएव "हिरण्ययं" हिरण्मयमिवं स्थितम् "अभि" अभितः/साकल्येन "बिभ्रत्" पश्यन् "सूर्यस्य भानुम्" सवितुः प्रकाशम् "ऋतुथा" कालेकाले रात्रौ "वसानः" वस्त्र-यदाच्छादयन् ["अग्निर्वादित्यं सायं प्रविशति तस्मादग्नि र्दूरात्रक्षं दृष्टम्"—इति श्रुतेः] "मेधं परि" यज्ञं लक्ष्योकृत्य स्वयं "जजान" उपदधत ॥ १ ॥

अथ द्वितीया।

१ १२ २२ ३ १ १ ३
अप्सुरेतःशिश्रिये विश्वरूपं
१ १ ३ १७ ३ १ १ ३ १ २
तेजःपृथिव्यामधियत्समभूव।
३ १ १ ३ १ २ ३ २ ३ १ २ ३
अन्तरिक्षेस्वम्महिमानम्मिमानः
१२ १ ३ २ ३ १ २ ३ १ २
कनिक्रन्तिवृषणोअश्वस्यरेतः ॥ २ † ॥

* मेधमन्यत्र क्वापि दृश्यते। † दृषमपि क्वान्यत्र।

"रेतः" सारभूतं "विश्वरूपं" नानारूपं "यत्" अन्नात्मकं "तेजः" "अप्सु" "शिश्रिये" आश्रयते ["स नि लीयते सोमः प्राविशत्"—इति श्रुतेः] यच्च "पृथिव्यामधि" भूमौ "सम्बभूव" तिष्ठति ["अग्निः पृथिवी-स्थानः (निरु०दै०१, १४)"—इति हि निरुक्तम्]। सः "अन्तरिक्षे" आकाशे "स्वं" महिमानं" किरण-जालं "मिमानः" व्यापारयन् "हुण्डः अश्वस्य रेतः" सोमाहुतिं प्रति ["सोमो हुण्डो अश्वस्य रेतः"—इति श्रुतेः] "कनिक्रन्ति" याचमान इव पुनः पुनः क्रन्दते शब्दं करोति, यद्वा अन्नमयन्निव भृशं शब्दायते ॥ २ ॥

अथ तृतीया।

१२ ३२३ १२३ १२ २२३
अयꣳसहस्रापरियुक्तावसानः

१२ २२३१२
स्वयंस्रुभानुंयज्ञोदाधार।

३ १ १३१ २३१ १
सहस्रदाःशतदाभूरिदावा

३ २ ३१२ १२ २१ २
धर्त्तादिवोभुवनस्यविश्पतिः ॥ ३ * ॥ १२

"दिवः" स्वर्गस्य अथ "भुवनस्य" भूतजातस्य लोकस्य "धर्त्ता" धारयिता, "विश्पतिः" विशां प्रजानां पालयिता,

---

* नैवाण्यत्र।

"सहस्रदाः शतदाः भूरिदा वा" यो यावत् प्रार्थयते सहस्रं शतं भूरि अपरिमितं वा तस्मै तस्मै तावद्दाता "यज्ञः" यजति यः "अयम्" अग्निः "युक्ता" युक्तानि स्वात्मना सम्बद्धानि "सहस्रा" सहस्राणि स्वकीय-किरण-जालानि "परिवसानः" परितः आच्छादयन् "सूर्यस्य भानुं" रात्रौ सूर्यस्यापि प्रकाशं "दधार" स्वयमेव धारयति ॥ ३ ॥ ३० (१२)

नाकेसुपर्णमिति हृचात्मकं सूक्तम् पञ्चमम्,*

तत्र प्रथमा।

१ २ ३ १ ३ २ १ २ २ र
नाकेसुपर्णमुपयत्पतन्तꣳ

३ १ २ २ र ३ १ २
हृदावेनन्तोऽभ्यचक्षतत्वा।

१ २ ३ १ २ ३ २
चिरण्यपक्षंवरुणस्यदूतं

३ २ ३ १ २ ३ १ २ ३ १
यमस्ययोनौशकुनम्भुरण्युम् ॥ १ † ॥

हे वेन! "त्वा" त्वां "हृदा" हृदयेन मनसा "वेनन्तः" कामयमानाः स्तोतारः "नाके" अन्तरिक्षे "अभ्यचक्षत" अभि पश्यन्त। तदानीं त्वमुपागच्छसीति शेषः। कथम्भूतम्?

---

* 'इदानीं परिसदीऽग्नयेषु यदेतेषु त्रिषु यज्ञपात्रेषु त्रिः छन्दोगः परिगायेत् नाकेसुपर्णमिति'—इति वि०।

† ऋ० भा० ४, १, २, ८ (१भा० १४५पृ०)=ऋ० वे० ८, ७, ८, ३।

"सुपर्णः" शोभन-पतनः, "पतन्तम्" अन्तरिक्षे गच्छन्तं, "हिरण्य-पक्षं" हिरण्मयाभ्यां पक्षाभ्यामुपेतं, "वरुणस्य" जलाभिमानी देवस्य "यमस्य" नियामकस्य वैद्युताग्नेः "योनौ" स्थानेऽन्तरिक्षे "शकुनं" पक्षिरूपेण वर्त्तमानं "भुरण्युं" भर्त्तारं [यद्वा, वृष्टि-प्रदानादिना सर्वस्य जगतः पोषकम्। भुरण धारण-पोषणयोः कण्ड्वादिः, अस्मादौणादिक यु प्रत्ययः ॥ १ ॥

अथ द्वितीया ।

३ १ २ ३२उ ३ १ १ ३ २
ऊर्ध्वोगन्धर्वोअधिनाकेअस्थात्

३ २ ३ १र २र ३ १ २
प्रत्यङ्चित्राबिभ्रदस्यायुधानि ।

१ २ ३ १ २ ३ २ ३ १
वसानोअत्कं सुरभिन्दृशेकं

१र २र २ १ २
स्वाऽऽर्णनामजनतप्रियाणि ॥ २ * ॥

"ऊर्ध्वः" उपरि देशे वर्त्तमानः "गन्धर्वः" गवामुदकानां धर्त्ता† ["गवि भृजो वः"—इति गो-शब्दोपदात् भृञ् आधारणे (भ्वा०उ०)—इत्यस्मात् व-प्रत्ययः उपपदस्य गन्धावश्च] ईदृशो वेनः "प्रत्यङ्" अस्मान् प्रपद्यन्नभिमुखः सन् "नाके अधि" अन्तरिक्षे "अस्थात्" तिष्ठति। किंकुर्वन् ? "अस्य" आत्मनः स्वभूतानि "चित्रा" चित्राणि आश्चर्य्यभूतानि वा "आयुधानि" "बिभ्रत्" धारयन् [बिभर्त्तेः शतरि "भृञा-

* ऋ० वे० ८, ७, ८, ४ ।

† 'गन्धर्वः—गोयमान ऋग्यजु-सामभिः'—इति वि० ।

मित् (७, ४, ७६)"—इत्यभ्यासस्येत्वम्, "नाभ्यस्ताच्छतुः (७, १, ७८)"—इति नुम्-प्रतिषेधः, "अभ्यस्तानामादिः (६, १, १८९)"—इत्यादि रुदात्तः], तथा "सुरभिं" शोभनम् "अत्कम्" आत्मीयं व्याप्तं रूपं "वसानः" सर्वत्राच्छादयन्। किमर्थम्? "दृशे" दर्शनार्थम् ["दृशेविख्ये च (३, ४, ११)"—इति निपात्यते]। "कम्" [—इति पूरकम्] तत्र दृष्टान्तः—"सूर्यः" शोभनारुण आदित्यः स यथा आत्मीयं रूपं दर्शनाय सर्वत्राच्छादयति तद्वत्। तदनन्तरं "नाम" नामानि नमनशीलान्युदकानि "प्रियाणि" सर्वेषामनुकूलानि "जनयत" जनयति वृष्टि-मुत्पादयतीत्यर्थः॥ २॥

अथ तृतीया।

११ २३ २११ २१३
द्रप्सःसमुद्रमभियज्जिगाति
२३ ११ २१२३ १ १
पश्यन्गृध्रस्यचक्षसाविधर्मन्।
३ २ ३ १२३ १२ ३ २
भानुःशुक्रेणशोचिषाचकान
२१२ ३१२ ३१ २
स्तृतीयेचक्रेरजसिप्रियाणि॥ ३ *॥ १३

"विधर्मन्" विधर्मणि विधारकेऽन्तरिक्षे स्थितः "द्रप्सः" द्रवणशीलः† [यद्वा, द्रप्सा विन्दवः तद्वान्, अर्शआदित्वादच् (५,

* ऋ० वे० ८, ७, ८, ५।

† 'द्रप्सः—समुद्रम्'—इति वि०।

२, १२७)] "गृभ्रस्य" गृभ्रो रसानभिकाङ्क्षतः सूर्यस्य* "चक्षसा" तेजसा "पश्यन्" प्रकाशमानो वेनः "यद्" यदा "समुद्रं" समुन्दन-शीलं मेघम् "अभि जिगाति" अभिगच्छति तदानीं "भानुः" सूर्यः "शुक्रेण" "शोचिषा" तेजसा "तृतीये" "रजसि" लोके "चकानः" दीप्यमानः "प्रियाणि" सर्वेषामभीष्टानि उदकानि "चक्रे" करोति ॥ ३ ॥ ३१ (१३)

इति सामवेदार्थप्रकाशे उत्तरग्रन्थस्य विंशस्याध्यायस्य सप्तमः खण्डः ॥ ७ ॥†

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ २० ॥

॥ इति नवमस्य द्वितीयोऽर्धप्रपाठकः ॥ ‡

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणाचार्येण विरचिते माधवीये सामवेदार्थप्रकाशे उत्तरग्रन्थे विंशोऽध्यायः†

समाप्तः ॥ २० ॥

---

* 'गृभ्रस्य—अन्तरिक्ष-गामिनः पक्षि-भूतस्य। अथवा गृभ्रो मांसासौ अतः सर्वग्राहि नामलक्षकः' तद्वच्च श्रुतौ—"एष एव मृत्युः, एतस्मिन् मरणे पुरुषः * * * मयो गृभ्रः"। अथवा गृभ्रो गरुत्मान् पक्षी'—इति वि०।

† 'समाप्तानि एकाहाहीनसत्रप्रायश्चित्तक्षुद्रकृच्छ्रेषु सामानि छन्दोगानां मन्त्रभूतानि। तेषामार्षच्छन्दो देवताः, विनियोगश्च ब्राह्मण-सिद्धः'—इति वि०।

‡ 'नवम-प्रपाठकस्य प्रथमोऽध्यायः'—इति वि०। एषएवैको मूलविग्रहेतीतो विवरण-कारस्येति ध्येयम्।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ २१ ॥

॥ अथैकविंशोऽध्याय आरभ्यते ॥

तत्र,

आशुःशिशानइत्यारभ्य नवसूक्तात्मक एक एव खण्डः*।

तत्र प्रथमे—

३ १२ १२ ३२७ ३ १
आशुःशिशानोवृषभोनभीमो

२ ३१२ २२ ३ १
घनाघनःक्षोभणश्चर्षणीनाम् ।

३१ १ ३११ ३ २
सङ्क्रन्दनोनिमिषएकवीरः

३१२ २२ ३ १२ १२
शतꣳसेनाअजयत्साकमिन्द्रः ॥ १ † ॥

---

* 'इदानीं साग्निचित्ये क्रतौ "ब्रह्मा प्रतिरथं जपेत्"—अतः "शुक्रं तच ब्रह्मलं वा विद्यया क्रियते, एतस्मात् कारणात् उक्ताचाचामपि [illegible] ब्रह्मलमाप्तं मासस्य परिसमाप्तौ एतस्मात् कारणात् सर्वासु माघास्त्रप्रतिरथः [illegible] उच्यते । इन्द्रः सर्वस्य देवता, चिरन्तन ऋषिः, प्रजापतेरावेशम्, त्रिष्टुप् छन्दः'—इति वि० ।

† ऋ० वे० ८, ५, १२, १ = य० वे० १७, ११ ।

[अत्रैन्द्रोऽप्रतिरथऋषिः, त्रिष्टुप् छन्दः, इन्द्रो, देवता साग्निचित्ये क्रतौ अग्नौ प्रणीयमानेऽयमध्यायो ब्राह्मणेन जाप्यः ।] अयमिन्द्रः "आशुः" शीघ्रकारी व्यापको वा "शिशानः" निशितः शत्रूणां भयजनक इत्यर्थः । कदृव ? "वृषभो न भीमः" [बिभेत्यस्मादिति भीमः तादृशः] भीमः वृषभो यथा—स यथा तीक्ष्णाभ्यां शृङ्गाभ्यां भीमो भवति तद्वत् [अथवा शिशानस्तीक्ष्णमिति व्यत्ययेनात्मनेपदम्] "घनाघनः" घातकः शत्रूणां हन्ता [पचाद्यचि हन्तेर्घत्वञ्चेति द्विर्वचनम् अभ्यासस्याऽऽगमः घत्वञ्च धात्वभ्यासयोः] "क्षोणीनां" क्षपणयो मनुष्याः मनुष्याणां हेत्याणां "क्षोभणः" क्षोभयिता, "सङ्क्रन्दनः" सम्यक् क्रन्दयिता प्राणिनाम् आकर्षणेन प्रहारेण वा, "अनिमिषः" अनुनिमेष-रहितः सर्वदा स्व-यज्ञमागमादि-कार्येष्वनलस इत्यर्थः, "एकवीरः" [वीरयत्यभिमान् इति वीरः, एकश्चासौ वीरश्च ; अथवा,] एकएव विक्रान्तः असहायेन कार्यक्षमइत्यर्थः । ईदृशोऽयमिन्द्रः "शतं सेनाः" "साकं" सह एकोद्योगेनैव "अजयत्" जयति ॥ १ ॥

अथ प्रथमे सूक्ते द्वितीया ।

२ १ १ २ २ १ १ २ १ २
सङ्क्रन्दनेनानिमिषेणजिष्णुना
२ १ १ २ २ १ २ १ १ २
युत्कारेणदुश्च्यवनेनधृष्णुना ।

१ २२ ३ १ १ ४
तद्दिन्द्रेणजयततत्सहध्वं
१२ ३ १ २ ३ १ २
युधोनरइषुहस्तेनवृष्णा ॥ २ * ॥

[अप्रतिरथः, त्रिष्टुप्, इन्द्रः।] अस्तुनामेन्द्र उक्तविधः, तथाप्य स्माकं किमिति चेत् तत्राह—"सहध्वनेन" "अनिमिषेण" चोक्त-लक्षणेन, "जिष्णुना" जय-शीलेन, "युत्कारेण" [योधनं युत्] युद्धकारिणा [कर्मण्यण् (३, २, १)], "दुश्यवनेन" अन्यैरविचाल्येन [च्युङ् प्रुङ् गतौ (स्वा० आ०), "छन्दसि गत्यर्थेभ्यः (३, ३, १२९)"—इति युच्], "वृष्णा" धर्षकेण। ईदृशेन "इन्द्रेण" "तत्" युवं "जयत"; "तत्" शत्रु-बलं "सहध्वम्" अभिभवत। हे "युधः" योद्धारः! हे "नरः" नेतारः! [सामान्यवचनं विभाषितं विशेषवचने बहुवचनम् (८, १, ७४)"—इति पूर्वस्याविद्यमानवत्त्व-निषेधादुत्तरं निहन्यते]। पुनः कीदृशेनेन्द्रेण? "इषुहस्तेन" "वृष्णा" वर्षकर्त्रा च ॥ २ ॥

अथ प्रथमे सूक्ते तृतीया।

१२२२ ३ १ २ ३ १ २ ३ १२
सइषुहस्तैःसनिषङ्गिभिर्वशी
२२३२ ३ १ २ ३ १ २
सःसंस्रष्टासयुधइन्द्रोगणेन।

---

* ऋ० वे० ८, ४, २२, २ = य० वे० १७, ३४।

३ १ २ ३१ १ ३२
सꣳसृष्टजित्सोमपाबाहुशर्ध्यू
१२३ १ २ ३१ २
ऽग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ * ॥ १

[अप्रतिरथः, त्रिष्टुप्, इन्द्रः।] पूर्व-मन्त्रे इन्द्रेण जयतेत्युक्तम् अत्रेन्द्रस्य जय-साधन-सामर्थ्यं प्रतिपादयति—"सः" इन्द्रः "इषु-हस्तैः" भटैः मरुदादिभिः "वशी" वश्यैस्सहान्, तथा "निषङ्गिभिः" युक्तः [निषङ्गः खड्गः, तद्वद्भिः] वशी, सचेन्द्रो "युधः" युध्यमानः सन् [इगुपधलक्षणः कः (३,१,१३५), अथवा 'युधः' युद्ध-हेतोः] "गणेन" शत्रु-सङ्घेन सह संसृष्टा एकीभवनशीलः। यतएवंविधः अतः "संसृष्टजित्" ये परस्परैकमत्येन युद्धाय संसृष्टा भवन्ति, तेषां जेता न, "सोमपाः" सोमस्य पाता, "बाहुशर्ध्वी" शर्ध्वी बलं बाहु-बलं, तद्वान् [मत्वर्थीय इनिः (५, २, ११५)। यद्वा, शृधु प्रहसने (भ्वा० आ०), बाहुभ्यां शर्धयत्यति भवतीति बाहुशर्ध्वी "सुप्यजातौ णिनिस्ताच्छील्ये (३, २, ७८)"—इति णिनिः], "उग्रधन्वा" उद्यतधन्वा, "प्रतिहिताभिः" शत्रुषु प्रेरिताभिरिषुभिः "अस्ता" मारयिता; यत्रेषून् मुञ्चति तत्र हता न भवतीत्यर्थः। ईदृशेनेन्द्रेण जयतेति सम्बन्धः॥ ३॥ १

---

* ऋ० वे० ८, ५, २१, १ = य० वे० १७, १५।

अथ द्वितीये सूक्ते प्रथमा।

१२ २११ २१२
बृहस्पतेपरिदीयारथेन
३ १२ २२ २१२
रक्षोहामित्राऽअपबाधमानः।
३ १२ २२ २१२ २१२ २२
प्रभञ्जन्त्सेनाःप्रमृणोयुधाजय
३ १ २ २१२ १२
अस्माकमेध्यवितारथानाम् ॥ १ * ॥

[अप्रतिरथः, त्रिष्टुप्, बृहस्पतिः।] हे "बृहस्पते" बृहतां पते! पालयितः! देव! "रथेन" "परिदीय" परिगच्छ [दीयतिर्गतिकर्मा (निघ०२,१४, ६९)]। आगत्य च "रक्षोहाः" रक्षसां हन्ता "अमित्रान्" शत्रून् "अप बाधमानः" सर्वतो नाशयन् तथा "सेनाः" शत्रु-सम्बन्धिनीः "प्रभञ्जन् प्रकर्षेण नाशयन् "प्रमृणन्" प्रकर्षेण हिंसन् [मृण हिंसायाम् (तु० प०), इगुपध-लक्षणः कः (३,१, १३५)]। केन हिंसन्? "युधा" युद्धेन ["सावेकाच (६, १, १६८)"—इति विभक्तेरुदात्तत्वम्] "जयन्" एवं सर्वं जयं प्रतिपद्यमानः। ईदृशस्त्वम् अस्माकं रथानाम् "अविता" रक्षिता "एधि" भव ॥ १ ॥

---

* ऋ० वे० ८, ५, १९, १ = य० वे० १७, ३९।

अथ द्वितीये सूक्ते द्वितीया।

३ १२ २२३ १ २ ३
बलविज्ञायःस्थविरःप्रवीरः

१ २ ३ १२ २२ ३ २
सहस्वान्वाजीसहमानउग्रः।

३ १ २ ३ १ १ ३ १२
अभिवीरोअभिसत्वासहोजा

२२ ३ २ ३ १ १ २
जैत्रमिन्द्ररथमातिष्ठगोवित्॥ २ *॥

[अप्रतिरथः, त्रिष्टुप्, इन्द्रः।] सर्वस्य बलं विजानातीति "बलविज्ञायः" [यद्वा, ममायमिति सर्वैर्बलत्वेन विज्ञायत इति बलविज्ञायः सर्वस्य बलभूतइत्यर्थः], "स्थविरः" महान्† "प्रवीरः" प्रकर्षेण वीरः‡, "सहस्वान्" पराभिभव-सामर्थ्यवान्, "वाजी" वेगवान् अन्नवान् वा, "सहमानः" शत्रूणामभिभविता, "उग्रः" उद्गूर्ण-बलः, "अभिवीरः" अभिगत्वा वीरा वीर्यवन्तो ऽनुचरा यस्य स तथोक्तः, "अभिसत्वा" अभिगत-सत्वा, "सहौजाः" सहसो बलाज्जातः। एवं महानुभावस्त्वं हे इन्द्र! "जैत्रं" जय-शीलं "रथम्" "आ तिष्ठ" अस्मत्सहायार्थम् आरो-

* ऋ० वे० ८, ५, २९, ५ = य० वे० १७, ३७।

† 'स्थविरः—महत्-प्रमाणः। अथवा स्थविरः स्थैर्य-संयुक्तः। अथवा स्थविरो गुणैर्वृद्धः'—इति वि०।

‡ 'प्रवीरः—* * *। अथवा प्रकर्षेण वीरैः सम्पन्न'—इति वि०।

ढुमर्हसि। त्वञ्च "गोवित्" उदकस्य स्तुतेर्वा लब्धा वेदिता वा* ॥ २ ॥

अथ द्वितीये सूक्ते तृतीया।

३ २ १ १ २ १ १ १ २
गोत्रभिदङ्गोविदंवज्रबाहु

१ २ ३ १ २ ३ १ १ २
ञ्जयन्तमज्मप्रमृणन्तमोजसा।

३ १ २ १ १ १ ३
दूमꣳसजाताअनुवीरयध्व

१ २ ३ २ ३ १ २
मिन्द्रꣳसखायोअनुसꣳरभध्वम् ॥ ३ † ॥ २

[अप्रतिरथः, त्रिष्टुप्, इन्द्रः।] "गोत्रभिदं" [गा उदकानि त्रायन्त इति गोत्रा मेघाः; यद्वा, गौर्भूमिः तां त्रायन्तइति] गोत्राः पर्वताः,तेषां भेत्तारम्‡ "गोविदम्" उदकस्य लब्धारं,"वज्रबाहुं" वज्र-हस्तं ["प्रहरणार्थेभ्यः (२,२,३७ वा०)"—इति सप्तम्याः परनिपातः], "जयन्तं" जयन-शीलम्, "अज्मं" गमन-शीलं शत्रु-बलम् "ओजसा" बलेन जयन्तं [यद्वा, 'अज्म' आजिं 'जयन्तं' 'ओजसा' बलेन] "प्रमृणन्तं शत्रूनभिभवन्तम्। दृढं महा-

---

* 'गोवित्—रश्मिवान्। अथवा उदकवान्। अथवा * * *। अथवा गावो यस्य विश्वे स गोवित्। अथवा विद ज्ञाने (अदा० प०)—इत्यस्यैतद्रूपम्'—इति वि०।

† ऋ० वे० ८, ५, २२, ६ = य० वे० १७, ३८।

‡ 'गोत्रभिदं—शत्रूणां भेत्तारं'—इति वि०।

सुभावम् इन्द्रम् हे "सजाताः" सहोत्पन्ना योद्धारो यूयम् "अनु-वीरयध्वम्" एनमयतः कृत्वा 'अनु' पश्चाद् 'वीरयध्वं' वीरकर्म्म युद्धं कुरुध्वम् [वीर शूर विक्रान्तौ, वीर-शब्दात् "तत् करोति तदाचष्टे (सि० कौ० ति० चु०)"—इति णिच्]। हे "सखायः" परस्परं सखिभूता यूयम् "इमम् इन्द्रम्" "संरभमाणम्" अनुसंरभध्वम्॥ ३॥ २

अथ तृतीये सूक्ते प्रथमा।

३ २ ३ २ ३ १ २ ३ १ २
अभिगोत्राणिसहसागाहमानो

३ २ ३ २ ३ १ २ ३ १ २
दयोवीरःशतमन्युरिन्द्रः।

३ १ २ ३ १ २ ३ १
दुश्च्यवनःपृतनाषाडयुध्यो

२ ३ १ २ ३ १ २
ऽस्माकꣳसेनाअवतुप्रयुत्सु॥ १ *॥

[अप्रतिरथ त्रिष्टुप् इन्द्रः।] अयम् "इन्द्रः" "गोत्राणि" अभ्राणि मेघान् "सहसा" बलेन "अभि गाहमानः" प्रविशन्, "अदयः" निर्दयः, "वीरः" विक्रान्तः, "शतमन्युः" बहु-यज्ञः बहु-क्रोधो वा, "दुश्च्यवनः" अन्यैरच्याव्यः, "पृतनाषाट्" शत्रु-सेनानामभि-भविता ["छन्दसि सहः (३, २, ६३)"—इति णिः, "सहेः साढ़ः सः (८, ३, ५६)"—इति मूर्द्धन्यादेशः], "अयुध्यः"

* अ०वे० ८, ५, २३, १ = य० वे० १७, १८।

सम्यहर्त्तुमशक्यः [युध सम्प्रहारे, छान्दसः क्यप् (३, १, ८५)]। इष्टगिन्द्रः अस्माकं सेना "युत्सु" सङ्ग्रामेषु "प्रावतु" प्रकर्षेण रक्षतु ॥ १ ॥

अथ तृतीये सूक्ते द्वितीया।

१ १ १२ ३ १ १ २
इन्द्र आसान्नेताबृहस्पति
१ २ १ १ ३ १ १ २ १ १
र्दक्षिणायज्ञःपुरएतुसोमः।
२ १ १ २ १ २
देवसेनानामभिभञ्जतीनां
२ २ १ १ २ १ १ २
जयन्तीनाम्मरुतोयन्त्वग्रम् ॥ २ * ॥

[अप्रतिरथः, त्रिष्टुप्, इन्द्रः।] "आसाम्" अस्मत्सहायार्थमागतानां देवसेनानाम् अयम् "इन्द्रः" "नेता" नायकः अस्तु। तथा तस्य "बृहस्पतिः" "पुरएतु" एवं "दक्षिणा यज्ञः सोमः" च पुर एवेति प्रत्येकं सम्बन्धः। तथा "देवसेनानाम्" "अभिभञ्जतीनाम्" अस्मदभिघाणामाभिमुख्येन मर्दयन्तीनां "भजन्तीनां" ["ङ्याच्छन्दसि (६, १, १७८)"—इति नाम उदात्तत्वम्] "जयन्तीनाम्"—इत्यत्र बहुल वचनान्न भवति। तासाम् "अग्रम्" "मरुतः" "यन्तु" गच्छन्तु ॥ २ ॥

---

* ऋ० वे० ८, ५, २१, २ = य० वे० १७, ४०।

अथ तृतीय सूक्ते तृतीया।

१ २ ३ २ ३ ११ ३ १ २ .
इन्द्रस्यवृष्णोवरुणस्यराज्ञ

१ १ २ ३ २ ३ १ २ ३ १
आदित्यानाम्मरुताꣳशर्द्धउग्रम्।

१ १ २ . ३ १ ३
महामनसाम्भुवनच्यवानाम्

१ २ ३ २ ३ १ २ ३ १ २ .
घोषोदेवानाञ्जयतामुदस्थात्॥ ३ *॥ ३

[अप्रतिरथस्त्विष्टुविन्द्रः।] "वृष्णः" वर्षकस्य "इन्द्रस्य" "राज्ञः वरुणस्य", "आदित्यानां" "मरुतां" च "उग्रम्" उद्गूर्णं "शर्द्धः" बलम् अस्माकं भवत्विति शेषः। किञ्च "महामनसाम्" उदार-मनसां "भुवनच्यवानां" भुवनानां च्यावयितॄणां "देवानां" "घोषः" जय-शब्दः "उदस्थात्" उत्तिष्ठति† [अनूर्द्ध-कर्मत्वादात्मनेपदाभावः (१, ३, २४)]॥ ३॥ (३)

---

* ऋ० वे० ८, ४, २३, ३ = य० वे० १७, ४१।

† "वृष्णः कामवर्षितुरिन्द्रस्य राज्ञो वरुणस्यादित्यानां द्वादशानां मरुतां चैषां देवानामुग्रमुत्कृष्टं शर्धो बलं गजतुरगरथपत्त्यात्मकसैन्यं घोषो जितं जितमिति शब्दश्च उदस्थात् उत्थितः। जितं जितमिति यदिन्द्रादिसैन्यमुत्थितमित्यर्थः। कीदृशानां देवानां महामनसां महामनो येषां ते महामनसस्तेषाम् युद्धे स्थिरचित्तानाम्। तथा भुवनच्यवानां भुवनं लोकं च्यावयन्ति ते भुवनच्यवास्तेषां भुवनच्यावनसमर्थानाम्। जयतां विजयमानानाम्।"—इति मद्भीधर-कृत-व्याख्यानम्।

अथ चतुर्थ-सूक्ते प्रथमा।

१२ ३ १ १३ १२
उद्वर्षयमघवन्नायुधान्युत्
१२ ३ २ ३ १२
सत्वनामामकानाम्मनाꣳसि।
१२ ३ २१ १ १३ १२
उद्वृत्रहन्वाजिनांवाजिनान्यु
२१३ १२ ३ १ २
द्रथानाञ्जयतांयन्तुघोषाः॥ १ *॥

[अप्रतिरथस्त्विष्टुविन्द्रः।] हे "मघवन्" इन्द्र! अस्मदीयानि "आयुधानि" "उद्वर्षय" उत्कृष्टं हर्षय प्रहरणेषूद्युक्तानि भवन्त्वित्यर्थः। "मामकानां" मदीयानां "सत्वनां" प्राणिनां सैनिकानां "मनांसि" च उद्वर्षय। हे "वृत्रहन्" इन्द्र! "वाजिनाम्" अश्वानां "वाजिनानि" वेगाः "उद्यन्तु"। तथा "जयतां रथानां" "घोषाः" "उत्" यन्तु† ॥ १ ॥

---

* ऋ० वे० ८, ५, २३, ४ = य० वे० १७, ४२।

† "हे मघवन्मघवन्निन्द्र आयुधानि उद्वर्षय उद्गतहर्षाणि कुरु मामकानां मदीयानां सत्वनां प्राणिनां मनांसि च उद्वर्षय हर्षयुक्तानि कुरु। हे वृत्रहन् वैरिघातिन् वाजिनामश्वानां वाजिनानि शीघ्रगमनानि उद्वर्षय उत्कृष्टानि कुरु। किञ्च जयतां विजयमानानां रथानां घोषाः शब्दा उद्यन्तु उद्गच्छन्तु रथाः सङ्ग्रामाः प्रसरन्तु।"—इति म० ऋ० भा०।

अथ चतुर्थे सूक्ते द्वितीया।

३ २ ३ २३ ११ ३२
अस्माकमिन्द्रःसमृतेषुध्वजे

३ २ ३ १र २र३ १ २
धस्माकंयाइषवस्ताजयन्तु।

३ १ २०३ १र २र ३ १
अस्माकंवीराउत्तरेभवन्त्वस्माꣳ

२ ३ १ २
उदेवाअवताहवेषु ॥ २ * ॥

[अप्रतिरथस्त्विष्टुविन्द्रः।] "अस्माकं" सम्बन्धिष्वेव "समृतेषु" पर-सेनां सम्प्राप्तेषु "ध्वजेषु" ध्वजवत्सु सैनिकेषु "इन्द्रः" अविता भवतु। तथा "अस्माकं" "या इषवः" सन्ति "ताः" एव "जयन्तु" न शत्रूणाम्। तथा "अस्माकं" "वीराः" भटाः "उत्तरे" उपरि "भवन्तु"। हे "देवाः!" "अस्माꣳउ" अस्मानेव "अवत" रक्षत "हवेषु" सङ्ग्रामेषु॥ २ ॥

---

* ऋ० वे० ८, ४, १२, ५=य० वे० १७, ४३।

† "दीर्घादटि समानपादे (८, ३, ९)"—इति, "आतोऽटिनित्यम् (८, ३, ३)"—इति सूत्राभ्यां रूपम्।

† "ध्वजेषु सम्यक्तेषु ऋगतौ सङ्गतेषु अत्र ध्वजैः संयुक्तेषु सत्सु इन्द्रः अस्माकं रक्षिता भवत्विति शेषः दानोम प्रार्थं या इषवोऽस्मदीयेः प्रयुक्तास्ता जयन्तु, परसैन्यानि घ्नन्तु। अस्माकं ये वीराः शूरास्ते उत्तरे परकीय-भटेभ्य उत्कृष्टा भवन्तु उ अपि च हे देवा। हवेषु अस्मान्यूयमवत रक्षत अन्येषामपि दृश्यतइति दीर्घः।"इति म० ऋ० भा०।

अथ चतुर्थे सूक्ते तृतीया।

३ १२ २२ १ १ १
असौ या सेनामरुतःपरेषा
३ १ २ ३ १ २ ३ १२
मभ्येतिनओजसास्पर्द्धमाना।
१ ३ २ ३ १ १ ३ ०
ताङ्गृहततमसापव्रतेन
२ ३ १ २ ३ २ ३ १ ३ २
यथैतेषामन्योअन्यन्नजानात्॥ ३ *॥ ४

[अप्रतिरथस्त्रिष्टुप्मरुतः।] "असौ या सेनाः" हे "मरुतः!" "परेषां शत्रूणाम् "अभ्येति" अभिमुखा एति "नः" अस्मान् प्रति "ओजसा" बलेन "स्पर्द्धमाना", "तां" सेनां "गूहत" व्याप्नुत "तमसा" "अपव्रतेन" [व्रतमिति कर्मनाम (निघ० २, १, ७)] अपगत-कर्मणा [येन तमसा] व्याप्ता नश्यन्ति कर्माणि तदपव्रतं तमः, तेनापव्रतेन तमसा तथा गूहत "यथा एतेषां" योद्धा "अन्योन्यं न जानात्" परस्परं न जानातीत्यर्थः† ॥ ३ ॥ ४

---

* ऋ० वे० ८, ५, २३, ८ = य० वे० १७, ४७।

† 'मरुद्देवत्या त्रिष्टुप् हे मरुतो या प्रसिद्धा असौ परेषां शत्रूणां सेना नोऽस्मानभि आ एति अभ्यागच्छति। कीदृशी ओजसा बलेन स्पर्धमाना स्पर्धां कुर्वाणा तां सेनां तमसा अन्धकारेण यूयं गूहत संवृतां कुरुत। तथा गूहत यथा असौ सैनिको अन्योऽयं न जानन् परस्परं न जानीयुस्तथा गूहत। कीदृशेन तमसा अपव्रतेन अपगतं व्रतं कर्म यस्मात्तेन येन व्याप्तानां कर्म नश्यति तादृशेन तमसा गूहतेत्यर्थः।"—इति म० ह० व्या०।

अथ पञ्चमे सूक्ते प्रथमा।

३ १ २ २ १ २ ३ १ २ ३ १ २ २ १ २
अमीषाञ्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि।
३ २उ ३ १ २ ३ १र २र
अभिप्रेहि निर्दहहृत्सुशोकै
३ २ १ २ ३ १ १
रन्धेनामित्रास्तमसासचन्ताम्॥ १ *॥

[अप्रतिरथस्त्विष्टुब्वायुः।] हे "अप्वे" पापाभिमानि देवते †! "अमीषां" योद्धॄणां "चित्तं" "प्रतिलोभयन्ती" विमोहयन्ती सती "अङ्गानि" तेषामवयवान् शरादिकान् "गृहाण" स्वीकुरु। ते "अमित्राः" अस्मच्छत्रवः "अन्धेन तमसा" "सचन्तां" सङ्गच्छन्ताम्‡॥ १॥

---

* ऋ० वे० ८, ५, २३, ६ = य० वे० १७, ४४।

† "अप्वा यदेनया विद्धो ऽपवीयते आधिर्वा भयं वा"—इति निरु० नै० ६, १२।

‡ अत्राह यास्कः—"अमीषां चित्तानि प्रज्ञानानि प्रतिलोभयमाना गृहाणाङ्गान्यप्वे परेह्यभिप्रेहि निर्दहैषां हृदयानि शोकैरन्धेनामित्रास्तमसा संसेवयन्ताम्"—इति (निरु० दै० ३, ३१)

"अप्वा देवता सा व्याधिर्भयं वा यस्मादेतया विद्धोऽपचीयते तस्मादप्वा अपपूर्वादातेरन्तर्भूतण्यर्थात् अन्येष्वपि दृश्यतइति उपलक्षणं अपगच्छान्यान्कारलोपश्छान्दसः तत्सम्बुद्धौ अपवाति अपगमयति सुखं प्राणांश्चेत्यप्वा। ऐन्द्रोऽभिरूपा द्वादश भवन्तीति (९, २, ३, १) श्रुतेरियमपीन्द्रसेनासम्बन्धिनी। हे अप्वे अमीषां शत्रूणां चित्तं चित्तानि प्रतिलोभयन्ती मोहयन्ती अङ्गानि शत्रुगात्राणि गृहाणा ततः परेहि अङ्गान्यादाय परागच्छ पुनरन्यान् रिपून् गृहीतु मभि शत्रुसङ्घं प्रेहि प्रगच्छ तेषां हृदयानि शोकैर्धनपुत्रमित्रादिनिमित्तैर्निर्दह विभक्षितानि कुरु। किञ्च अमित्राः शत्रवोऽन्धेन तमसा गाढान्धकारेण सचन्तां सङ्गच्छन्तां षच् समवाये लोट्।"—इति म० द्व० भा०।

अथ पञ्चम-सूक्ते द्वितीया।

२३१२ ३ १ २३ १२
प्रेताजयतानरइन्द्रोवःशर्मयच्छतु।

३१ २ ३१२ ३१२ १२
उग्रावःसन्तुबाहवोनाधृष्यायथासथ॥ २ *॥

[अप्रतिरथोऽनुष्टुबिन्द्रो मरुतो वा।] हे "नरः" नेतारः! सङ्ग्रामस्य निर्वोढारो योद्धारः! "प्रेत" प्रकर्षेण गच्छत। गत्वा च "जयत" तान् प्रतिभटान् [तिङ्-परत्वात् 'तिङ तिङः (८, १, २८)"—इति निघाताभावः "वः" युष्माकम् "इन्द्रः" "शर्म" सुखं "यच्छतु" प्रयच्छतु "वः" बाहवः "उग्राः" उद्गूर्ण-बलाः "सन्तु" भवन्तु। "अनाधृष्याः" अन्यै रनभिभाव्याः "यथा" यूयम् "असथ" भविष्यथ तथा उग्राः सन्तु वो बाहवः† ॥ २ ॥

---

* ऋ० वे० ८, ५, २३, ७ = य० वे० १७,४६।

† "योऽइदेवत्यानुष्टुप् योऽइन् स्तौति। हे नरोऽग्रगामिनो योद्धारो यूयं शत्रून् परसैन्यं प्रति प्रकर्षेण गच्छत ततो जयत विजयं प्राप्नुत इत्युच्चोऽनुदात्तेङ इति। प्रेतेत्यत्र दीर्घः अन्येषामपि दृश्यतइति जयतेत्यत्र दीर्घः। इन्द्रो वो युष्माभ्यं शर्म जयोत्थं सुखं यच्छतु ददातु दाण दाने पात्रेत्यादिना यच्छादेशः। किञ्च यथा यूयमनाधृष्या असथ केनाप्यनिरस्कार्या भवथ। तथा वो युष्माकं बाहवो भुजदण्डा उग्रा उद्गूर्णायुधा सन्तु। असथेत्यत्र लेटोऽडाटाविति अडागमः।"—इति म०ऋ० व्या०।

अथ पञ्चम-सूक्ते तृतीया।

१२ ३ १२ २ १ १ ३ १ २
अवस्रष्टापरापतशरव्येब्रह्मसंशिते।

१३ २ ३ १ १ ३२७ ३ १ ३ १ २
गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः॥ ३ * ॥ ५

[अप्रतिरथऋषिः•पायुर्वा भारद्वाजः अनुष्टुप् छन्दः इषुर्देवता।] "ब्रह्मसंशिते" मन्त्रेण तीक्ष्णीकृते हे "शरव्ये" हिंसाकुशले! इषो! त्वम् "अवस्रष्टा" क्षिप्ता "परा पत" परागच्छ। इतो देशात् गत्वा च "अमित्रान्" हिंसकान् "प्रपद्यस्व" प्राप्नुहि च। "अमीषाम्" अमित्राणां मध्ये "कञ्चन" कञ्चिदपि "मा उच्छिषः" अवशिष्टं मा कुरु† ॥ ३ ॥ ५

अथ षष्ठे सूक्ते प्रथमा।

३ १ २ ३ १ २ २ ३
कङ्काःसुपर्णाअनुयन्त्वेनान्

१ २ ३ १ २ ३ १ २ ३ १ २
गृध्राणामन्नमसावस्तुसेना।

---

* ऋ० वे० ५, १, २२, १ = य० वे० १७, ४५।

† "अत्र ऋक्चतुष्टयस्य विनियोगः कात्यायनेनोक्तः। इयमिषुदेवत्यानुष्टुप्। हिंसिका शरमयी हेतिः शरव्या ब्रह्मणा मन्त्रेण संशिता तीक्ष्णीकृता ब्रह्मसंशिता तादृशि हे शरव्ये त्वमवस्रष्टास्माभिर्मुक्ता सती परापत गच्छसा परसैन्ये पतिता भव। पतित्वा चामित्रान् शत्रून् गच्छ प्राप्नुहि प्राप्य च प्रपद्यस्व शत्रुशरीरेषु प्रविश्य प्रविश्य चामीषां शत्रूणां मध्ये कं चन पुरुषं मा उच्छिषः अवशिष्टं मा कुरु सर्वानपि जहीत्यर्थः शिषॢ विशेषणे पुषादौत्यादिना च्लेरङ्।"—इति म० ब्र० व्या०।

१२ ३ १ १ २ ३
मैषामोचि अघहारश्चनेन्द्र
१२ ३ १२ १ १२
वयाꣳस्येनानन्वनु संयन्तु सर्वान् ॥ १ * ॥

[अप्रतिरथऋषिः पायुर्वा भारद्वाजः, त्रिष्टुप् छन्दः, इन्द्रो देवता।] "कङ्काः" नाम पक्षिणः क्रव्यादाः "सुपर्णाः" शोभनपतनाः "अनु यन्तु" "एतान्" गच्छन्। "रक्षाणाम् अत्र" पक्षिणां भक्षभूता "असृक्" "अस्तु" सेना। "मा एषां मोचि" एतेषां मा कश्चित् मुच्यताम्। "अघहारश्चनेन्द्र" हे इन्द्र! योऽपि नितरां पापीयान् अतिप्रत्यवरः सोऽपि न मुच्यतां मृत्योः। "वयांस्येनान्" वयांसि पक्षिरूपाणि क्रव्यादादीनि "अनु संयन्तु सर्वान्" अनु पश्चात् यन्तु सर्वान् गच्छन्॥ १ ॥

अथ षष्ठे द्वितीया।

३ १ २ ३ १ ३ ३ २ ३ २
अमित्रसेनामघवन्नस्माञ्छचयतीमभि।
३ १ २ २ ३ १ २ ३ १ २
उभौतामिन्द्रवृत्रहन्नग्निश्चदहतम्प्रति ॥ २ † ॥

[अप्रतिरथऋषिः अग्निर्वा, अनुष्टुप् छन्दः, इन्द्राग्नीदेवते।] "अमित्रसेनां" हे "मघवन्!" "अस्मान्" "शचयतीमभि"

---

* नेयमन्यत्र दृश्यते।

† ऋक्षाण्यत्र न दृश्यन्ते।

शत्रुभिः परिवारिताम् "उभौ" "तां" सेनां हे "इन्द्र!" "बृहन्!" त्वञ्च "अग्निश्च" "प्रति दहतम्" भस्मीकुरुत-मित्यर्थः ॥ २ ॥

अथ षष्ठे सूक्ते तृतीया।

१ २३ २ ३१२ ३ १ २ ३१ १
यत्रबाणाःसम्पतन्तिकुमाराविशिखाइव।
१ २३१ १३ २ ३१२ ३ १२
तत्रनोब्रह्मणस्पतिरदितिःशर्म्मयच्छतु।
३ २ ३१२
विश्वाहाशर्मयच्छतु॥ ३ * ॥ ६

[अप्रतिरथऋषिः पायुर्भारद्वाजः, पङ्क्तिश्छन्दः, ब्रह्मणस्पतिरदितिश्च देवता।] "यत्र" सङ्ग्रामे "कुमारा विशिखा इव" मुण्डिता इव] "बाणाः सम्पतन्ति"। "तत्र" "नः" अस्मभ्यं "ब्रह्मणस्पतिः" "शर्म" सुखं "विश्वाहा" सर्वदा "यच्छतु"। "अदितिः" च सर्वदा "शर्म यच्छतु"। द्विरुक्तिरादरार्था ॥ ३ ॥ ६

---

* ऋ० वे० ५, १, २२, २ = य० वे० १७, ४८।

† "इन्द्रबृहस्पत्यदिति देवत्या पङ्क्तिरष्टाक्षरपञ्चपादा। यत्र यस्मिन् युद्धे बाणाः शत्रुप्रयुक्ताः सम्पतन्ति इतस्ततश्च सम्भूय पतन्ति। तत्र दृष्टान्तः कुमारा विशिखा इव विगता शिखा येषां ते विशिखाः शिखारहिता मुण्डितमुण्डा विकीर्णकचा वा क्षतिवाताश्वपलाः सन्तो यथा इतस्ततो गच्छन्ति तद्वत्। तत् तत्र युद्धे इन्द्रः नोऽस्मभ्यं शर्म विजयोत्थं सुखं यच्छतु ददातु। कीदृश इन्द्रो बृहस्पतिः बृहतां मन्त्राणां

अथ सप्तमे सूक्ते प्रथमा।

१३ ३ १२ ११ ३ २ २ २ १ १ १
विरक्षोविमृधोजहिविवृत्रस्यहनूरुज।

२ २१ २ ३ १ २ ३१ १
विमन्युमिन्द्रवृत्रहन्नमित्रस्याभिदासतः॥ १ *॥

[अप्रतिरथ ऋषिः ग्रामो भारद्वाजो वा, अनुष्टुप् छन्दः, इन्द्रो देवता।] हे "इन्द्र!" "रक्षः" राक्षस-जातं "विजहि" विनाशय। "मृधः" सङ्ग्राम-कारिणः अन्यूंश्च "वि" जहि। "वृत्रस्य" आवरकस्यासुरस्य "हनू" कपोल प्रान्तौ "विरुज" विशेषेण भग्नौ कुरु। हे "वृत्रहन् इन्द्र!" "अभि दासतः" अस्मानुपक्षपयतः "अमित्रस्य" शत्रोः "विमन्युं" क्रोधमपि विनाशय॥ १॥

अथ सप्तमे सूक्ते द्वितीया।

१ २ १ १ २ १ १ २ १
विनइन्द्रमृधोजहिनीचायच्छपृतन्यतः।

२ ३ १ २ ३ १ १ १ २ १ २
योअस्माँअभिदासत्यधरङ्गमयातमः॥ २ †॥

पतिः पालकः विजयोचितसन्तत्रः। अहिनिः नाशि दितिः खण्डनं यस्य अखण्डित-शक्तिः। विश्वाश्च विश्वान्सर्वान् अयुना समस्ताहलोति विश्वाशी सर्वं यच्छतु इति पुनर्ग्रहणादरार्था। यद्वा तव इन्द्रः बृहस्पतिरिन्द्रगुरुः अहिनिरिन्द्रमाता च विश्वाश्च सर्वाण्यङ्गानि सर्वदा अर्मं यच्छतु विश्वानि च सान्यङ्गानि च विश्वाश्च विभक्ती राकारः अत्यन्तसंयोगे द्वितीया।"—इति म० ब्र० भा०।

* ऋ० वे० ८, ८, १०, १।

† ऋ० वे० ८, ८, १०, ४ = यं० वे० ८, ४४—१८, ७०।

[अप्रतिरथऋषिः, अनुष्टुप् छन्दः, इन्द्रो देवता।] हे "इन्द्र!" "नः" अस्माकं "मृधः" सङ्ग्राम-कारिणः शत्रून् "वि जहि" विनाशय। तथा "पृतन्यतः" पृतनाः सेनाआत्मनइच्छतः युयुत्समानानपि "नीचा यच्छ" नीचैर्नमवाङ्मुखं यच्छ गमय। "यः" शत्रुः "अस्मान्" "अभि दासति" अभितः उपक्षपयति, तम् "अधरं" निकृष्टं "तमः" अन्धकारं मरणलक्षणं "गमय" प्रापय * ॥ २ ॥

अथ सप्तम-सूक्ते तृतीया।

१२ ३ १२ २३ ३ १ २

इन्द्रस्यवाङ्स्थविरौयुवाना

३ १ २ ७ १ २ ३ २

वनाधृष्यौसुप्रतीकावसह्यौ।

---

* "का० (१३, २, १०) यद्वं शृणाति वि न इन्द्र वाचस्पतिं विश्वकर्मन्निति वेति। गवामयनस्योपान्त्ये महाव्रतेऽहनि प्राजापत्यपशूपालम्भादूर्ध्वमैन्द्रयज्ञक्रपणे मन्त्रतयम्। तत्राद्यः। इन्द्रदेवत्यानुष्टुप् प्रागवदृढा। हे इन्द्र नोऽस्माकं मृधः शत्रून् संग्रामान्वा विजहि विशेषेण नाशय। किं च पृतन्यतः नीचा यच्छ पृतनां संग्रामं सेनां वा इच्छन्ति ते पृतन्यन्तीति पृतन्यन्तस्तान् उप आत्मनः क्यलिति। पृतनाशब्दात् क्यचि प्रत्यये कर्यध्वरपृतनस्यर्चि लोप इति टिलोपे शतृप्रत्यये च रूपम्। पृतन्यतः सेनामिच्छतः शत्रूनीचान्यभूतान्यच्छ निकृष्टेव युद्धादुपरतान् कुर्वित्यर्थः। किं च पश्चात् योऽस्मानभिदासति दस्यु उपक्षयति तं शत्रुमधरं निकृष्टं तमो नरकं गमय प्रापय संचितायां दौर्घः। हे शत्रो त्वमुपायेन शृणोतोऽपि विभिन्नो मृते संग्रामो यस्य तस्मै विभिन्नसंग्रामवते इन्द्राय त्वां शृणामि। शादयति एव तव योनिः विमृक्षविभिन्नायेन्द्राय त्वां शादयामि।

१ २ ३१उ १ १२३
तौयुञ्जीतप्रथमौयोगआगते

१ २ ३१र २र ३ ३१ ३१
याभ्याञ्जितमसुराणाꣳसहोमहत् ॥ ३ * ॥ ७

[अप्रतिरथऋषिः, इन्द्रो देवता, विराट्जगतीच्छन्दः।]"इन्द्रस्य बाहू" "स्थविरौ" स्थिररूपौ [अथवा स्थविरौ स्थूलौ] "युवानौ" जरया न ग्रसितौ, "अनाधृष्यौ" न केनचिद्धृते, "सुप्रतीकौ" स्वाकृती हस्ति-कराकारौ, "असह्यौ" न कश्चित् सोढुं शक्तौ, "तौ युञ्जीत, प्रथमे योगे आगते" योगे सङ्ग्रामे यत्र नियुज्यन्ते बाहवः, "याभ्यां" "जितम्" "असुराणां" स्वभूतं "सहः" बलं "महत्" ॥ ३ ॥ ७

अथाष्टमे सूक्ते प्रथमा।

१ २ ३१३ ३
मर्म्माणितेवर्म्मणाच्छादयामि

३१३ २ ३ २३१ १
सोमस्त्वाराजाम्रतेनानुवस्ताम्।

३१र २र ३१२ ३
उरोर्वरीयोवरुणस्तेकृणोतु

१३३ १ २३१ २
जयन्तन्त्वानुदेवामदन्तु ॥ १ † ॥

---

* साम्यदे यं दृश्यते।

† ऋ० वे० ५, १, २१, १ = य० वे० १७, ४९।

[अप्रतिरथऋषिः, पायुर्वा भारद्वाजः, त्रिष्टुप् छन्दः, सोमो देवता वरुणश्च देवता।] हे राजन्! "ते" त्वदीयानि "मर्माणि" [येषु स्थानेषु विद्धः सद्यो म्रियते, तानि मर्माणि] "वर्मणा" कवचेन छादयामि "सोमः राजा" "त्वा" त्वाम् "अनु" छादनानन्तरम् "अमृतेन" "वस्त्राम्" आच्छादयन्तु। "वरुणः" अपि "ते" तुभ्यं "उरोर्वरीयः" उरु-तुल्यं सुखं "कृणोतु" करोतु। "जयन्तं" "त्वा" त्वां "देवाः" सर्वेऽपि "अनु मदन्तु" अनुहृष्यन्तु * ॥ १ ॥

अथाष्टमे सूक्ते द्वितीया।

२१ २ २१ १
अन्धाअमित्राभवताग्नेर्षाणोद्दयद्दव।
१२ २१२ २१२ २१२
तेषांवोअग्निनुन्नानामिन्द्रोदन्तुवरंवरम् ॥ २ † ॥

---

* "का० (१३, ३, १०) मर्माणि तऽइति कवचं प्रयच्छति। मर्माव्रते यागेऽध्वर्युः यजमानाय सन्नाहं परिधानाय प्रयच्छतीत्यर्थः। सोमवरुणदेवदेवत्या त्रिष्टुप्। हे यजमान ते तव मर्माणि जीवस्थानानि वर्मणा कवचेनाहं छादयामि आवृणोमि। राजा विप्रादीनामधिपः सोमोऽमृतेन नास्ति मृतं मरणं येन तेन मरणनिवारकेणानेन वर्मणा त्वा त्वामनुवस्त्रामन्वाच्छादयतु वस आच्छादनेऽदादिः लोट्। तथा वरुणः ते तव वर्म उरोः पृथोरपि वरीयः उत्तरं प्रथोयः कृणोतु करोतु अत्यन्तमुरु वरीयः इयसुनि प्रस्थस्थेत्यादिना उरोर्वरादेशः। किं च देवाः जयन्तं विजयं प्राप्नुवन्तं त्वा त्वामनुमदन्तु अनुकूला भूत्वा हृष्यन्तु उत्साहयन्तु वा।"—इति म० कृ० व्या०।

† ऋ० वे० ८, ५, २२, ९।

[अप्रतिरथऋषिः, अनुष्टुप् छन्दः, चन्द्रो देवता।] हे "अग्नेवः" अग्नयः! यूयम् "अस्माभवत"। कीदृशा अस्माः? "अग्नीर्षाणः अहय इव" यथा सर्पाः ग्रीर्षच्छिन्नाः,अकिञ्चित्कराः * भवन्ति तथा भवत। "तेषां" "वः" "अग्निनुन्नानाम्" अग्नि-दग्धानां अग्नूनाम् "इन्द्रः हन्तु वरं वरम्" यो यो वरिष्ठस्तं तं हन्तु नाशयन्तु ॥२॥

अथाष्टमे सूक्ते तृतीया।

१२१ २३ २३ १३ ११
योनःस्वोरणो†यश्चनिष्टयोजिघांसति।
३१२ १२ ३ १२३३
देवास्तंसर्वेधूर्वन्तुब्रह्मवर्म‡
१२ २२३ २३ २३ १२ १२
ममान्तरंग्रावर्मममान्तरम्॥ ३ ॥ ८

[अप्रतिरथऋषिः पङ्क्तिश्छन्दः, विश्वेदेवा देवताः] "यः" "स्वः" ज्ञातिः "अरणः" अरममाणः, "यश्च" "निष्ट्यः" तिरोभूतः दूरेस्थितः "नः" अस्मान् "जिघांसति" हन्तुमिच्छति "तं" "देवाः सर्वे" "धूर्वन्तु" छिनन्तु। "ब्रह्म" मन्त्रः "मम अन्तरम्" शराणां निवारकं "वर्म" विद्यते "ग्रावर्म" सन्नहनभूतः "मम अन्तरम्" अस्तु॥ ३॥ ८

---

* "ग्रीर्षाणा अहय"—इति वि०।

† 'स्वोरण'—इति ऋ०-पाठः।

‡ ऋ० वे० ५, १, २२, ४।

अथ नवमे सूक्ते प्रथमा।

१।उ २ १ १।१ २ ३ १
मृगोनभीमःकुचरोगिरिष्ठाः

१।२।१।१ २ ३ १।२
परावतआजगन्थापरस्याः।

३।१ ३ १।२।१।२ ३ १
सकृत्सुशायपविमिन्द्रतिग्मं

२।२ ३ १।२ २।२
विशच्छन्ताढिविमृधोनुदस्व॥ १ †॥

[अप्रतिरथऋषिः, ऐन्द्रावायवः, त्रिष्टुप्छन्दः, इन्द्रो देवता। "कुचरः" कुत्सित-चरणः "गिरिष्ठाः" पर्वत-निवासी "मृगः न" सिंह इव। हे इन्द्र! त्वं "भीमः" भयङ्करः असि। स त्वं "परस्याः" परावतः अतिशयेन दूरात् द्युलोकात् "आ जगन्थ" आगच्छ [गमेश्छान्दसे लिटि (३, २, १०५) क्रादि-नियम-प्राप्त-स्येटः (७, २, १३) "उपदेशेऽत्वतः (७, २, ६२)"—इति प्रति-षेधः। आगत्य च "सकृत्" सरण-शीलं "तिग्मं" तीक्ष्णं "पविं" वज्रं संशाय" सम्यक् तीक्ष्णीकृत्य "शतून्" अस्मदीयान् वैरिणः हे इन्द्र! "ते" तव वज्रेण "वि ताढि" विशेषेण ताड-यति नाशयतीत्यर्थः [तड़ आघाते (चु० प०) अस्माच्छान्ताल्लोटि

* "अगन्थात्"—इति अथ०-पाठः।

† ऋ० वे० ८, ८, ३८, २ = यु० वे० १८, ७१ = अथ० वे० ११, २३, १।

रूपमेतत्। तथा "मृधः" सङ्ग्रामोद्युक्तान् युयुत्सून् अन्यानपि "वि नुदस्व" विशेषेण प्रेरय तिरस्कुरु* ॥ १ ॥

अथ नवमे सूक्ते द्वितीया।

३ १८ २८
भद्रङ्कर्णेभिःशृणुयामदेवा,
१ १ २ ३ १ २
भद्रम्पश्येमाक्षभिर्यजत्राः।

---

* "अथेदं याक्कृतं व्याख्यानम्—"स्वग रव भीमः कुचरो गिरिष्ठाः। स्वगी माङ्ग-र्गतिकर्मणो भीमो विभ्यत्यस्माद्भीष्मो ऽप्येतस्मादेव। कुचर इति चरतिकर्म कुत्सित-मथ चेद् देवताभिधानं क्वाय न चरतीति। गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समु-द्भीर्णो भवति पर्ववान्पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वार्धमासपर्व देवानस्मिन् प्रीण-न्तीति तत्प्रकृतीतरत्सन्निसामान्यान्मेघस्थायी मेघोऽपि गिरिरेतस्मादेव ॥ तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद् व्याख्यास्यामो मैघष्टुकानि नैगमानोच।"—इति निरु० नै० १, २०।

† "जयदृष्टा चिष्टुप् हे इन्द्र परस्याः परावतो दूरतराद्देशादाजगन्थ आगच्छ परावच्छब्दो दूरवचनः परावतः दूरदेशादित्यर्थः लोडर्थे लिट्। आगत्य च मत्र ऊत्तिताढि विशेषेण ताडय। मृधः संग्रामांश्च वितुदस्व विशेषेण प्रेरय दूरीकुरु। किं कृत्वा पविं वज्रं संगृभ्य तीक्ष्णीकृत्य गृभो तनूकरणे ल्यप्। कीदृशं पविं हृकम् सरति गच्छतीरीरे गच्छतीति सृकः तम्। तिग्ममुत्याहवनम् "तिग्मं तेजतेरुत्साहकर्मण"-इति (निरु० १०, ६) यास्कः। क-इव स्वगो न मृग-इव यथा मृगः सिंहो दूरादेत्य प्राणिनं हन्ति। कीदृशो भीमः भयङ्करः। कुचरः कुत्सितं चरति गच्छति कुचरः। गिरिष्ठाः गिरौ तिष्ठति गिरिष्ठाः पर्वतास्थयः। ताडयतिर्हिंसाकर्मातस्त्र हौ परे इन्द्रशुभयथेत्यार्धधातुकत्वे णिचो लोपः डयत्व्योर्ढेर्धिः ढ्रलम् ताढि।"—इति च म० ब्र० व्या०।

३ १२ २२ ३ १ २ ३ १ ३क
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभि
१२ ३ १ २ २ १ २२
र्व्यशेमहि*देवहितंयदायुः ॥ २ † ॥

[अप्रतिरथऋषिः राहुगणो गौतमो वा, त्रिष्टुप् छन्दः, विश्वेदेवा देवताः ।] हे देवाः । दानादि-गुण-युक्ताः सर्वे देवाः "कर्णेभिः" अस्मदीयैः श्रोत्रैः "भद्रं" भजनीयं कल्याणं वचनं शृणुयाम युष्मत्-प्रसादात् श्रोतुं समर्थाः स्याम ; अस्माकं वाधिर्यं कदाचिदपि माभूत् । हे "यजत्राः" यागेषु चरु-पुरोडाशादिभिः यष्टव्याः देवाः "अक्षभिः" अक्षिभिः आत्मीयैश्चक्षुभिः "भद्रं" शोभनं "पश्येम" द्रष्टुं समर्थाः स्याम ; अस्माकं दृष्टि-प्रतिघातोऽपि माभूत् । "स्थिरैः" दृढैः "अङ्गैः" हस्तपादादिभिः अवयवैः "तनूभिः" शरीरैश्च युक्ता वयं "तुष्टुवांसः" युष्मांस्तुवन्तः "यदायुः" षोड़शाधिक-शत-प्रमाणं विंशत्यधिक-शत-प्रमाणं वा "देवहितं" देवेन प्रजापतिना स्थापितं तत् "व्यशेमहि" प्राप्नुयाम [कर्णेभिः—बहुलम्छन्दसि (७, १, १०)"—इति भिसऐसभावः । अक्षभिः—"छन्दस्यपि दृश्यते (७, १,७६)"—इत्यनङ् सचोदात्तः । यजत्रा—"अमि-नक्षि (उ० ३,१०५)"—इत्यादिना यजेरत्रन् प्रत्ययः । तुष्टुवांसः—ष्टुञ् स्तुतौ (अदा०

* "व्यशेम"—इति ऋ०-पाठः।

† ऋ० वे० १, ६, १६, ३ = य० वे० २५, २१।

प०), लिटः क्वसुः (३, २, १०७), "ग्रपूर्वाः खयः (७, ४, ६१) इति तकारः गिष्यते। अग्रेमहि—ग्रशूव्याप्तौ (स्वा० आ०), "लिङ्याशिष्यङ् (३, १, ८६), यदितु तत्र परिगणनमन्य-व्याप्त्यर्थं तदानीं लिङि व्यत्ययेन ग्रप् (३, १, ८५)। देवहितं "हतीया कर्मणि (६, २, ४८)"—इति पूर्वपद-प्रकृतिस्वरत्वम्]॥ २॥

अथ नवमे सूक्ते हतीया।

३ १ ३१२ ३१२ ३ १२३२ ३१२
स्वस्तिनइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः।

३ २ ३१ ३ १ २ ३ १ ३२३१ २
स्वस्तिनस्तार्क्ष्योग्ररिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु।

३ १ ३२३ १ १
स्वस्तिनोबृहस्पतिर्दधातु॥ ३*॥ ९

[ग्रप्रतिरथऋषिः राहुगणो गौतमो वा, स्वराट् हुष्टुप् छन्दः, विश्वेदेवा देवताः।] "हृद्धश्रवाः" ['हृद्ध' प्रभूतं 'श्रवः' श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृशः] "इन्द्रः" "नः" ग्रस्माकं [स्वस्त्यविनाश-नाम] "स्वस्ति" ग्रविनाशं "दधातु" विदधातु। "विश्ववेदाः" [विश्वानि वेत्तीति विश्ववेदाः यद्वा, विश्वानि सर्ववेदांसि ज्ञानानि धनानि वा यस्य, तादृशः] "पूषा" पोषको देवः "नः" ग्रस्माकं "स्वस्ति" विदधातु। "ग्ररिष्टनेमिः"

° ऋ० वे० १, ९, १६, ५ = य० वे० २५, १९।

[नेमिरित्यायुधनाम (निघ० २,२०,२), अरिष्टो अहिंसितो नेमिर्यस्य ; यद्वा, रथ-चक्रस्य धारा नेमिः, यत् सम्बन्धिनो रथ-नेमिर्न हिंस्यते सोऽरिष्टनेमिः एवम्भूतः] "तार्क्ष्यः" तृक्षस्य पुत्रः गरुत्मान्* "नः" अस्माकं "स्वस्ति" अविनाशं विदधातु। तथा "बृहस्पतिः" बृहतां देवानां पतिः पालयिता, "नः" अस्माकं "स्वस्ति" "अविनाशं" विदधातु† [ब्रह्मण्वाः—बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् (८, २, १)। विश्ववेदाः—विद ज्ञाने (अदा० प०), विदॢ लाभे (तु० उ०), आभ्यामसुन्-प्रत्ययान्तो वेदस्-शब्दः, "बहुव्रीहौ विश्वं सञ्ज्ञायाम् (६, २, १०६)"—इति पूर्वपदान्तोदात्तत्वम्। तार्क्ष्यः—तृक्षस्यापत्यं "गर्गादिभ्यो यञ् (४, १, १०५), ञित्त्वादाद्युदात्तत्वम् (६, १, १८७)। अरिष्टनेमिः—न रिष्टा अरिष्टा, अव्यय-दूर्वपद-प्रकृतिस्वरत्वम् (८, २, २), अरिष्टा नेमिर्यस्य स तथोक्तः। बृहस्पतिः—"तद् बृहतोः कर-पत्योः (६,१,१५७ वा०)"—इति सुट्-तलोपौ "उभे वनस्पत्यादिषु (६, २, १४०)"—इति पूर्वोत्तर-पदयोर्युगपत् प्रकृतिस्वरत्वम्॥ ३॥ ९

इति सामवेदार्थप्रकाशे उत्तरार्चिकस्यैकविंशस्याध्यायस्य प्रथमः खण्डः॥ १॥

---

* 'तार्क्ष्यः—वायुः, सर्वे रथादीनां तारयिता'—इति वि०।

† संहितायां खण्डसमाप्तिः द्विरुक्तिः समाप्ति-द्योतिका।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ २१ ॥

॥ इति नवमः प्रपाठकः ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थप्रकाशे
उत्तरार्चिके एकविंशोऽध्यायः
समाप्तः ॥ २१ ॥

॥ इत्युत्तरार्चिकः समाप्तः ॥

—:○:—

॥ ॐ नमः सामवेदाय ॥

॥ सामवेद संहिता ॥

तत्र

॥ उत्तरार्चिकसंहिता-परिशिष्टम् ॥

अथवा

॥ ऊह्यगानम् ॥

॥ हरिः ॐम् ॥

॥ दशरात्रपर्वेदानीम्प्रवर्त्तते ॥

वसिष्ठःकक्रुब्उत्तराबृहतीन्द्रः ॥ रथन्तरम् ॥(प्र) आभि

त्वाशूरनोनुमोवा ।(उ) आदुग्धाइवधेनवईशानमस्वज

गतः । सुवा २ ३ईशाम् ।(प्र) आयिशानमा२ ३ यिन्द्रा

३ ।(उ) हस्थू २ ३ ४षा । ओवाई । हाऊवा [१]॥(प्र) ईशो

वा ।(उ) नामिन्द्रसुस्थुषोनत्वावाऽअन्योदिवियः । नपा२

३र्थिवाः । नजातोना२३जा३ । नायिष्या२३४ना । ओवाई ।

हाऊवा[२]॥(प्र)नजोवा ।(उ)तीनजंनिष्यतेऽअस्यायन्त्योमघवन्नि

१ २ १ २ १ ४ १ २
द्रवा२३जिनाः। गत्यन्नस्त्वा२३हा ३। वामा२ ३ ४हा।
१ ५ ५
ओवाइ। हाऊवा*[३] ॥ १ ॥

अस्य व्याख्यानम्—३भा० ८३ पृष्ठे द्रष्टव्यम्। १

वसिष्ठःककुबुत्तराबृहत्यग्निः ॥ रथन्तरम् ॥ आयि
१ २ २ १ २ २ २ २ २
नावोअग्निन्नमसोवा। ऊर्जोनपातमाहुवेप्रियञ्चेतिष्ठमर
१ २ १ २ १ ४ १
तिम्। सुवा२३द्वाराम्। वायिश्वस्यदू२३ताम्। आ
२ २ ५ ५ २ १
मा२३४र्ताम्। ओवाइ। हाऊवा(१)॥ विश्वोवा। स्या
२ २ २ १ २ १ २ १
दूतमद्भुतꣳसयोजतेअरुषावि। श्वस्त्रा२३जसा। सादु
२ १ ४ १ २ २ २ १
द्रवा२ ३ त्स ३। आहु२३४ता। ओवाइ। हाऊवा (२)॥
२ १ २ २ २ २ १
सदोवा। द्रावन्त्सुवाऊतस्सुब्रह्मायज्ञस्सुशमी। वहू२३
१ १ २ २ १ ४ १ २ २ ५
नाम्। दायिवꣳराधो२३जा३। ना२३४नाम्। ओवाइ।
५
हाऊवा(३)॥ २ †॥

अस्य व्याख्यानम्—३भा० २३१ पृष्ठे द्रष्टव्यम्। २

---

* ज्योतिष्टोमे पृष्ठमिदं साम।

† अतिरात्रे सन्धिस्तोत्रम् 'एमा'-'प्रत्यु'-'एमाः'—इति सामत्रयम्।

वसिष्ठःककुब्बृहत्युषा॥ रथन्तरम्॥ प्रात्युव
दर्श्यायतीवा। ऊच्छन्तीदुहितादिवोऽअपोमच्छीवृणुतेच।
क्षुषा२३तमाः। ज्योतिष्कृणोऽ३तीऽ३। हूना२३४रा। ओ
वाऽ३। हाऊवा(१)॥ ज्योतीवा। काणीतिहूनरीउदुस्रि
यास्सृजतेसू। रिया२३स्सचा। उद्यन्नक्षा२३त्राऽ३म्। आ
र्चा२३४यिवात्। ओवाऽ३। हाऊवा(२)॥ उद्योवा। ना
क्षत्रमर्चिवक्षत्रवेदुषोवियुषिसू। रिया२३स्यचा। सामभक्ते
नाऽ२३गाऽ३। मायिमा२३४हा। ओवाऽ३। हाऊवा(३)॥३॥

अस्य आख्यानम्—३भा० २४०पृष्ठे द्रष्टव्यम्। ३

वसिष्ठःककुब्बृहत्यश्विनौ॥ रथन्तरम्॥ आयिमा
उवान्दिविष्टयोवा। ऊस्राहवन्तेऽश्विनाऽयंवामह्वेऽव
से। ग्रचा२३यिवसू। वायिग्ंविग्रा२३ऽह्वीऽ३। गाक्षा
२३४था। ओवाऽ३। हाऊवा(१)॥ विग्रोवा। वायिग्ऽ

२ र र १ २ १ र
द्विगक्थोयुवच्चित्न्ददशुर्भी। जनाऽइन्नरा। चोदे
२र १ ४ १ र र र ५
थाꣳह२३नाइ। तावा२३४ता। ओवा६। हाऊवा(२)॥
२र १ र २ र र १ र १
चोदोवा। थाꣳमनुतावतेऽर्वाग्यथꣳसमनसा। निया२
२ १ २ १ ४ १ १
३च्चक्रताम्। पायिवतꣳसो२३मी३। याम्मा२३४धा।
र ५ ५ १
ओवा६। ह्वाऊवा। (नि) अम्(३)॥ ४॥

अस्य व्याख्यानम्—१भा० २४५ पृष्ठे द्रष्टव्यम्। ४

भरद्वाजःकक्षुवृत्तराबृहतीन्द्रः॥ बृहत्।(प्र०) औ
२र
र र र २ र१र र २
होयित्वामिद्विहवामहाऽए।(उ) सानोवाजा। स्याका
३ ५ १ २ ३र४र५ २१
रा२३४वाः। ओवा३४। औहोवा। वृत्रायिषुवायि।
२ २१ ५ १र र २ ३र
ष्टासा३१त्। पतिन्ना२३४राः।(प्र०) त्वाङ्काष्ठा३४। औ
४र५ १ ५ ५
होवा।(उ०)ह्व२आर्वा२३४। ताः। उऊवा६हाऊ। वा(१)॥
२र र २ र १ २ ३ ५ १ २
औहोयिउवाऽमे। काष्ठा। ह्वअर्वा२३४ताः। सत्वाऽ
३र ४र ५ २१ १ १ २ ३
४। औहोवा। नश्चायित्वा। आहा३१। स्तधृष्णू२

५ २ १ १ ३र ४र ५ १
३४या। महस्त्वा३४। औहोवा। नो२आद्रा२३४
५ ५ २र र
यि। वाः। उऊवा६हाऊ। वा(२)॥ औहोहोयिमद्दा
१ १ २ ३ ५ १र २ ३र
३ए। स्त्वा। नोअद्रा२३४यिवाः। गामा३४। औ
४र ५ १ १ २ २१
होवा। ध्रुवाऽरथायि। यामा३१यि। द्रसङ्का२३४
५ २१र र २ ३र ४र ५ १
यिरा। सत्रावाजा३४। औहोवा। ना२जायि।
१ ५ ५
ना२जिग्यू२३७। षायि। उऊवा६हाऊ। वा।
(नि) द्दस्॥५*॥

अस्य व्याख्यानम्—३भा० ३३१-३३१ ४४थीर्द्रष्टव्यम्। ५

२र र
प्रजापतिबृहतीन्द्रः॥ अन्तरिक्षम्॥ द्दावभिसो
र १ २र र १र १ १ १ २र
मा। सआय। वा। औद्दौहोवा२। इद्दा। पवन्ते
१ ११ ११ २र र १र १२
मदियम्मदियम्म। दाम्। औद्दौहोवा२। इद्दा। स
१र २ १र२ र १ २र र १र १ १
म्मुद्रस्याधिविष्टपेमनीषि। णा। औद्दौहोवा२। इद्दा।
१ र २र र १र २ १२ १ २
मत्सरा। सा। औद्दौहोवा। इद्दा। मद्। च्यूस्ता

* ४४म्।

५२ २ २२ २ १
२३४औहोवा(१)॥ हाऊमत्सरासाः। मदच्यु। तः

२२ २ १२ १ १ १२ २ २ १
औहौहोवा२। इहा। मत्सरासोमदच्यु। ता। औ

२ १२ १ २ १ १ २२ २ १
हौहोवा२। इहा। तरत्समुद्रम्यवमानऊर्मिं। णा।

२२ २ १२ १ १२ २ २ २२ २ १२
औहौहोवा२। इहा। राजादे। वा। औहौहो

१ २ १ ३ ५२ २ २२
वा२। इहा। कृतम्। वृ२हा२३४औहोवा(२)॥ हा

२ २ २ १ २२ २ १२ १ २
ऊराजादेवाः। कृतम्बृ। हात्। औहौहोवा२। इहा।

१२ २ १२ १ १ १ २२ २ १२ १ २ १
राजादेवकृतम्बृ। हात्। औहौहोवा२। इहा। अ

२ १ १ २ १ १ १ २२ २ १२ १ २
र्षामित्रस्यवरुणस्यधर्म। णा। औहौहोवा२। इहा।

२ २ २२ २ १२ १ २ १
प्रहिन्वा। ना। औहौहोवा२। इहा। कृतम्।

३ ५२ २ २ १ २ २ १
वृ२हा २ ३ ४ औहोवा। सुष्टुभस्तुभोश्वाग्निष्टुमक्रा३न्।

१ १ १ १ १
इट्०इडा २ ३ ४ ५(३)॥ ६ *॥

अस्य आख्यानम्—३भा० ४०१-४०२ अष्टमोर्द्रष्टव्यम्।६

---

* अष्टमस्य तृतीये मध्यन्दिने विनियोगः।

विरूपोवृत्रहतोन्द्रः॥ पञ्चनिधनवैरूपम्॥ यद्या

वदिन्द्रतेशतम्। ए। शतम्भूमीरुत। स्रोवा। दिशं

व्विशण्हस्*। नत्वावज्रिन्सहस्रण्सूर्य्यानु। अश्वाशिप्रु

मती। नजातमष्टरोदसी। इट्(१)॥ नजातमष्टरोदसी।

ए। नजातमष्ट। रोदसीवा। दिशव्विशण्हस्। आप

प्राथमच्छिनावृष्ण्यावृषन्। अश्वाशिप्रुमती। विश्वाशवि

ष्ठशवसा। इट्(२)॥ विश्वाशविष्ठशवसा। ए। विश्वा

शविष्ठ। शवसीवा। दिशंव्विशण्हस्। अस्माण्अवम

घवन्गोमतिव्रजे। अश्वाशिप्रुमती। वज्रिञ्चित्राभिरू

तिभिः। इट्। इडा२ ३ ४ ५(३)॥ ७†॥

चस्य व्याख्यानम्—७भा० ४११-४१२-४३३ पृष्ठेषु द्रष्टव्यम्। ७

---

* इमानि पदानि निधनानि।

† सर्वत्र पृष्ठम्।

प्रजापतिर्जगतीसोमः॥ अरिष्टम्॥ हाइ। हो

दूया। पावी। चन्नायि। विततास्रम्ब्। ह्लाणस्पा२३

४तायि। प्राभूः। गाचा। णीऽपरियायि। षिवा

यिस्पा२३४ताः। आता। प्लता। नूऽर्नतदा। मोत्र

स्रू२३४तायि। प्रातर्ता। सत्रायित्। वहन्तः। सम्।

तदाप्रा२३४ता(१)॥ तापोः। पवायि। त्राऽवितत्तम्।

दिवस्पा२३४दायि। आर्चा। तोआ। स्राऽतन्तवः।

वियस्पा२३४यिरान्। आवा। तिया। स्राऽपविता।

रमाप्रा२३४वाः। दायिवाः। पृष्ठाम्। अधिरो। ह।

तितेजा२३४सा(२)॥ आरुह। रुचात्। उषसःपु। श्रि

रग्रा२३४याः। ऊत्ता। मिमायि। तोऽभुवने। षुवा

जा२३४यूः। माया। विनो। ममिरेत्र। स्रमाया२

५ ४ ५ १ २ १ २ १ २ २ २
३४या । नार्चा । ऋसाः । पितरः । ग । भमादा२

५ २
३४धूः । ह्वो२३४५इ । डा(३) ॥ ८ * ॥

अस्य व्याख्यानम्—३भा० ४६०-४६१-४६२ पृष्ठेषु द्रष्टव्यम् । ८

२ २
अथर्वा गायत्री सोमः ॥ आथर्वणम् ॥ उऊवा

२ २ २ २ २ २ २ २ १२
ओहा । औहोवा । पवस्वदा । उऊवाओहा । औहो

३२१ १ १ १२ २ २
वाहाऊ । वा । आवत् । ऋसाधा२३नाः । उऊवा

२ २ २ २ २ २ २ २ २
ओहा । औहोवा । देवेभ्यःपावि । उऊवा । ओ

२ १२ ३२ १ १ १ १२ २
हा । औहोवाहाऊ । वा । सूवः । तायहा२३रा

२ २ २ २ २ २ २ २
३यि । उऊवाओहा । औहोवामरुद्भोवा । उऊवा

२ २ १२ ३२ २ १ २ १२
ओहा । औहोवाहाऊ । वा । ज्योतिः । यवेमा२

२ २ २ २ २ १२ ३२ १
३दाः । उऊवाओहा । औहोवाहाऊ । वा३(१) ॥

२ २ २ २ २ २ २ २ २ २ २
उऊवाओहा । औहोवा । सन्देवैग्नो । उऊवाओहा ।

१२ १२ १ १ १ १२ २
औहोवाहाऊ । वा । आवत् । भतेवा २ ३ र्षा ३ ।

* आर्भवाल्पं तदेव ।

२ र र र र र र र र र
उङ्वाओहा। औहोवा। कविर्योनाऊ। उङ्वा
र र १र ३र १ १र १
ओहा। औहोवाहाऊ। वा। हवः। अधिप्रा२३
१ र र र र र र
याः। उङ्वाओहा। औहोवा। पवमानाः। उङ्
र र र १र ३र १ १ २ १र
वाओहा। औहोवाहाउ। वा। ज्योतिः। अदाभा२
१ १ र र र १र ऽ ३र १
३याः। उङ्वाओहा। औहोवाहाऊ। वा३(२)॥
१ र र र र र र र र र
उङ्वाओहा। औहोवा। पवमाना। उङ्वाओहा।
१र ३र १ १ १र १
औहोवाहाऊ। वा। आवत्। धियाहा२३यिता३ः।
१ र र र र र र र र
उङ्वाओहा। औहोवा। अभियोनायिम्। उङ्वा
र र १र ३र १ १ १
ओहा। औहोवाहाऊ। वा। सूवः। कनिक्रा२३
१ र र र र र र र
दाःत्। उङ्वाओहा। औहोवा। धर्म्मणावा। उङ्
र र र १र ३र १ १ २ १र
वाओहा। औहोवाहाऊ। वा। ज्योतिः। युमाङ्
१ १ र र र र ३र १ ०
२३हाः। उङ्वाओहा। औहोवाहाऊ। वा३। इ२
१ १ १
३४५(३)॥ ९ *॥

अस्य व्याख्यानम्—१भा० ५१३-५१४ पृष्ठयोर्द्रष्टव्यम्। ९

---

* चतुर्थे सप्तम्दिने विनियोगः।

इन्द्रोविराडिन्द्रः॥ मद्दावैराजम्॥ ह्वोइयाह्वोइ

याह्वोइयाइ४३पिब। सोमाम्। इन्द्रमा। दतुत्वा। द

तुत्वा। दतुत्वा। पिबासोमाम्। इन्द्रमा। दतुत्वा।

दतुत्वा। दतुत्वा। पिबासोमाम्। इन्द्रमा। दतु

त्वा। दतुत्वा। दतुत्वा। यन्तेसुषा। वाहरिया। श्वा

द्रीः। श्वाद्रीः। श्वाद्रिः। यन्तेसुषा। वाहरिया।

श्वाद्रीः। श्वाद्रीः। श्वाद्रिः। यन्तेसुषा। वाह

रिया। श्वाद्रीः। श्वाद्रीः। श्वाद्रिः। सोतुर्बाइ।

भ्याꣳसुयतो। नार्वा२। नार्वा२। नार्वा। सोतु

र्ब्बाइ। भ्याꣳसुयतो। नार्वा२। नार्वा२। नार्वा।

सोतुर्बाइ। भ्याꣳसुयतो। नार्वा२। नार्वा२। नार्वा।

इयाह्वाज। इयाह्वाज। इयंपिबमत्स्वाइ। ह्वाजवा

२ २र र र र र २३र १ २ १
३(१)॥ ह्वोइ॒याह्वोइ॒याह्वोइ॒या३४३॒यस्ते॑। मदो॑। यु॒जि

१ १ २ १ २ १ २ १र २
यश्वा॑। रु॒रस्ति॑। रु॒रस्ति॑। रु॒रस्ति॑। यस्ते॒मदो॑। यु

१ २ १ २ १ २ १ २ १र
जियश्वा॑। रु॒रस्ति॑। रु॒रस्ति॑। रु॒रस्ति॑। यस्ते॒मदो॑।

२ १ २ १ २ १ २ र १ २ १
यु॒जियश्वा॑। रु॒रस्ति॑। रु॒रस्ति॑। येनवृ॒त्रा। णीह॑

१ २ १ २ १ २ र १ २ १
रिया॑। श्वह॒ꣳसि॑। श्वह॒ꣳसि॑। येनवृ॒त्रा। णीहरि

१ २ १ २ १ २ १ २ र १
या॑। श्वह॒ꣳसि॑। श्वह॒ꣳसि॑। श्वह॒ꣳसि॑। येनवृ॒त्रा।

२ १ २ १ २ १ २ १ २
णीहरिया॑। श्वह॒ꣳसि॑। श्वह॒ꣳसि॑। श्वह॒ꣳसि॑।

१र २ १र २ १ २ १ २
सत्वामिन्द्रा॑। प्रभूवसाऊ॑। ममत्तु॑। ममत्तु॑।

१ २ २ १र २ १र ३ १ २ १ २
ममत्तु॑। सत्वामिन्द्रा॑। प्रभूवसाऊ॑। ममत्तु॑। ममत्तु॑।

१ २ १र २ १र २ १ २ १ २
ममत्तु॑। सत्वामिन्द्रा॑। प्रभूवसाऊ॑। ममत्तु॑। ममत्तु॑।

१ २ १ २ १ २ १ र ऽ
ममत्तु॑। इ॒याह्वाऊ॑। इ॒याह्वाऊ॑। इ॒ययस्ते॒मत्सा३॑।

२ २र र र र र २र ३ १
ह्वाऊवा३(२)॥ ह्वोइ॒याह्वोइ॒याह्वोइ॒या३४३॒बोध॑। सुमायि॑।

२१ १ १२२२ १२२२ १२२२ २
मघवन्वा। चमेमाम्। चमेमाम्। चमेमाम्। बो
१२ २१ २ १२२२ १२२२ १२
धात्तुमायि। मघवन्वा। चमेमाम्। चमेमाम्। चमे
२२ २१२ २१ २ १२२२ १२
माम्। बोधात्तुमायि। मघवन्वा। चमेमाम्। चमे
२२ १२२२ २१२ २ १ २
माम्। चमेमाम्। यान्तेवसायि। ष्ठोअर्चतायि।
१ २ १ २ १ २ २ १२
प्रश्नस्तिम्। प्रश्नस्तिम्। प्रश्नस्तिम्। यान्तेवसायि।
२ १ २ १ २ १ २ १ २ २
ष्ठोअर्चतायि। प्रश्नस्तिम्। प्रश्नस्तिम्। प्रश्नस्तिम्। या
१२ १ २ २ १ २ १ २ १
न्तेवसायि। ष्ठोअर्चतायि। प्रश्नस्तिम्। प्रश्नस्तिम्। प्रश्न
२ १२ २१२ २ १ २ १
स्तिम्। इमाब्रह्मा। सधमादायि। जुषस्व। जुष
२ १ २ १२ २१२ २ १ २
स्व। जुषस्व। इमाब्रह्मा। सधमादायि। जुषस्व।
१ २ १ २ १२ २१२ २ १ २
जुषस्व। जुषस्व। इमाब्रह्मा। सधमादायि। जुषस्व।
१ २ १ २ १ २ १ २ १ २
जुषस्व। जुषस्व। इयाद्दाऊ। इयाद्दाऊ। इयबोध
२ १२१२१
मत्साइ। द्दाऊवाइ। ई२३४५(३)॥१०*॥

अस्य व्याख्यानम्—१भा० ५१७-५१८-५२९ पृष्ठेषु द्रष्टव्यम्। १०

* चतुर्थोऽनुवाकः समाप्तः।

प्रजापतिर्गायत्रीन्द्रः॥ यण्वम्॥ अर्षासोमद्युमत्तमः।

ए२। अभिद्रोणानि। रोरुवोवा। औहोवा औहोवा

औहोवा। औहोहायि। औहोहायि। औहोहायि।

सीदन्योनौवना२३यिषुवाऊ। वाइ। ई२३४डा(१)॥ अ

प्साइन्द्रायवा२३यवाइयि। वरुणायमरु२३द्भियाः। सो

मार्षन्तुवा२३यिष्णवाऊ। वाइ। ई२३४डा(२)॥ इष

न्तोकायनो२३दधाइत्। अस्मभ्यंसोमवा२३यिस्वताः।

औहोवाऔहोवाऔहोवा। औहोहायि। औहोहा

यि। औहोहायि। आपवस्वमहा२३सिणाऊ। वाइ।

इट्०इडा२३४५(३)॥ ११ * ॥

अस्य व्याख्यानम्—३भा० ६१४-६१५-६१६ पृष्ठेषु द्रष्टव्यम्। ११

बृहद्गिरिःपथ्यापङ्क्तिरिन्द्रः॥ बार्हद्गिरम्॥ इन्द्रो

मदा। यवावृधेशवसेवृत्रहा२३नुभायि। अथा। तस्मिन्म

---

* पञ्चमेऽहनि मध्यन्दिने।

२ २ २ २१ २ ४ ५
चत्स्तुवा१जाइयि। षू। जनिमर्भेद्दवाइ। माद्दायि।
१ २ २ १ २ २
सवाजेषुप्रनाइ३द्दोयि। वायिषदाइ१ऊवाइ३(१)॥ असि
१ २ २ २ १
द्विवी। रमेन्द्योसिभूरिपरा२ददायि। अथा। असिद
२ २ २ १ २ २ ४ ५
भ्यचा१यिद्दाइर्धाः। यजमानायशाइयि। त्तासायि।
१ २ २ १ २ २
सुन्वतेभूरिनाइ३यिद्दोयि। वासुआइ१ऊवाइ३(२)॥ यदु
२ १ २ २ २ १
दीरा। तआजयोधृष्णवेधीयता२यिधनाम्। अथा।
१ २ २ १ २ ४ ५
युङ्क्त्वामदच्युता१द्दाइरी। कण्हनःकव्वसाइऊ। दाधाः।
१ २ १ २
अस्माऽइन्द्रवसा २ ३ ऊहोयि। दाधआ ३ १ ऊवा २ ३।
५
आ २ ३ ४ था(३)॥ १२ *॥

अस्य व्याख्यानम्—३भा० ६३२—६३५ पृष्ठेषु द्रष्टव्यम्। ११

पृथुरश्मिःपथ्यापङ्क्तिरिन्द्रः॥ पार्थुरश्मम्। एई १
न्द्रा। ओ२ ३ ४ वा। मदायवा२वृधायि। अथा। २ ३ ५ २१२ १
एशावा। ओ२३ ४ वा। सेवृत्रहा२नृभायि। अथा। २ ३ ५ २२१ १

* ब्राह्मणस्य पार्थुरश्मं ब्रह्म साम।

२, ३ ५ २१ १
एताभो। ओ२ ३ ४ वा। मघवत्सुवा२जिषू। अथा।

२, ३ ५ २१२ १
एजता। ओ२३ ४ वा। अर्वद्भवा२मघायि। अथा।

२, ३ ५ २२१ १
एसावा। ओ२३ ४ वा। जेषुप्रनो२विषात्। अथा(१)॥

२, ३ ५ १२ १
एआसा। ओ२३ ४ वा। हिवोरसे२नियाः। अथा।

२, ३ ५ २२१ १
एआसा। ओ२३ ४ वा। भरिपरा२ददायि। अथा।

२, ३ ५ २१ १
एआसा। ओ २ ३ ४ वा। दभ्रस्यचा२यिदुधाः।

अथा। एयाजा। ओ२३४वा। मानायशा२यिशसायि।

अथा। एहव्वा। ओ२३४वा। तेभूरिता२यिवसाज।

अथा(२)॥ एयादू। ओ२३४वा। ईरतआ२जयाः।

अथा। एधृष्टा। ओ२३४वा। वेधीयता२यिधनाम्।

अथा। एयूङ्खाः। ओ २३४वा। मदच्युता२हरायि।

अथा। एकाएद्वा। ओ२३४वा। नःकव्वसा२जदधाः।

अथा। एऽस्माए। ओ२३४वा। इन्द्रवसा२ऊदधाः।
अथा२३४५(३) ॥ १३ * ॥

अस्यापि व्याख्यानम्—३भा० ६३१—६३५ ष्टष्ठेषु तदेव। १३

रायोवाजःपथ्यापङ्क्तिरिन्द्रः॥ रायोवाजीयम्॥

एस्वादोः। इत्याविषूवतोमधोःपिबन्तिगौ२रियाः। इडा।
याइन्द्रेणसया१वाऽरीः। वृष्णामदन्तिशो३। भाया(१)॥
एताआ। स्यपृश्नायुवस्सोमऽश्रीणन्तिपा२र्श्नयाः। इडा।
प्रियाइन्द्रस्यधा १ यिना ३ वाः। वज्रऽहिन्वन्तिसा ३।
याकाम्(२)॥ एताआ। स्यनमसामहस्मपर्य्यन्तिप्रचा
२यितसाः। इडा। व्रतान्यस्यसा१स्वाऽयिरायि। पुरूणि
पूर्वचाऽयि। तायायि। वस्वीरनुस्वरा२ऽच्चोयि। जायमा
३१ऊवा२३। इट्०इडा२३४५(३)॥ १४ † ॥

अस्य व्याख्यानम्—३भा० ६३७-६३८-६३९ ष्टष्ठेषु द्रष्टव्यम्। १४

रुद्रोऽनुष्टुप् सोमः॥ प्रकरर्षभः। ओ३म्।

---

* राजन्यस्येदं ब्रह्म साम। [सामनी।

† उभयोरिदमच्छावाकसाम। वैश्यस्य रायोवाजीयवार्षद्विरे ब्रह्मसामाच्छावाक-

र र रर र र र र १ २१र २१र र र
पवाएखवाएजसाएतयआ। शय्योः। शय्योः। पाए

र र र र २ २१ र र र र र र २१
वाएत्राएधा१। हविः। राएयाएहएतआ। सुवः। सु

र र र र रर २१ र र
वः। इन्द्राएयसोएमवाएष्णवआ। ज्योतिः। ज्योतिः।

र र र र र र र २१ र र र र
देवाएभ्योमाएधुमाएत्तरआ। इट्(१)॥ ओवामेरिहाएन्ति

र र २ १ २१र २१र र र र र र २ १ १
धाएतयआ। शय्योः। शय्योः। हाएराएस्याएविया।

२ १ २ १ र र र र र र २ १ १ १
हविः। हविः। त्राएआएद्रूएहआ। सुवः। सुवः।

र र र र र र र २ १ र र र
वत्सामेजातामेनमाएतरआ। ज्योतिः। ज्योतिः। पवा

र र र र र र र १ र र र र र र
एमानाएविधाएर्मणिया। इट्(२)॥ ओवामेद्यात्त्राएमहा

१ र १ २ ०र २१र र र र र र र २ २ १
एव्रतआ। शय्योः। शय्योः। पाएर्थाएवाएत्त्रा१। हविः।

२ १ र र र र र र २ १ र
हविः। आएताएजाएभिषआ। सुवः। सुवः। प्रता

र र र र र र २र १ र र र र
एद्रापीमेअमूएत्त्रथाआ। ज्योतिः। ज्योतिः। पवाए

र र र र र र १ २ १ १ १
मानाएमहाएनाएना१। इट्०इडा२३४५(३)॥ १५ *॥

अस्य व्याख्यानम्—३भा० ६५८-६५९-६६० ४४ षु द्रष्टव्यम्। १५

* पञ्चमार्भवे।

प्रजापतिरनुष्टुप्सोमः ॥ अष्टेडपदस्तोभः॥ ईडा।

पवस्वाजसाताय। ईडा। ईडा। पवित्रेधारयासुतः।

ईडा। ईडा। इन्द्रायसोमविष्णवे। ईडा। ईडा।

देवेभ्योमधुमत्तरा२३४५ः। ईडा(१)॥ ईडा। त्वाऽरिहन्ति

धीतयः। ईडा। ईडा। हरिम्यवित्रेअद्रुहः। ईडा।

ईडा। वत्सञ्जातन्नमातरः। ईडा। ईडा। पवमान

विधर्म्मणे२३४५। ईडा(२)॥ ईडा। त्वन्द्यावृत्वमद्रिव्रत।

ईडा। ईडा। पृथिवीञ्चातिजभ्रिषे। ईडा। ईडा।

प्रतिद्रापिममुञ्चथाः। ईडा। ईडा। पवमानमद्रित्व

ना२३४५। पवमानमद्रित्वना१। ईडा(३)॥ १६ *॥

अस्यापि व्याख्यानम्—३भा० ६५८-६५९-६६० पृष्ठेषु तदेव। १६

प्रजापतिर्गायत्रोन्द्रः॥ रेवत्यम्॥ द्वावीन्द्रा।

येन्द्राऊ। इद्वा। मरुत्वतारयि। द्वा३१ऊवा२३। ई

* पञ्चमार्भवे। इडापदानि च निधनानि।

३४डा। पवा२स्वमा। इ३हा। धुमन्तमा२:। हा३१
ऊवा२३। ई३४डा। अर्का२स्यो। इ३हा। निमास
दा२म्। हा३१ऊवा२३। ई३४डा(१)॥ हाऊताव्वा।
विप्रा:। इ३हा। वचोविदा२:। हा३१ऊवा२३। ई३
४डा। परा२यिष्क्णुवा। इ३हा। तिधर्णसा२यिम्।
हा३१ऊवा२३। ई३४डा। सन्वा२मुजा। इ३हा। ति
ग्मायवा२:। हा३१ऊवा२३। ई३४डा(२)॥ हाऊरासाम्।
तेमायि। इ३हा। चोअर्य्यमा२। हा३१ऊवा२३। ई३
४डा। पिवा२न्तुवा। इ३हा। रणःकवा२यि। हा३१
ऊवा२३। ई३४डा। पवा२माना। इ३हा। स्वमरु
ता२:। हा३१ऊवा२३। ई३४डा(३)॥ १७ *॥

अस्य व्याख्यानम्—४भा० ३०-३१ पृष्ठयोर्द्रष्टव्यम्। १७

रुद्रोगायचेन्द्र:॥ रैवतर्षभ:॥ सुरुपकृत्नुमूत

* षष्ठे मध्यन्दिने।

र २ र १ २ र २ र १ र २ १ र १
ये। सुरूपकृत्नुमूतये। सुरूपकृत्नुमूतये। सुदुघामि

र १ र १ २ र १ २
वगोदुहे। जुहूमसायि। द्याविद्यवायि। द्याविद्यवा

२ र १ २ १ २ १ १ र १ १
यि। द्याविद्यवा३१ऊ। वा२३(१)॥ उपनस्मवनागहि। उप

१ १ २ २ र २ १ १ १ १ र २ १ र २ र र
नस्मवनागहि। उपनस्मवनागहि। सोमस्यसोमपाःपिब।

१ र २ २ र १ र २ र १ र २ र १ र २
गोदाइद्र। वातोमदाः। वातोमदाः। वातोमदा३१ऊ।

१ र २ र १ २ र र १ र २ १ २ र र
वा२३(२)॥ अथातेअन्तमानाम्। अथातेअन्तमानाम्।

१ र २ र १ २ र र १ २ र १ र र २
अथातेअन्तमानाम्। विद्यामसुमतीनाम्। मानोअ

२ र १ र २ र १ २ र १ र
तायि। ख्याआगह्यायि। ख्याआगह्यायि। ख्याआ

२ १ १ १
गहा३१ऊ। वा२३। उम्। उम्। उम्(३)॥ १८ * ॥

अस्य व्याख्यानम्—४भा० ५७-५८-५९ पृष्ठेषु द्रष्टव्यम्। १८

१ २
प्रजापतिः षट्पदापि जगतीन्द्रः॥ श्येनम्॥ ऊभा

१ १ २ र १
यि। यदिन्द्ररो२दसायि। इडा। आपा। प्राथउषा

१ २ १ २ १
२यिवा। इडा। माद्या। तन्वामद्या२यिनाम्।

* षष्ठे ब्रह्मसाम।

इडा। साम्रा। जच्चर्षणा२यिनाम्। इडा (१)॥ दी
र्घाम्। हियङ्कुशा२यथा। इडा। शाक्वरीम्। बिभ
र्षिमा२न्तुमाः। इडा। पूर्वे। णमघवा२न्पदा। इ
डा। वायाम्। अजोयथा२यमाः। इडा (२)॥ आवा।
स्मदुर्हणा२यताः। इडा। मार्ता। स्यतनुचा२यिस्थि
राम्। इडा। आधाः। पदन्मा२यिङ्कधायि। इडा।
योआ। स्मऽअभिदा२सतायि। इडा। देवी। ज
निवयजा२यिजनात्। इडा। भाद्रा। जनिवयजा२
यिजनात्। इडा२३४५ (३)॥ १९ *॥

अस्य व्याख्यानम्—४भा० ६०-६१-६२ पृष्ठेषु द्रष्टव्यम्। १९

प्रजापतिः द्विपदा विष्टारपङ्क्तिः विराडेकेषामिति भुवने-
न्द्रो विश्वेदेवाः॥ भद्रम्॥ चोइचा। इमानुकम्भवना
सीषधेमाइ। इचा। इन्द्रश्चविश्वेचदेवाइः। इचा(१)॥

* षष्ठं अध्यायकसाम।

२ १ २ १ २ १२ २ १ २२ १२ २
यज्ञश्चनस्तन्वश्चप्रजाश्चाऽइ। इहा। आदित्यैरिन्द्रस्य
१२ २२ १ २२ १२ २ १ २२ १ २
ह्सौषधात्रऽइ। इहा(२)॥ आदित्यैरिन्द्रस्यगणोमरुद्भी
१ २ १ २२ १२ १ १ १
ऽइः। इहा। अस्मभ्यम्भेषजाकराऽइत्। इहा। ए३।
१
भद्रम्(३)॥ २०॥*

अस्य आख्यानम्—४भा० ९८-९९ पृष्ठयोर्द्रष्टव्यम्। २०

॥ इत्यूच्यगाने दशरात्रपर्व्वणि प्रथमस्यार्द्धः प्रपाठकः॥

———ooo———

अग्निर्गायत्रीरर्कः॥ अग्नेरर्कः॥ २ २ २ यस्तेमदोवाऽइ
१ २ २ १ २ २ २
रायेणाऽयाऽइः। तेनापवस्वाऽआन्धाऽसाऽइ। देवावीर
१ २ १ २
घाऽइराऽसाऽइहाऽइ(१)॥ जघ्निर्वृत्रमाऽइमायिनाऽयाऽइम्। स
२ २ २ २ १
स्निर्व्याजन्दिऽइवायिदाऽयिवाऽइयि। गोषातिरश्वाऽइसा
२ २ १ २ २ २
आऽसाऽइयि(२)॥ सम्मिश्लोअरुऽइषोभूऽवाऽइः। सृपस्याभि
२ २ २ १
न्नाऽइधायिनूऽभाऽइयिः। सीदञ्छ्येनोनाऽइयोनाऽयिमाऽइ।
२ १२ १२ २ १
ए। अग्निर्म्मूर्धाभवद्दिवः(३)॥ १†॥

अस्य आख्यानम्—३भा० ३४३-३४४-३४५ पृष्ठेषु द्रष्टव्यम्। १

* षष्ठे द्वितीयउक्थे। † सप्तमार्भवे।

होयि। होयि। हाऊहाऊहाऊवा। द्यौः (२)॥ हावद्
व्यस्थ। रभिन्तराइः। होयि। होयि। होयि। हा
ऊहाऊहाऊवा। सहोनरः। अदब्धस्तुरभिन्तराइः।
होयि। होयि। होयि। हाऊहाऊहाऊवा। सत्य
मोजः। सुतेचित्त्वाप्सुमदाइ। होयि। होयि। हो
यि। हाऊहाऊहाऊवा। स्वर्ज्योतिः। मोअन्धसाइ।
होयि। होयि। होयि। हाऊहाऊहाऊवा। एस्था
दिदम्। एस्थादिदम्। एस्थादिदम्। श्रोणन्तोगोभि
रुत्तराइम्। होयि। होयि। होयि। हाऊहाऊ
हाऊवा। द्यौरक्रान् भूमिरततनत्समुद्रए समचूकुपत्।
इट्०इडा२३४५ (३)॥ ३ *॥

अस्यापि व्याख्यानम्—४भा० २०५-२०६-२०७ पृष्ठेषु द्रष्टव्यम्। १

* नवमे मध्यन्दिने।

प्रजापतिर्बृहती सोमः ॥ सङ्कृतिनि ॥ एषारी ।

तोषिच्चता२३ह्वो२३यि । सुता२३म् ह्राओवा । सो

मोयउत्तमꣳहविः । दधन्वाꣳयोनर्य्यो३अ । प्सुवन्तरा ।

सुषावसोममद्रिभिः (१) ॥ एह्यषावसोममा२३ह्वो२३ । द्रि

भा२३यिः । ह्राउवा । सुषावसोममद्रिभिः । नूनम्पु

नानोविभिः । परिस्रव । अदब्धस्तुरभिन्तर । एआदा ।

ब्धस्तुरभा२३यिह्वो२३ । तरा२३ः । ह्राओवा । अदब्ध

स्तुरभिन्तरः । सुतेचित्त्वाप्सुमदा । मोअन्धसा । श्रीण

न्तोगोभिरुत्तरम् । ह्वौ३ । आ३ । ऊ३ । ई२३

४ ५ (३)॥ ४ * ॥

अस्यापि व्याख्यानम्—४भा० ३०५—३०७ ऋक्षेषु तदेव । ४

प्रजापतिः बृहती सोमः ॥ भर्गम् ॥ यत् । परो

तोषि । चता२ह्व२३४ताम् । सोमोयउ । तमा२ꣳ

* अस्यापि नवमे मध्यन्दिने ।

२ ५ २ २ २ १ ३ ५
इ।२३४वीः। दधन्वाएयोनर्य्याअ। पुवारन्ता२३४रा
२२ २ १ ३ ५ २२ २ १
सुषावसो। ममा२द्रा२३४यिभायिः॥ सुषावसो। ममा
३ ५ २२ २ १ ३ ५
२द्रा२३४यिभायिः(१)॥ सुषावसो। ममा२द्रा२३४यिभा
२२ २ २ १ ३ ५
यिः। नूनम्पुनानोअविभिः। परा २ यिस्ता २ ३ ४ वा।
१ १ ३ ४ २ १
अदब्धस्तुरभा२यिन्ता२ ३ ४राः(२)॥ अदब्धस्तुरभा२यि
२ ५ २ १ ३ ५ २ २
